# संस्कृतसाहित्यम्

## द्वितीयो भागः

कर्नाटकसंस्कृतविश्वविद्यालयस्य बि.ए.द्वितीयवर्षस्य संस्कृतभाषापत्रिका

संग्राहकः- डा. वीरनारायण पाण्डुरङ्गी

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गळूरु

# भूमिका

श्रीगुरुराजो विजयते।

कर्नाटकराज्ये संस्कृतविद्यायाः अभिवृद्धये स्थापितोऽयं संस्कृतविश्वविद्यालयः। संस्कृतस्य अध्ययनाध्यापनयोः बलवर्धनं, संस्कृतग्रन्थानां प्रकाशनम्, शास्त्रेषु निहितानां गूढतत्त्वानामनुसंधानेन बहिः सर्वजनसाधारणतया प्रकाशनमित्यादयः कार्यविशेषाः अनेन विश्वविद्यालयेन संसाधनीयाः येन संस्कृतस्याभिवृद्धिर्नूनं भवेत्।

तत्र कार्येष्वादिमं विद्वत्कक्ष्यीयाणां सर्वेषां पाठ्यपुस्तकानां मुद्रापणम्। अतः ऐदंप्राथम्येन विद्वन्मध्यमाकक्ष्याणां संस्कृतभाषापाठ्यग्रन्थानां प्रकाशनमत्र विधीयते। यद्यपि विद्वच्छात्राः संस्कृतभाषामयानेव प्राचीनान् ग्रन्थान् पठन्ति, तथापि आधुनिकसंस्कृतसाहित्यपरिचयस्तेषां न्यून एवेति निश्चित्य आधुनिकसंस्कृतसाहित्यपरिचयाय आधुनिकानां प्रसिद्धानां कवीनां काव्यानि, नाटकानि, गद्यानि, चम्पूकाव्यानि च पाठ्यत्वेन चितानि ।

अत्र च छात्राणामानुकूल्याय विविधेषु ग्रन्थेषु पृथङ्मुद्रितानां पाठ्यानां संग्रहेण एकत्रोपलब्धिर्यथा स्यात् तथा पुस्तकमिदं मुद्राप्यते। एतन्मुद्रणकार्ये प्रोत्साहितवतीभ्यः विश्वविद्यालयस्य कुलपतिस्थानमलंकुर्वतीभ्यः प्रो.पद्मा शेखरमहोदयाभ्यः कृतज्ञताः समर्प्यन्ते। तथा अध्ययनमण्डल्याः सदस्येभ्यः प्रो.के.बि.अर्चक-विदुषी पी.हेच्.विजयलक्ष्मी-डा.सि.नञ्जुण्डय्य-प्रो.गिरीशचन्द्रमहोदयेभ्यः कृतज्ञताः समर्प्यन्ते। भिन्नेषु स्थानेषु मुद्रितानामेतेषां ग्रन्थानामेकत्र प्रकाशने दत्तानुमतिभ्यः संस्कृतभारत्याः सत्यनारायणभट्ट-जनार्दनहेगडेमहोदयेभ्यः, अखिलकर्नाटकसंस्कृतपरिषदः संघटनाकार्यदर्शिभ्यः प्रो.एम्.के. श्रीधरमहाशयेभ्यः, शम्भुलिङ्गेश्वरविजयग्रन्थकारसुपुत्रेभ्यः विद्वद्भ्यः गोपीनाथाचार्य-गलगलीमहाशयेभ्यश्च आधमर्ण्यं समर्पयामि । तदत्र कार्ये सहकृतवतां डा.मञ्जुनाथभट्ट, विदुषी शकुन्तला भट्ट, जि.कृष्णप्रसाद इत्येतेषां साहाय्यं च स्मरामि। मन्ये छात्राः अस्य पुस्तकस्य लाभं पाप्स्यन्तीति।

डा. वीरनारायण पाण्डुरङ्गी

निर्देशकः, स्नातकोत्तरसंशोधनाध्ययनविभागः

कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूरु

# विषयानुक्रमणिका

| | भाषापत्रम्<br>प्रथमभाषा संस्कृतम् | लेखकः संपादको वा | प्रकाशनम् | | अङ्काः |
|---|---|---|---|---|---|
| चम्पूभागः | शम्भुलिङ्गेश्वरविजयः | पण्ढरीनाथाचार्य गलगली | बृहन्मठः<br>विजयपुरम् | कर्नाटकवर्णनम् | 20 |
| पद्यभागः | मेघप्रतिसंदेशः | मण्डिकल्<br>रामशास्त्री | मण्डिकल्<br>रामशास्त्रिप्रतिष्ठानम्<br>बेङ्गळूरु | आद्याः<br>पञ्चत्रिंशत्<br>श्लोकाः | 25 |
| नाटकभागः | एकचक्रनाटकम् | रङ्गनाथशर्मा | काव्योद्यानम् | 1-3 अङ्काः | 25 |
| अविस्तृत<br>पठ्यम् | ऋणविमुक्तिः | हेच्.वि.<br>नागराजराव् | संस्कृतभारती | पूर्णम् | 30 |

## कविपरिचयः

### पण्ढरीनाथाचार्यः गलगली (1922-)

शम्भुलिङ्गेश्वरविजयचम्पूकाव्यस्य रचयिता पण्ढरीनाथाचार्यः गलगली प्रसिद्धः कविः, मधुरवाण्याः संपादकः, श्रीकृष्णकण्ठाभरणं, सत्यध्यानविजयचम्पूः इत्यादीनां रचयिता। राष्ट्रपतिना साहित्याकाडम्या च पुरस्कृतः द्वैतवेदान्ते कृतभूरिपरिश्रमः विख्यातः वाग्मी।

### मण्डिकल् रामशास्त्री (1849-1929)

कविभूषण-कविशिरोमणि-कविकण्ठीरादिबिरुदभूषितः मण्डिकल् रामशास्त्री कुम्भाभिषेकचम्पू-भैमीपरिणय-आर्यधर्मप्रकाशिकादिग्रन्थानां प्रणेता, महीशूरास्थानविद्वान्, मण्डिकल् रामशास्त्री न्यायादिशास्त्रेषु कृतभूरिपरिश्रमः मैसूरुनगरे महाराजसंस्कृतविद्यालये आचार्य आसीत्।

### नडहळ्ळि रङ्गनाथशर्मा (1916-2014)

व्याकरण-साहित्य-अद्वैतवेदान्तादिशास्त्रेषु कृतभूरिपरिश्रम आचार्यः रङ्गनाथशर्मा बेङ्गळूरुनगरे चामराजेन्द्रसंस्कृतमहाविद्यालये व्याकरणशास्त्रप्राध्यापक आसीत्। राष्ट्रपतिना राज्यसर्वकारेण केन्द्रसर्वकारेण विविधैः मठैश्च नितरां सभाजितस्यास्य कृतिषु एकचक्रनाटकमन्यतमम्।

### हेच्.वि. नागराजराव् (1942-)

व्याकरणसाहित्यशास्त्रयोः कृतभूरिपरिश्रमः काव्यशास्त्रविचक्षणः नागराजरावमहोदयः मैसूरुनगरे प्राच्यविद्यासंशोधनालये नानाग्रन्थानां संशोधनमकरोत्। वैदेशेषु अनेकेषु विश्वविद्यालयेषु अतिथिप्राध्यापकस्सन् बहूंश्छात्रानध्यापयामास। राष्ट्रपतिना सभाजितोयं विद्वान् वर्तमानकालिकेषु विद्वत्कविषु प्रमुखः।

गलगली पण्ढरीनाथाचार्यविरचिता

# शम्भुलिङ्गेश्वरविजयचम्पूः

श्रीमच्चन्द्रमहेन्द्रमुख्यविलसन्मन्दारुवृन्दारका-
लीवृन्दारकवृन्दवन्दितपदद्वन्द्वारविन्दप्रियम्।
स्यन्दद्दानपयोमरन्दकणिकापानोत्कपुष्पंधया-
मन्दानन्ददसिन्धुराननमहं वन्दे परं दैवतम् ।।1।।
स्वस्तिदं भुवि समस्तजीविना-
मस्तदूषणमपास्तसंकटम्।
निस्तुलं च कविभिः स्तुतं सदा
वस्तु हस्तिमुखमस्तु नः श्रियै।।2।।
स्वस्तरूपममुपस्थितार्थिनां ध्वस्तपापमपहस्तितासुरम्।
सुप्रशस्तममरैश्च शस्तदं वस्तु हस्तिमुखमस्तु वो मुदे।। 3।।
केलीधूलीकृताशेषव्यालीक्रूरासुरावली।
काली शूलीश्वरालीढतनुर्वस्तनुतां शिवम्।। 4।।
पादाम्भोजनमच्चतुर्मुखकुटुम्बिन्यम्बुजावासिनी-
जम्भारातिनितम्बिनीमुखदिवोदेवीकदम्बार्चिताम्।
जृम्भद्दम्भनिशुम्भशुम्भदनुभूकुम्भीन्द्रसम्भेदिनीम्
अम्बां शम्भुहृदम्बरेन्दुकलिकां सिंहोरुसत्वां भजे।। 5।।
गिरीशहृत्करीन्द्रस्य वारी नारी शिवंकरी।
भवसिन्धुतरी गौरी नरीनर्तु हृदन्तरे।। 6।।
लोके यस्तु विषादितामुपगतोऽप्यानन्दपूर्णः सदा
स्थाणुर्यद्यपि सर्वलोकफलदः सर्वज्ञ इत्यर्चितः।
कामं काममभावयन्नपि सती श्लिष्टो भुजंगावृतः
भूत्यै चित्रविचित्रचारुचरितश्चोग्रोऽपि सौम्यः शिवः।।7।।
आपन्नाखिलपापपर्वतकुलव्यापादनारूपिणि
व्यापारे कुलिशास्त्रकौशलभृतस्तापार्तिचिन्ताच्छिदः।
भालब्रह्मलिपिं चयेऽन्यथयितुं शक्ताश्च भक्तावलेः
श्रीमद्रेणुकपादरेणुकणिका नः श्रेयसे भूयसे ।। 8 ।।

पावित्र्याच्छवचःप्रवाहसुयशोगम्भीरिमस्वच्छता-
लोकोद्धारकतादिसद्गुणगणैर्मन्दाकिनीं मन्दयन्।
शिष्याणामुपदर्शयन्सुचरितादर्शं निजाचारतः
सच्छास्त्राद्युपदेशतश्च भगवाञ्छ्रीरेणुकार्यो मुदे ।। 9 ।।
श्रीरेणुकाचार्यमुनीन्द्रवर्यश्रीपादरेणोः कणिकाः पुनन्तु।
ये तीर्थसार्थस्य विलोपयन्ते पापापनोदक्षमतावलेपम्।। 10 ।।
आचार्यत्वं हि यत्रैव पर्याप्तं रेणुकं स्तुमः।
आर्यत्वं ज्ञानिधुर्यत्वं योगिवर्यत्वमेव च।। 11 ।।
इन्द्रियस्थैर्यगाम्भीर्यदानौदार्यमुखा गुणाः।
वाक्श्रीचातुर्यमाधुर्यधुर्या यत्र व्यवस्थिताः।। 12 ।।
वेदान्तदेशिकं वन्दे सर्वशास्त्रोपदेशकम् ।
सूर्याल्यम्बुजसूर्यश्रीरेणुकाचार्ययोगिनम् ।। 13 ।।
नामं नामं गुरुस्तोमं कामं क्षेमंकरं हरम्।
शम्भुलिङ्गशिवाचार्यवृत्तचम्पूं समारभे।।14।।
बलिनाद्य हन्त कलिनाऽकुले कुले
महतां क्षितौ च वसतां सतामपि।
प्रमुखेषु धर्मविमुखेषु दुर्दशां
त्रिदशार्चितापि सुरभारती गता।।15।।
पदबन्धुराणि रससुन्दराणि च
स्तवनानि कुत्र कवनानि संस्कृते।
क्वचनापि काव्यरचना न दृश्यते
मरुतां वचोम्बुमरुतामिता मही।।16।।
लक्ष्मीकटाक्षविषयत्वमिहाधिगन्तु-
माङ्ग्लीप्रशिक्षणमनुक्षणमभ्यसत्सु।
सर्वेषु भारतजनेषु सुपर्ववन्या
गीर्वाणवाग्भजति शोच्यतमामवस्थाम्।।17।।
सद्यःस्फूर्तिसमुद्यदुक्तिरचनावैदग्ध्यवैशद्यतो
गद्यं संस्कृतवाचि पद्यमपि वा निर्मातुमेकैककम्।
वैशारद्यमिहाद्य न क्वचिदहो श्लाध्यं पुनर्विद्यते
गद्यालीयुतपद्यबद्धरसवच्चम्पूकृतेः का कथा।।18।।
स्वर्भाषाज्ञानदुर्भिक्षे रससन्दर्भगर्भिताः।

नाविर्भवन्ति कृतयः कृतिनो यन्न तादृशाः।।19।।
किंत्वस्मिन्संस्कृतज्ञानमरुभूते महीतले ।
एकैवास्ति चकास्त्यत्र संस्कृतज्ञानवाहिनी।।20।।
जम्बुकण्डीपुरीसीम्नो नातिदूरतरे गिरौ।
रसोर्मिसंभृतं भाति ज्ञानामृतसरोवरम्।।21।।
शम्भुलिङ्गशिवाचार्यो ज्ञानमेरुर्महागुरुः।
जंगमज्ञानकोशोऽयं भाति विद्यास्वयंवरः।।22।।
साहित्ये सरसार्थसुन्दरतरे पाण्डित्यमेतद्यतेः
सच्छास्त्रेषु विशिष्य गीष्पतिसमं वैदुष्यमस्याद्भुतम् ।
गद्यावद्यविहीनपद्यरचनासौविद्यविद्योतितो
नान्यः कश्चन विद्यते कविवरो नेदृक्सुधीर्नो यतिः।।23।।
पाण्डित्यं मणिकारपाणिनिपतञ्जल्यादितुल्यं गुरोः
बाणश्रेष्ठमयूरमाघजयदेवेड्यं कवित्वं पुनः ।
कर्णौदार्यपरार्थकार्यजनतोद्धारोपकारान्गुणान्
दृष्ट्वा कस्य जडस्य चापि कवितास्फूर्तिर्भवेन्न स्तुतौ ।। 24 ।।
जडधीरहं तु मृडधीगुरोर्महागुणकृष्टमुष्टपरितुष्टमानसः
महिमाविवर्णयिषया प्रचोदितः सुरवाक्प्रबन्धकृतिचापलोद्यतः।। 25।।
गुरुराट्स्वयं हि कविराट् सुसंस्कृते
चरितं प्रभावभरितं तदस्य तु ।
उचितं भवेद्धि रचितं दिवो गिरा
तदहं यते कवियतेः प्रवर्णने।। 26।।
क्व क्लिष्टा संस्कृतं भाषा क्व चम्पूः श्लिष्टबन्धुरा ।
क्व चाहं जडधीर्मन्दः जाड्यादेवोपपद्यते।। 27।।
मन्दोऽप्यनास्वादितकाव्यगंध-
श्चम्पूप्रबन्धोपनिबन्धनोत्कः ।
हा स्यामहं पङ्गुरिवोपहास्यः
विन्ध्याद्रिमुल्लङ्घितुमुद्धताङ्घ्रिः।।28।।
अथवा गुरुचरणानां करुणाकिरणाः पुनः ।
प्रेरणाकारणानीह न संकल्पो ममाल्पकः।।29।।
अनूरुररुणो व्योमायाममुल्लङ्घतेऽन्वहम् ।
पतङ्गस्यैव नो पङ्गोर्महिम्नो गरिमा हि सः।।30।।

प्रेरकः कारकश्चात्र गुरुरेव न संशयः ।
अहं तु लिपिकारोऽस्मि ममकारो न मेऽप्यणुः ।। 31 ।।
अणुर्वापि कणो वाऽत्र गुणश्चेत्सा गुरोः कृपा ।
दोषाः शेषा ममाज्ञत्वविशेषा इति भाव्यताम् ।। 32 ।।
प्रारम्भे जगदालम्बे लम्बोदरपदाम्बुजे ।
शिवाचार्यचरित्राख्यां चम्पूं नत्वाऽरभे पुनः ।। 33 ।।

## भारतदेशवर्णनम्

भारताभिधभूमातुः कर्णाभरणभूषणम्।
कर्णाटकाख्यदेशोऽयं भूपटे भाति शोभया।।34।।

अस्ति खलु समस्तोच्चावचवस्तुविस्तारप्रशस्ता सुरासुरनरकिन्नरादिनिकुरम्बसमभिशस्ता कौस्तुभकोहिनूरसदृशनैकनिस्तुलरत्नप्रस्तरप्रकराकरनिकरोदारोदरसार्थकीकृतवसुमतीत्यभिधाना विश्व-विश्वम्भरावलयकुवलयकर्णिकारालंकारभूता प्रभूततरतीर्थक्षेत्रदेवमन्दिरादिपुण्यस्थलपवित्रीकृतधरित्रीतला भावुकास्तिकधार्मिकजननिर्वर्त्यमाननित्यनैमित्तिकनानाधर्मकर्मदानदक्षिणाद्युत्कटपुण्यकोटिविपाटितपापपटलीसमुच्चाटितकलिकाटवावतारितकृतयुगप्रकृताविकृतसुकृतराशिदोधूयमानसदातनधर्मविजयवैजयन्तिका-खेलालोलानिलबालातिलीलालालितोत्तालितोल्लोलकल्लोलकुल्कुल्कलालापवाचालवीचीमालाजालशीलि-तक्षालितसागरकूलानुकूलपरिखापरिवृता मेरुमन्दरहिमधरमाहेन्द्रविन्ध्याद्रिसह्याद्रिप्रमुखनैक-कन्दरिवृन्ददेवमन्दिरसुन्दरनानाकन्दरशिखरसन्दोहबन्धुरा अमरावतीयशःपटलपटभेदनपटुतरासंख्य-पुटभेदनसुषुमाशालिनी विविधकुटीरधामारामस्तोमरमणीयापरिमितग्रामग्रामाभिरामा अगणितवनोपवनप्रवृद्धफलपुष्पसमृद्धकुन्द-मन्दार-माकन्द-श्रीगन्ध-पिचुमन्द-नन्द्यावर्त-कुरविन्द-बन्धूक-हरिचन्दन-श्रीचन्दन-कर्कन्धू-स्यन्दन-कन्दराल-किंशुक-कोविदार-कपित्थ-अश्वत्थ-तिन्त्रिणी-प्लक्षादिलक्षलक्षवृक्षराशिलक्षितवक्षःस्थला मालती-माधवी-शेवन्तिका-शेफालिका-चम्पक-जाजि-कमल-कल्हार-कुरबक-केसरमल्लीप्रभृतिवल्लीमतल्लीवेल्लितमञ्जुलताकुञ्जाग्रसम्फुल्लसुरभिसुमसन्दोहस्यन्दमानामन्द-मकरन्दबिन्दुपानमुदितमिलिन्दवृन्दसानन्दाङ्गीक्रियमाणसंगीतभङ्गीमञ्जुलगीतगुञ्जारवररञ्जितरसिकपान्थपुञ्जा गङ्गा-गोदावरी-गण्डकी-गोमती-यमुना-नर्मदा-कृष्णा-कावेरीप्रमुखपुण्यपयस्विनीपाथःप्रवाहतरल-तरङ्गसंघाप्लावितपाविताप्यायितक्षेत्रसार्थप्ररूढप्रभूतधान्यराशिसंतृप्तजानपदपौरजननिबिडा संस्कृतभाषा-परिपोषितप्रसूतबहुभाषाभाषिमानुषकोटिसमध्युषिता आसेतुशीताचलप्रसृतविशालदेशावकाशविकसित-वैदिकसंस्कृतिसुवर्णसूत्रसन्दानितविविधधर्मसम्प्रदायाचारविचारप्रचुरनानाजातिमतानुसारिभिन्नभिन्नमनुज-कुलाधिष्ठिता विश्वमानवताभावैक्यस्नेहसामरस्यजातीयसौहार्दधर्मसहिष्णुतासहजीवनमिथो-मैत्र्यादिसद्गुणबीजभूमिः सकलाविकलकलाकलापकलममञ्जरीकेदारायमाणा पत्तनपल्लीवितायमानहोमधूमस्तोमामोदामोदमेदुरसुमनःसमुदयमनःसमुद्यद्दयासौमनस्यनिसृष्टसुवृष्टिफलित-

सस्यसमृद्धिप्रशस्या सर्वलोकनमस्या नरकुलतपस्यापचेलिमफलायमाना धरादेवीकन्धरसुन्दरहारिहीरहारायमाणा च शोशुभीति भारतवसुन्धरा विश्वज्ञानोपदेशधुरंधरा।

**सर्वेऽपि देवा ननु पूर्वदेवा महर्षयोऽपूर्वमहीसुदेवाः।**
**प्रजज्ञिरे यत्र निजां जनिं च विजज्ञिरे सार्थकतामुपेताम् ॥३४॥**

**वितानानां वितानानि वितन्वन्तो नराः पुरा ।**
**सुरतां सुरतन्वङ्गीसुरतं चापुरन्विताः ॥ ३५ ॥**

**निष्कारुण्यजघन्यदुष्कृतिकरव्रात्याग्र्यदैत्यावली-**
**दुर्दात्यूहसमूहभूरिभरतो भ्रश्यद्भिनश्यद्भुवः ।**
**नित्यापत्तिनिवारणाय हरिणा सर्वावतारा अपि**
**यत्रान्यत्र न कुत्रचिद्भगवता प्रेम्णा कृता नो धृताः।।३६।।**

**यद्गोत्रोत्तरसद्गोत्रपुत्रीमुदवहच्छिवः ।**
**सगोत्रामपि यत्स्नेहात् कालीं शैलीमुमामपि।।३७।।**

यत्र च सन्ति वसन्ति विलसन्ति सन्तो महान्तः अधीतब्रह्माणः अधिगतब्रह्माणः ब्रह्मर्षिसब्रह्मचारिणः ब्रह्माणीस्वयंवृतवरा विद्वत्प्रवराश्च ब्राह्मणाः, राजन्ते प्राणान्पणीकृत्य तृणीकृत्य च क्षतात् नृणां परित्राणं कुर्वाणाः खलकुलकाननकृपाकृपणकृपाणाः विहिंसितनृशंसा क्षत्रियावतंसाः, भ्राजन्ते च नैपुण्यनिर्वर्तितवाणिज्यव्यापारोपार्जितप्रभूतसंपद्भिलोपितकौबेरावलेपाः परोपकारार्थं वितीर्णसर्वार्थाः निःस्वार्थास्साधितपुमर्थाः सर्वसमर्थाः सार्थवाहसार्थाः, भासन्ते च परिश्रमसेवाभावकृषिकर्मादिविद्रावित देशोन्निद्रदारिद्र्याः गुणसमुद्रा विनयमुद्राश्च कृषीवलाः समाराधितरुद्राः।

**कष्टाकृष्टिविमर्दितातिमृदुलक्षेत्रोप्तसंवर्धितो-**
**द्यत्सस्योदितधान्यजातजगतीकुक्षिम्भराः श्रीकराः ।**
**शश्वद्भूरिपरिश्रमोद्गतबहुस्वेदार्द्रकेदारकाः**
**यत्रालस्यविवर्जिता हि जनताहृद्धर्षकाः कर्षकाः॥ ३८ ॥**

**अर्चासुन्दरदेवमन्दिरमठप्राकारकाभ्रङ्कषा-**
**ट्टालीगोपुरभर्म्यहर्म्यपटलीनिर्माणकर्मोद्धुराः ।**
**आकल्पस्थिरशिल्पकल्पनकलानल्पाच्छवास्तुक्रिया-**
**वास्तोष्पत्युपमा हि जक्कणजितो यत्रासते शिल्पिनः ॥ ३९ ॥**

**वीणावेणुमृदङ्गवादनकलावैदग्ध्यविद्योतिताः**
**शृङ्गारादिरसोत्तरङ्गलयवत्सङ्गीतपारङ्गताः ।**
**चञ्चच्चारुविचित्रचित्ररचनाचातुर्यधुर्या नराः**
**यत्रैवाऽप्रतिमल्लमल्लनृमतल्ला उल्लसन्त्यन्वहम्॥ ४० ॥**

यत्र च श्रिय इव उल्लसच्छ्रियः, शारदा इव विशारदाः, आर्या इव आर्याः, अनसूया इव अनसूयाः, अरुन्धत्य इव पतीननुरुन्धत्यः, पाञ्चालिका इव विजयोत्साहवर्धिन्यः, जनकतनया इव रामाभिरामाः, अहल्या इव सौन्दर्याकर्षितसहस्रलोचनाः, सुरभय इव सन्तर्पितकामाः, वनदेवता इव जनितामोदाः, रतिरूपिण्यः सतीगुणिन्यः, मैत्रेयीमनीषीण्यः सतीशिरोमण्यः मङ्गलस्वरूपिण्यः अगण्या अंगनाः पुण्यदेवीभूता आनन्दसन्दायिका नन्दनीकुर्वन्ति अवनीतलमपि।

पुरुषा अपि यत्र अपरुषा अपरुषस्वभावाः, स्वभावानुभावप्रभावावर्जितसुहृन्मण्डलाः, परोपकारपरायणाः धनधान्यादिदानदत्तदीक्षाः शमदमदयादाक्ष्यदाक्षिण्याद्यगण्यपुण्यगुणमण्याभरणायिताः श्रीरामा इव भरतानुरागिणः, श्रीकृष्णा इव सत्यालापतत्पराः, भीमादिपाण्डुनन्दना इव धर्मानुसारणबद्धदीक्षाः, श्रीकण्ठा इव शिरसादृतकलाधराः , काव्यकलापा इव सद्वृत्तशोभिताः, सुरलोका इव प्रशान्तसुमनसः, माण्डव्यकथा इव यमनियमसन्तताः, याज्ञिकविधय इव शान्तिप्रधानाः, करिकलभा इव दानवर्षिणः, ब्रह्मशरीरा इव सत्वोद्रेकविभाविताः, प्रकृत्या सम्भाविताः सनातनसंस्कृतसंस्कृतिप्रभाविताः प्रभासन्ते।

## कर्नाटकदेशवर्णनम्

तस्याश्च कर्मभूमिरिति प्रथिमानं धर्मभूमिरिति महिमानमनुपमानमेव संमानं च समासादितवत्या भगवत्या भारतक्षित्या अत्युज्ज्वलकर्णकुण्डलमण्डलतामुपयाति अखण्डमिदं कर्णाटकमहीमण्डलं यद्वैभवसमुपवर्णने चक्षुष्कर्णकुलचक्रवर्त्यपि न प्रभुः प्रभवति। अङ्घ्र्यादिशृङ्गोत्तमाङ्गपर्यन्तं यदङ्गाङ्गणमङ्गलभूभागमाप्लावयन्ति पावयन्ति च तुङ्गादितरङ्गिण्यः त्वङ्गत्तुङ्गतरङ्गभङ्गैः कृतदुरितभङ्गैः। कलिकालकलितकल्मषकूटविपाटनपटुतरकृपाणीविविधवेणीप्रवाहपाथःपूरपूरितक्षोणीकोणीकोणीसंवर्धितधान्यद्रोणीश्रेणीसन्तर्पितसर्वप्राणिगणसंकुला कृष्णवेणी चास्य कर्णाटदेशस्य हृदयालवालप्रेमपीयूषरस्यरसायमानरसा आसह्यशैलमूलं श्रीशैलशैलशिखरं यावदाह्लादयति यावज्जनान् कृतमज्जनान्कलितपयःपानांश्च। आप्याययति कूलानुकूलसञ्चरणचञ्चुरचञ्चलचरणान्पशुगणान्। आमोदयति च सामोदतटपुटावटपटतरनटायमानवातविधुतविकटविशङ्कटविटपपटलपटपटायमानविविधविटपिकोटि-कोटीरकोटिसमाटीकमानविहङ्गसङ्घम्।

एवं सवेगसलिलौघप्रवाहव्यूहपातावघातविदारितसह्यकन्दरिदरीदृश्यमानदरीकन्दरोदरसुन्दरायाः शरवेगवत्याः शरावत्या जोगादिजलपातसमुत्पादितविद्युज्ज्वालोद्दीपितदीप्रदीपनिकुरम्बैः प्रतिग्रामारामं प्रतिमठमन्दिरं प्रतिवर्त्मचत्वरं प्रतिविपणिवीथीवितर्दिकावलभीविटङ्काङ्गणं च चञ्चच्चारुचन्द्रशावकैरिव अवतारितैः जगदण्डमण्डलमखिलमेव शरज्ज्योत्स्नाजालजठालमिव हारनीहारहारिहराट्टहासभाभासितमिव स्वयंप्रकाशासङ्ख्यज्योतिष्टोमप्रसृमरप्रकाशपुञ्जपिञ्जरितमिव च समाकलयन्ति यत्रत्याः विज्ञानविद्याप्रज्ञानिनः। यत्र च प्रवहन्तीव अगस्त्यमुनितपःपरम्परा दक्षिणदेशपुण्यसम्पदिव पयोरूपेण क्षरन्ती कवेरकुलकीर्तिपताकेव दोधूयमाना कलिकालकलितकृच्छ्रकलुषकदम्बकरालकरवालायित-कीलालधाराधरा कावेरी कुशलकर्मिनिर्मितसहस्राधिककुल्या नालीजाल-

जलार्द्रीकृतकेदारकलममञ्जरीजरीजृम्भमाणा राष्ट्रस्य धान्यकोषं करोति सदा समृद्धिसमेधितम्। एवमेव मनुजकुलमलोन्मूलनकलाकुशला मलापहा, पापघटाविघटनपटीयसी घटप्रभा, जलतरङ्गशीकरासारार्द्रीकृतक्षेत्रमृदुमृद्वती कुमुद्वती, पिपासितपशुपक्षिपुरुषवारिवरदा वरदा अन्याश्च पुण्यपयोधन्याः मानवलोकमान्याः सत्कविकविता इव रसोत्कर्षशालिन्यः, वनिता इव चञ्चच्चारुपयोधराः, महात्ममनोवृत्तय इव विमलाशयाः, साधुपुरुषप्रवृत्तय इव गाम्भीर्यगहनाः, वेदर्भीरीतय इव प्रसादभूयिष्ठाः, अम्बिकावतारा इव गिरीशधृतजनुषः, हरतनव इव लसद्विषधराः, मोहिनीलीला इव स्वाश्रितामृतवितरणनिपुणाः, यात्रिका इव नैकक्षेत्रानुधाविन्यः, पीठाधिपतियतिचर्या इव तीर्थपावितनैकलोकाः, अभङ्गा अपि भङ्गान्विताः, जडात्मानोऽपि सरसाः, पङ्काढ्या अपि पावना, अनुकूलप्रवाहा अपि प्रतिकूलप्रवाहाः, दशावतारकथा इव मत्स्यकूर्मादिलीलाभासुराः, स्वादिष्ठपयःपूरपरीताः शुक्तिशङ्खपुलिनवेतसादिवितानभरिताः, नैका एव सरितः रसार्द्रतामापादयन्ति कर्णाटकभूमातुरन्तरङ्गम्।

यत्र गोकर्ण-श्रीशैल-हरिहरेश्वर-शृङ्गेरी-रम्भापुरी-पम्पादिपरमेश्वरदिव्यसन्निधिसन्निधिसन्नुतानि शताधिकान्येव शैवक्षेत्राणि, उडुपि-सुब्रह्मण्य-शूर्पालय-तोरवी-गदग-बेलूरु-मेलुकोटि-श्रीरङ्गपट्टण-कनकगिरि-वेङ्कटाचलादीनि च भगवतः खगकेतनस्य निगमागमोक्तागणितस्वरूप प्रतिरूपप्रतिष्ठानसविशेषसन्निधानशोभीनि वैष्णवक्षेत्राणि, मन्त्रालय-मेलुकोटि-शृङ्गेरी-धर्मस्थल-श्रीशैलप्रभृतीनि गुरुस्थानानि च अखिलभारतभूभागसम्भूतसकलभक्तभावुकयात्रिकलोकानामत्यादरपात्राणि यात्राक्षेत्राणि विलसन्ति। बदामि-हलेबीडु-हम्पी-ऐहोळी-पट्टदकल्लु-गदग-लक्कुंडि-मैसूरु-बेलूरप्रभृतिपट्टणग्रामेषु कर्णाटकप्रान्तीयैः वास्तुविद्याविदग्धैः मूर्तिशिल्पकलाकुशलैः स्थपतिभिः चित्रकारैः तक्षकैश्च निर्मितानि सूक्ष्मातिसूक्ष्माणि महामहन्ति च प्रस्तरखण्डविस्तारितवास्तुशिल्पानि, बृहच्छैलखण्डस्य अखण्डैकगण्डशिलायामुत्कीर्णाः कौशल्यपूर्णाः दिव्यभव्या गुहाः, अतिसुन्दराणि देवमन्दिराणि, सौन्दर्येण अप्रतिमाः प्रतिमाः, स्फुरच्चैतन्यस्फूर्तय इव देवतामूर्तयः, आश्चर्यस्तम्भितप्रेक्षककदम्बाः, स्पर्शनक्षण एव समुदञ्चत्सप्तस्वरारम्भाः उत्तम्भितस्तम्बेरममुस्ताविडम्बा विचित्रस्तम्भाः, सञ्चुम्बितसुरपुरपुरन्ध्रिकापादनूपुरा गोपुराः चित्रविचित्राणि शैलशिलोट्टङ्कितानि दक्षिणोत्तरशिल्पशैलीकौशलीसमुन्मीलितचञ्चत्पाञ्चालिकाविविधभावभङ्गीहृदयंग-मदृश्यचित्राणि, रामपादमहिमानीव जीवभावापादितपाषाणानि,पशुपतिचरितानीव शैलबालिकाहावभावभरितानि, नन्दनवनानीव अम्लानकुसुमोपशोभितानि, सुरलोकसंस्थानानीव अमरशिल्पसमुल्लसितानि, गगनमण्डलानीव चन्द्रार्कस्थायीनि, देवेन्द्रस्थानानीव जीवकलाप्रशस्तानि, टङ्कोद्भासितान्यपि विटकोद्भासितानि, भिन्नान्यपि पूर्णानि, सूक्ष्माण्यपि महत्वभाञ्जि, पङ्कजवनानीव सहस्रकरोन्मीलितानि, राकाशशिबिम्बानीव संपूर्णविकसितकलानि अविकलानि सकलान्यपि कलाकौशल्यपराकाष्ठोपस्पृष्टवास्तुकृत्यशिल्पानि मोदयन्ति

प्रेक्षकान्, विस्मापयन्ति विमर्शकान्, सहस्रशश्च आकर्षयन्ति वैदेशिकरसिकान्, संप्रीणयन्ति यात्रिकान्, रोमाञ्चयन्ति शिल्पशास्त्रविचक्षणान्, उन्नमयन्ति च कर्णाटकमातुः प्रतिष्ठाशिरःकिरीटम्।

कीर्त्या विश्वकर्णाटेऽस्मिन्नेव कर्णाटके हन्त अनन्ता एव सन्तो महान्तो धीमन्तः सन्ति समुल्लसन्ति स्म च मताचार्या वसिष्ठ इव वशिष्ठाः, विश्वामित्रा इव विश्वमित्राः, शक्तय इव प्रसादितशक्तयः, कश्यपा इव काश्यपीभूषणभूता, बोधायना इव बोधायनतामहिताः, सुयज्ञा इव सुयज्ञाः, अत्रय इव अनसूयान्तरङ्गप्रतिष्ठिताः सन्ततानुष्ठितजपतपोऽनुष्ठानपरिपूतात्मानो महात्मानः।

**यत्राचार्यकुलार्यतामुपगता अध्वर्युतां योगिनां**
**विद्वन्मण्डलवर्यतामपि तपःस्वाध्यायिनां धुर्यताम् ।**
**प्राथम्यं प्रमथेषु चाप्य विगतौपम्याः प्रणम्याः क्षितौ**
**श्रीमद्रेणुकपूज्यपादमहिताचार्या अभूवन्पुरा।।४१।।**

**शिवाप्रियत्वमापन्ना अपि सर्वज्ञमूर्त्ययः ।**
**शङ्करा अपि ये नोग्रा निष्कलङ्काः कलाधराः।।४२।।**

**समुद्धृतगिरीशाना ये सदानन्दिनोऽमलाः।**
**विभूतिभासिताङ्गाश्च साक्षाच्छ्रीवृषभर्षभाः।।43।।**

## शङ्कराचार्यवर्णनम्

एवं यमेव कर्णाटप्रदेशं स्वकार्यक्षेत्रं विधाय सकललोकशिवंकरा बौद्धवादभयङ्कराः खण्डितनास्तिकाहङ्कारा ओङ्कारा इव सर्ववेदार्थप्रतिपादकाः, शिवधनुष्टङ्कारा इव दक्षविपक्षविदलनदीक्षिता, नागा इव उज्झितभोगाः, कण्ठालङ्कारा इव मुक्ताहारोल्लसिताः, कलमाङ्कुरा इव भारतक्षेत्रसमृद्धसम्पद्भूताः, कुबेरकिङ्करा इव विभूतिभासुराः, श्वेतवराहा इव सर्वगोत्रोद्धारकाः, कैलासपर्वत इव शिरसाधृतादृतशङ्कराः, साक्षाच्छङ्करावतारत्वेन प्रथिताः शङ्कराचार्या अपि समग्रभारत एव अतिप्रवृद्धं प्रसिद्धं च बौद्धमतमुद्ध्वस्य उद्दध्रुः वेदोक्तं शुद्धतरमध्वानमद्धा विद्वद्धौरेयाः।

**द्विजन्मनां मूर्धसु पावकाः शिखा होमीयकुण्डेषु च पावकाः शिखाः।**

**सद्ब्रह्मसूत्राणि भुजेषु विप्रमुखेषु सुस्थानि च यन्महिम्ना।।४४ ।।**

त एते पाखण्डादिचण्डदुर्मतषण्डखण्डनपण्डिता मण्डनमिश्रादिमीमांसापण्डितवेतण्डमण्डल-मतगण्डभेदनप्रचण्डपुण्डरीकाः मुण्डिकुलाखण्डलाः वैदिकजनहृत्पुण्डरीकविकासकचण्डमयूखायमानाः श्रीमच्छङ्करभगवत्पादाः केरळदेशधृतजन्मानोऽपि कर्णाटकदेशस्य महतीं महतीं निध्याय अत्रत्यामेव तुङ्गोत्तुङ्गोत्तरङ्गसङ्घातसङ्घातसंघातिताघसंघां शृङ्गेरीं स्वतपोभूमिं कार्यक्षेत्रं च विधाय महासंस्थानं च संस्थाप्य इत एव सर्वसर्वंसहायां स्वाद्वैतमतं प्रसारयामासुः।

## रामानुजाचार्यवर्णनम्

तथैव च श्रीमद्रामचरणाब्जषट्चरणाः सदाचरणशास्त्रप्रचारणदेवपादपरिचरणपरायणाः श्रीरामानुजाख्याः शिष्टविशिष्टपण्डितश्रेष्ठसमभिष्टुताः सर्वजातिजनाङ्गसमुद्धारबद्धादराः विशिष्टाद्वैतमतसंप्रदायप्रवर्तकाचार्यपादाः देशान्तरगृहीतजनुषोऽपि कर्णाटकमातुः हृदयस्थानायमानं मेलुकोटिक्षेत्रमुपागत्य चिरतरमध्युष्य राजाश्रयमधिगत्य जनानुरागमासाद्य च श्रीवैष्णवसिद्धान्तं भारतभुवः कोणे कोणे प्रसारयामासुः।

## मध्वाचार्यवर्णनम्

तथैव श्रीमध्वमुनिनामानः भेदसिद्धान्तप्रसारणबद्धादराः विद्वद्धौरेयाः सुप्रसिद्धाः सिद्धपुरुषाः परशुरामक्षेत्रम् इति प्रथिमानमुपगते कर्णाटकभूमातुः कर्णकुण्डलायमाने उडुपीमण्डले मध्यगेहनामकगृहस्थलब्धजन्मानः सर्वत्रापि प्रसारयामासुः द्वैतदर्शनम्।

एवं जैनादिनास्तिकमतान्यपि कर्णाटके लब्धप्रसाराणि अत्रत्यैरेव सकलशास्त्रपारदृश्वभिः विमतीयपण्डितमेघमण्डलविखण्डनविवासनोद्दण्डचण्डमातरिश्वभिः पण्डावत्पुण्डरीकैः विहितसर्वंकषसंस्कृतप्राकृतग्रंथरत्नैः सार्वत्रिकप्रसारं सार्वकालिकं प्रचारं च समुपेत्य दृढमूलानि संबभूवुः।

## वीरशैवाचार्यवर्णनम्

मुख्यतः परशिवपरमप्रसादासादनप्रधानसाधनानि, सर्वजातिजनोद्धारैकोद्देशानि, अतुल्यमपि कैवल्यं जनसाकल्यगोचरं सारल्येनैव संसाधयन्ति, प्रतिजीवं शिवभावं विकासयन्ति, भक्तिभागीरथीं प्रतिशरणहृदयक्षेत्रमवतारयन्ति आपामरामरं सर्वानपि संसारसागरात्तारयन्ति, विश्वमानवधर्मव्यपदेशार्हतैकमात्रभाजनानि, रेणुकादिप्रमथगणाधीश्वरसंमान्यसंमतिसौभाग्यधन्यानि, शुद्धानवद्यनिष्कृष्टसिद्धान्तशब्दैकतमलक्ष्याणि साक्षात्कृतपरमेश्वरमहापुरुषपरिष्कृतानि निगमागमानुमतानि विवेकिपूर्वपुरुषसार्थानुसृतानि अत्रैव कर्णाटकभूखण्डे प्रसारं प्रचारं प्रतिष्ठां प्रशस्तिं प्राधान्यं प्राबल्यं प्राचुर्यं च स्वयमनुप्राप्य अनादिकालत आरभ्य अद्य यावत्प्रसरन्ति श्रीरेणुकादिप्रवर्तितानि वीरशैवादिप्रमुखसन्मतानि। एवमशेषगुणविशेषविशिष्टे महतो महिष्ठे महीयसां प्रेष्टे तेजीयसां प्रेष्ठे साधीयसां प्रकोष्ठे सकलकलाकामगवीगोष्ठे देशश्रेष्ठे कर्णाटके षट्शतवत्सरेभ्यः पूर्वं उपहसितहस्तिनावती विविधधनधन्यमण्यादि व्यापारपरीवर्तसरीसरत्सम्पज्झरीपरीभावपरीतसुरपुरी जरीजृम्भते स्म नगरी गरीयसी विजयनगरनाम्नी राजधानी।

।। श्रीरस्तु ।।

**महाकवि मण्डिकल् रामशास्त्रिप्रणीतः मेघप्रतिसन्देशः**

स्वोपज्ञव्याख्योपेतः

प्रथमः सर्गः

**यक्षेणैवं विरहविधुरेणार्थितस्तोयवाहः।**
**तीर्त्वा मार्गान् सरयमलकामेत्य वात्यारथेन ।।**
**तत्प्रेयस्यै प्रियनिगदितं सर्वमप्याचचक्षे।**
**लोके सन्तो न हि खलु परप्रार्थनां व्यर्थयन्ति ।। 1 ।।**

- व्याख्यानप्रारम्भः -

सकलागमसन्दोहस्वर्णसम्पुटमौक्तिकम्।
गिरजामातरं नत्वा गिरिजामातरं नुमः ।।
कृतनवरसावतारं परमात्मानं प्रणम्य कुतुकेन।
मेघप्रतिसन्देशव्याख्यामाख्यामि भावबोधाख्याम् ।।
रसिकजनरञ्जनार्थं निजहृदयार्थप्रकाशनार्थं च।
मेंघप्रतिसन्देशं स्वकृतं विवृणोमि सरससन्दर्भैः ।।

इहखलु मण्डिकल् रामशास्त्रिशर्मा सरसकविः गुरुमुखादवगतं सकलकलाकलापं सहृदयहृदयाह्लादनेन सफलयन् मेघप्रतिसन्देशाख्यं काव्यं चिकीर्षुः "काव्यालापांश्च वर्जयेत्" इति निषेधस्यासत्काव्यपरतामवगमयन् स्वचिकीर्षितस्य निर्विघ्नपरिसमाप्तये मङ्गलमारचय्य शिष्टाचारमनुपालयंश्च प्रबन्धमुखे आशीराद्यन्यतमं वस्तु निर्दिशति**- यक्षेणेति** ।।

विरहविधुरेण स्वकान्तावियोगविह्वलेन यक्षेण मेघसन्देशकथानायकत्वेन कालिदासमहाकविनिर्दिष्टेन वक्ष्यमाणचित्रग्रीवनाम्ना केनचिद्यक्षयूना कर्त्रा, एवमर्थितः "गन्तव्याते वसतिरलका नाम यक्षेश्वराणां" "सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य" "मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं" "किञ्चिद्व्रज लघुगतिर्भूय एवोत्तरेण" "तां जानीथाः परिमितकथां जीवितं मे द्वितीयं" "वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथाः" "साभिज्ञानं प्रहितकुशलैस्तद्वचोभिर्ममापि" प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः" इत्यादिप्रकारेण प्रार्थितस्तोयवाहो मेघः, तोयवाह इत्यार्द्रस्वभावद्योतनाभिप्रायकं विशेष्यम्। अत एव परिकराङ्कुरालङ्कारः "साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः" इति तल्लक्षणात्। वातानां समूहो वात्या, पाशादिभ्यो य इति यप्रत्ययः। सैव रथः, तेन मेघानां वायुनेयत्वात् रथत्वारोपः। सरयं सवेगम्, अलकामेत्य अलकापुरीं प्राप्य, तस्य यक्षस्य या प्रेयसी वक्ष्यमाणरत्नमालाख्या तस्यै, प्रियेण तन्नाथेन यक्षेण यन्निगदितं

संदिष्टं वचनं तत्सर्वमपि समस्तमपि, अपिस्समुच्चये। एवञ्च "नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे तत्कल्याणि त्वमपि नितरां मागमः कातरत्वं" "शेषान् मासान् गमय चतुरो लोचने मीलयित्वा" "एतस्मान्मां कुशलिनमभिज्ञानदानात् विदित्वा" "मा कौलीनादसितनयने मय्यविश्वाशिनी भूः" इत्यादिसन्देशजालं सकलमपि आचचक्षे कथयांचक्रे। अत्र कविरर्थान्तरं न्यस्यति- **लोक इति**। लोकेस्मिन् परस्परसहायसंवर्धिते प्रपञ्चे सन्तस्सज्जनाः परेषामसहायितामर्थिनां प्रार्थनां याचनां न व्यर्थयन्ति न निष्फलयन्ति, किन्तु सफलयन्त्येवेति साधर्म्ये पर्यवसानम्। सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासोऽलङ्कारः, "उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः" इति तल्लक्षणात्। तेन च ये परप्रार्थनां न व्यर्थयन्ति ते एव सज्जना इति ज्ञेयं इत्यवगम्यते। एवं चात्र स्वप्रियाविरहदुःखितेन यक्षेण प्रार्थितो मेघराजः श्वसनानुनीयमानो मार्गानतीत्यालकामेत्य तत्प्रियतमायै प्रियोक्तमावेदयामासेति प्रकृतवस्तुनिर्देशेन सीताविरहतप्तेन श्रीरामेण प्रार्थितो हनूमान् वायुसहायेन लङ्कामासाद्य सीतायै रामोदितमखिलं सन्देशमाचचक्ष इत्यर्थान्तरमपि व्यज्यते। अत्र रसभावालङ्कारगुणदोषादिविशेषास्तु सुधीभिरुन्नेयाः। अस्मिन् ग्रन्थे मन्दाक्रान्तावृत्तम्। "मन्दाक्रान्ता जलधिषडगैः मोभनौ तौ गुरू चेत्" इति लक्षणात् ।। 1 ।।

**कान्तोदन्ते श्रवणपतिते सम्भ्रमस्फारिताक्षी।**
**यक्षी साक्षात्प्रियमुपनतं मन्यमाना क्षणार्धे ।।**
**स्मृत्वा शापं नखमणिमुखैर्बाष्पमुन्मार्जयन्ती।**
**प्रेयोदूतं पवनचलितं वारिवाहं ददर्श ।। 2 ।।**

- व्याख्या -

अथ तद्यक्षप्रियावृत्तान्तमाह- **कान्तेति**। कान्तस्य स्वप्राणनाथस्य, वृत्तान्ते प्रवृत्तौ श्रवणपतिते श्रुतमात्रे सति, सम्भ्रमेण त्वराविशेषेण, स्फारिते विशालीकृते अक्षिणी नयने यस्यास्तादृशी, एतेनादरातिशयो व्यज्यते, अक्ष्णोः स्वाङ्गवाचित्वात् स्वाङ्गात् षजिति षच्प्रत्ययः। षिद्गौरादिभ्यश्चेति ङीष्। यक्षस्य स्त्री यक्षी कर्त्री, पुंयोगादाख्यायामिति ङीप्, प्रियं प्राणनाथं साक्षादभिमुखमुपनतमायातं मन्यमाना जानती, "कान्तोदन्तस्सुहृदुपनतस्सङ्गमात्किञ्चिदूनः" इति न्यायादिति भावः। एवञ्च कान्तोदन्तश्रवणमात्रादेव क्षणं तद्दर्शनजनितानन्दावस्थामनुभवन्ती सतीति यावत् । क्षणार्धे तादृशावस्थानुभवाव्यवहितक्षणार्धे, शापं वैश्रवणदत्तं स्मृत्वा मनसि समालोच्य नखमणिमुखैः स्वसौन्दर्यानुरूपरत्नसदृशनखाग्रैः बाष्पमश्रून्मार्जयन्त्युत्किरन्ती सती शापस्यातिदुःखकरत्वादिति भावः। प्रेयसः प्राणकान्तस्य दूतं वार्ताहरं पवनचलितं वाताहत्या दोलायमानं वारिवाहं मेघं ` अभ्रं मेघो वारिवाह ' इत्यमरः। ददर्श सादरं प्रेक्षाञ्चक्रे। अत्र वारिवाहदर्शने बाष्पोन्मार्जनाक्षिप्तस्य मुखोन्नमनस्य हेतुत्वकल्पनात्काव्यलिङ्गमलङ्कारः। दुःखकाले नखमुखैर्बाष्पोन्मार्जनादेः स्त्रीणां स्वाभाविकत्वात् स्वभावोक्तिश्च, "समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्" "स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य

वर्णनं" इति तत्तल्लक्षणात्। किञ्चात्र आनन्दभावोदयस्य तद्विरुद्धशोकभावोदयस्य च वर्णितत्वाद्भावप्रधानमिदं पद्यम् ।। 2 ।।

**ध्यायंध्यायं किमपि हृदये श्वासमुष्णं सृजन्ती।**
**स्मारंस्मारं प्रियबहुमतिं सम्मदाश्रु क्षिपन्ती ।।**
**चिन्ताधीनं सपदि हृदयं किञ्चिदाश्वासयन्ती।**
**भूयो भूयः कुशलमबला भावयामास भर्तुः ।। 3 ।।**

- व्याख्या -

अनन्तरवृत्तान्तमाह- **ध्यायं ध्यायमिति**। अबला किमपि कर्तुमसमर्था यक्षवधूः, हृदये स्वमनसि किमप्यनिर्वचनीयं दैविकं मानुषं च परिभवादिकं ध्यात्वा ध्यात्वा ध्यायंध्यायम्, आभीक्ष्ण्ये णमुल्, उष्णं श्वासं सृजन्त्युत्सृजन्ती सती पूर्वदुःखस्मरणादिति भावः, प्रियस्य बहुमतिं सन्देशप्रेषणरूपां स्मृत्वा स्मृत्वा स्मारं स्मारं, पूर्ववण्णमुल्, सम्मदाश्रु प्रमोदाश्रु क्षिपन्त्युद्गिरन्ती सती प्रियानुरागप्रत्ययादिति भावः। चिन्ताधीनं प्रियः प्रेक्ष्येत वा नवा, जीवति वा नवा इत्यालोचनापरवशं मनः किञ्चिन्मनागाश्वासयन्ती च सती भूयो भूयः पुनः पुनर्भर्तुः स्वजीवितोद्धारकस्य कुशलं क्षेमेणास्तित्वरूपं भावयामास मनसा सन्दध्यौ। कविनापि अत्र सौशब्द्यमौचित्यमर्थगाम्भीर्यञ्च दर्शितमिति ध्येयम् ।। 3 ।।

**उत्तिष्ठन्ती तदनु शनकैः पाणिनालम्ब्य भूमिं।**
**स्रस्तं स्रस्तं कनकवलयं बाहुमूलं नयन्ती ।।**
**भर्तुर्बन्धोरभिमुखमसौ वेश्मवातायनस्था।**
**मन्दं मन्दं मधुरमधुरं प्राञ्जलिर्वाचमूचे ।। 4 ।।**

- व्याख्या -

तदनन्तरवृत्तान्तमाह- **उत्तिष्ठन्तीति**। तदनु प्राणेशास्तित्वनिश्चयानन्तरं असौ यक्षी पाणिना भूमिमालम्ब्य शनकैर्मन्दमुत्तिष्ठन्ती सती विरहजनितदौर्बल्यादिति भावः, स्रस्तंस्रस्तं बाहुमूलात्पुनः पुनश्च्युतं वियोगप्रयुक्तकार्श्यादिति भावः। कनकवलयं बाहोस्स्वभुजस्य मूलं ऊर्ध्वभागं नयन्ती प्रापयन्ती च सती प्रकोष्ठापेक्षया बाहुमूलस्य किञ्चित्स्थूलत्वात् तत्र दृढे लगेदित्याशयेति भावः। भर्तुर्बन्धोः स्वप्राणनाथमित्रस्य, न तु परस्य, मुखमभि अभिमुखम्, अभिरभाग इति कर्मप्रवचनीयत्वं, तत्पुरस्तादिति यावत्। वेश्मवातायनस्था स्वगृहगवाक्षान्तरस्था सती पतिव्रतानाम् अन्यत्र गमनानौचित्यात्। तदुक्तं प्राचीनैः "पदन्यासो गेहाद्बहिरहिफणारोहणसमः निजावासादन्यद्भवनमपरद्वीपतुलितं" इति। प्राञ्जलिर्बद्धाञ्जलिश्च सती, अनेनोपकर्तरि भक्तिभावप्रदर्शनमभिव्यज्यते, मन्दं मन्दं मधुरमधुरं च यथा

तया वाचमूचे महाकुलीनस्त्रीस्वभावानुरूपमुक्तवतीत्यर्थः।। अत्र वर्णानां पदानां पदार्थानां च विप्रलम्भशृङ्गाराभिव्यञ्जकत्वमनुसन्धेयम् ।। 4 ।।

**क्षेमी स्वामीत्यमृतसदृशैरक्षरैः प्रीणयन् मां।**
**तत्सन्देशान् प्रणयमधुरान् कर्णमूले करोषि ।।**
**आयातस्त्वं जलधर मम प्राणदानाय सत्यं।**
**किञ्चिच्छान्तः किल विधिवशादद्य मे पापवेगः** ।। 5 ।।

- व्याख्या -

तदुक्तिप्रकारमेवाह- **क्षेमीति**। हे जलधर! सकललोकजीवनाधार, स्वामी मन्नाथः क्षेमी क्षेमवान् सुखेन वर्तत इत्यमृतसदृशैरक्षरैः मां प्रीणयन् प्रत्यक्षरममृतं स्रावयन्निव मामाप्याययन्नित्यर्थः। प्रणयमधुरान् तत्सन्देशान् समये समागत्य यतः कर्णमूले करोषि मामत्यादरेण श्रावयसि, अतस्त्वं मत्प्राणदानाय मामुज्जीवयितुमेवायातः सत्यम्। अन्यथा मत्प्राणहानिरेव निश्चितेत्यर्थः। अत एव मे विधिवशात् मदीयानुकूलदैवबलादद्य इदानीं मे पापवेगः मदीयदुर्दैवप्रयुक्तक्रूरफलदानशक्तिः किञ्चिच्छान्तः, न तु पापं, सन्देशप्राप्तिमात्रेण सम्पूर्णफलाभावात्, एवञ्च मम प्रसन्नो विधिरेव त्वामानीय त्वन्मुखेन मत्प्रियप्रणयपेशलान् सन्देशान् श्रावयन्मामुज्जीवयतिस्मेति निर्गलितोर्थः ।। 5 ।।

**वाताधूतं व्यजनपवनैर्वीजये किं वृथा त्वाम्।**
**शीतात्मानं शिशिरशिशिरैः स्नापये किं पयोभिः ।।**
**सर्वैश्वर्यप्रभवमतिथिं किं प्रदायार्चये त्वां।**
**पूर्णे दानं भवति हि वृथा वारिदानं यथाब्धौ** ।। 6 ।।

- व्याख्या -

गृहागतमतिथिं वाचा सत्कुर्वाणा प्रशंसति- **वाताधूतमिति**। वातेन वायुना आधूतं समन्ततोप्याहन्यमानं वाताधारमिति यावत्। एतादृशं त्वां किं किमिति वृथा व्यजनपवनैर्वीजये, गृहागतस्यातिथेः प्रथमं व्यजनपवनोपचारः समुचितोपि त्वयि विषये स निरर्थक इति भावः। किञ्च शीतात्मानं जलदं जलधरं जलमयञ्च, जलमयत्वमस्य कालिदासमहाकविनैव प्रदर्शितम् "धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः" इति। एतादृशं त्वां शिशिरशिशिरैरत्यन्तशीतलैः, नित्यार्थे द्विर्भावः, पयोभिः किं किमिति स्नापये, तव तृप्तिकरत्वाभावात् तदपि व्यर्थमेवेत्यर्थः। तथापि यत्किञ्चिदर्थदानेन सन्तोष्यतामतिथिरिति चेत् तदपि न सङ्घटत इत्याह- **सर्वेति**। सर्वैश्वर्यप्रभवं सर्वेषां समस्तानां ऐश्वर्याणां भोज्यजातानां प्रभवमुत्पत्तिस्थानं मूलकारणमितियावत्। अयमेवार्थः कविना द्वितीयसर्गे प्रदर्शितः "त्वन्मूलं हि प्रविततमिदं सर्वसौभाग्यमुर्व्यां" इति। एवञ्च त्वदभावे जगत्यैश्वर्यकथापि

लुप्येत। एतादृशमतिथिं त्वां किं वस्तु प्रदायार्चये सन्तोषये, न किञ्चिदपि, सर्वेषां त्वमेव दातासि, त्वद्दत्तस्य तवैव समर्पणमित्यनुचितं, तदतिरिक्तं न किञ्चिदस्ति, अतः किमपि प्रदाय त्वामर्चितुमप्यशक्तास्मीति भावः। अथवा त्वयि यत्किञ्चिद्दत्तमपि निष्फलमेवेत्याह- **पूर्णेति**। पूर्णे जलसम्पूर्णे त्वयि धनसम्पूर्णे जने च, दीयत इति दानं, दत्तमिति यावत्। कर्मणि ल्युट्, पूर्णे समुद्रे दत्तं यत्किञ्चिज्जलमिव वृथा व्यर्थं भवति, अगणनीयत्वादनुपकारित्वाच्चेति भावः। एवञ्च देयं चेत् दरिद्रायैव, न सम्पूर्णायेति निर्गलितोर्थः ।। अत्र मेघस्य विशेषस्य समृद्धजनरूपस्य सामान्यस्य पुनरब्धिरूपस्य विशेषस्य च अर्थान्तरन्यास सरण्या निबद्धत्वात् विकस्वरालङ्कारः, `यस्मिन् विशेषसामान्यविशेषास्स विकस्वर' इति तल्लक्षणात् ।। 6 ।।

**धूमाकारस्त्वमिति हृदये नावजाने भवन्तं।**
**दैवीं शक्तिं भवति फलदां भावयित्वार्थये त्वाम् ।।**
**तस्याश्शक्तेः क्वचिदपि दृढा भावना सिद्धिहेतुः।**
**तस्माद्युक्ता भुवि बहुमतिश्चेतनेऽचेतने वा ।। 7 ।।**

- व्याख्या -

अथ द्वाभ्यां मेघमभिमुखीकर्तुं प्रशंसति- **धूमेति**। हे जलधरेति शेषः। त्वं धूमाकारः धूमस्वरूपः धूमसदृशो वा, अचेतनत्वादुपेक्षणीय इति यावत्, इति भवन्तं त्वां नावजाने नापमानयामि, किंतु महान् माननीयः पदार्थ इति बहुमन्ये एवेत्यर्थः। कुतस्तदित्याह- **दैवीमिति**। भवत्यधिष्ठानरूपे त्वयि विद्यमानां भवदधिष्ठात्रीमिति यावत्। देवस्येमां दैवीं, तस्येदमित्यण्, टिड्ढाणेत्यादिना ङीप्। शक्तिमात्मकलां फलदामभीप्सितार्थदानदक्षां सतीं भावयित्वा मनस्यनुसन्धाय, त्वां आत्मचैतन्यविशिष्टाधिष्ठानरूपं भवन्तमर्थये, किञ्चिद्याचये। किमर्थमेतदित्यत आह- **तस्या इति**। तस्याः शक्तेस्तादृग्भगवत्कलायाः क्वचिदपि मनुजपशुशिलादारुमृत्तिकालोहप्रतिमादिष्वपि दृढा भावना, अयमेवास्मदभिमतो देव इत्यविच्छिन्नप्रत्ययः सिद्धिहेतुरिष्टार्थप्राप्तिकारणं भवतीत्यर्थः।

प्रोच्यतेचाग्नेये-

अग्नौ क्रियावतां देवः रवौ देवो मनीषिणाम्।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ।। इति।

तस्माद्भावनायाः फलहेतुत्वात् भुव्यस्मिन् लोके चेतने मनुष्यादिप्राणिनि वा अचेतने शिलादारुलोष्ठादौ वा बहुमतिः पूज्यत्वसम्भावना युक्ता समुचिता, सर्वस्याप्यात्मचैतन्याधिष्ठितत्वादिति भावः। तथा च अचेतनोयं मेघ इति प्राकृतबुद्धिं विहाय त्वमेव भगवानिति निश्चित्य त्वां सम्प्रार्थय इति मुख्योभिप्रायः ।। 7 ।।

**पुष्यस्यद्भिर्भुवनमखिलं प्राप्य वातार्कसाह्यं।**
**सर्वान् लोकानपलपसि ते वाञ्छितश्चेत् क्षणेन ।।**

**न स्त्रीरूपस्त्वमसि न पुमान् नैव दीर्घो न खर्वः।**
**दृश्यादृश्या वियति सततं दीप्यसे देवतात्मा** ।। 8 ।।

- व्याख्या -

इदानीं देवत्वमारोप्य स्तौति- **पुष्यसीति**। वातार्कसाह्यं तयोस्सहायकर्म प्राप्य, मेघस्य वर्षणे वायुसाह्यं प्रसिद्धं, अर्कसाह्यन्तु "यावदादित्यस्तपति घृष्टिभिस्ताभिः पर्जन्यो वर्षति" इति श्रुतिसिद्धं, अखिलं भुवनं अद्भिः पुष्यसि पोषयसि, जलप्रदानेन सर्वान् प्राणिनः प्रवर्धयसीति यावत्। अन्यत्र देवः परमेश्वरोपि "भीषास्माद्वातः पवते भीषोदेति सूर्यः" इति श्रुत्या वातार्कौ सहायत्वेन नियम्य स्वसृष्टान् प्राणितः अद्भिः उपलक्षणया भोग्यवस्तुभिः परिवर्धयते। हे मेघ! ते वाञ्छितं चेत् अभिलाषश्चेत् सर्वान् लोकान् क्षणेनापलपसि आवरणेन सन्निहितमपि अदृश्यं करोषीत्यर्थः। भगवानपि सञ्जिहीर्षा चेत् क्षणेन सर्वमन्तरयति। न स्त्रीरूपस्त्वमसि न पुमान् नैव दीर्घो न खर्वः, उभयत्र समानमेवैतत्, त्वं तावद्वायुवेगवशात् दृश्यादृश्यो भवसि, भगवानपि कार्यरूपेण दृश्यः कारणरूपेणादृश्यो भवति, त्वं तावद्वियत्यन्तरिक्षे दृश्यसे, भगवांस्तु वियति द्युलोके, अतस्त्वं देवतात्मा देवतायाः परमात्मनः आत्मा स्वरूपं यस्य तादृशः भगवानेव सन् दृश्यस इत्यर्थः । अत्र मेघे सादृश्यमूलकस्य भगवदभेदस्यारोपादाधिक्यन्यूनत्वयोरप्रतिपादनादनुभयाभेदरूपकमलङ्कारः ।। 8 ।।

**निर्व्याजोऽयं जलद मयि ते भाति कारुण्यबन्धः।**
**यन्मां दीनामवितुमनघ प्राप्तवान् दूरदेशात्** ।।
**औदार्यं ते निरववि जनैश्श्लाघ्यसे सर्वदा त्वम्।**
**स्वार्थं हित्वा परहितकृतां सर्वतो गौरवं हि** ।। 9 ।।

- व्याख्या -

अथ मेघं स्वकार्ये प्रवर्तयितुं प्रस्तौति- **निर्व्याजेति**। हे जलद, सर्वदा दानशीलेति तदर्थः, मयि ते अयमनुभूयमानः कारुण्यबन्धो दयाप्रसङ्गः निर्व्याजः निर्निमित्तस्सन् भाति प्रकाशते, न मया किञ्चिदुपकृतं भवते, नापि त्वया किञ्चित् प्रतिफलमपेक्षितम्, अत इति भावः। किञ्च यद्यस्मात्कारणात् दीनां यत्किञ्चिदुपकर्तुमप्यसमर्थां मामवितुं दीनेषु दयेतेति शास्त्रमनुसृत्य रक्षितुं दूरदेशात् भरतखण्डान्तर्वर्तिरामगिर्याश्रमात् प्राप्तवानागतवानसि, तस्मादिति पूर्वेणान्वयः। किञ्च ते तवौदार्यं दातृत्वं निरवधि इयत्तारहितम् अपरिमितमिति यावत्, तवैकेनैव वर्षेण सहस्रस्यायुतस्य लक्षस्य कोटेर्दशकोटेश्शतकोटेस्तदुपरितनस्य वा धनस्य लाभादिति भावः। अतः निर्व्याजदयाशालित्वान्महोदारत्वाच्च त्वं सर्वदा जनैः श्लाघ्यसे, असन्निहितानप्यन्विष्यान्विष्य रक्षन्नपूर्वोयं महादातेत्यभिनन्द्यसे गौरवपात्रीक्रियसे इति यावत्। अत्रार्थान्तरं न्यस्यति- स्वार्थमिति। यः स्वप्रयोजनं

परित्यज्य परहिताय प्रवर्तते तस्य सर्वस्माज्जनात् गौरवं भवति खलु, अतस्त्वमपि तादृशो महागौरवशालीति भावः । अर्थान्तरन्यासोऽलङ्कारः ।। 9 ।।

**भ्रातः श्रुत्वा प्रियतमकथां त्वद्वचोभिर्विशुद्धां।**
**शान्ताऽशङ्काप्यनुदितधृतिस्सम्प्रति प्राणनाथे ।।**
**स्नेहात्कृच्छ्रं किमपि किमपि स्वैरमाशङ्क्य दूये।**
**वीताऽशङ्का भवति हि जगन्मातुरन्या न कापि ।। 10 ।।**

- व्याख्या -

स्वाभिप्रायं कश्चिद्दर्शयति- **भ्रातरिति**। हे भ्रातः, औपचारिकमिदं भ्रातृत्वारोपणं, त्वद्वचोभिस्त्वदुदीरितैः शुद्धां मदनुरक्ति-अन्यानुरक्तिभ्यामकलुषितां प्रियतमकथां मत्प्राणेशचरित्रं श्रुत्वा सादरं सप्रमोदं च समाकर्ण्य शान्ताश्श्रवणोत्तरक्षणमेव प्रणष्टा आशङ्काः, प्रियः किं कुशली ? किमुताकुशली ? किं मय्यनुरक्तः ? किमुतान्यानुरक्तः? किमायाति ? किं वा पलायितः ? इत्याद्याः, यस्यास्तादृश्यपि त्वद्वचसां सर्वशङ्कानिवारकत्वादिति भावः। सम्प्रतीदानीं त्वदागमनान्तरमित्यर्थः। प्राणनाथविषये अनुदितधृतिरनुत्पन्नधैर्या सती एतावति काले स्नेहात् कीदृगवस्थोऽभूदिति चिन्तयेति भावः। किमपि किमपि कृच्छ्रम् अद्य व्याधितोऽभूद्वा, बाधितोऽभूद्वा, अन्यथाऽभूद्वेत्यादिकं स्वैरं स्वेच्छानुरूपमाशङ्क्य दूये सन्तप्ये। अतिस्नेहः पापशङ्कीति न्यायादिति भावः। जगन्मातुः महालक्ष्म्याः अन्या, अन्यारादित्यादिना पञ्चमी। कापि देवी वा मानुषी वा वीताशङ्का निरातङ्का न भवति, साशङ्कैव भवतीत्यर्थः। तस्याः विगलितसकलविकल्पत्वात् इतरासां सांसारिकत्वादिति भावः ।। 10 ।।

**भूयो भूयः श्रुतमपि मया प्रेयसः प्रेमवृत्तं।**
**पृच्छामि त्वां पुनरपि सकृद्दीनबन्धो दयेथाः ।।**
**दूरे नाथे विरहविधुरास्वङ्गनासु क्षितौ यत्।**
**प्रेयोवृत्तात्प्रणयगुणितान्नान्यदाश्वासहेतुः ।। 11 ।।**

- व्याख्या -

भूयो भूय इति। मया प्रेयसः प्रियस्य प्रेमवृत्तं प्रणयोदन्तः भूयोभूयः श्रुतमपि, त्वत्त इति शेषः। पुनरपि त्वां पृच्छामि तदेव पुनः पुनराख्याहीति प्रार्थये। हे दीनबन्धो, सकृद्दयेथाः, पुनरप्येकवारं तदेव मां श्रावयेत्यर्थः। किमर्थमेवं पुनः पुनरभिधानमित्यत आह- **दूर इति**। नाथे प्रियतमे दूरस्थिते सति विरहविधुरासु विरहविह्वलासु अङ्गनासु विषये यद्यस्मात्कारणात् क्षितौ भुवि प्रणयेन विश्वासेन गुणितात् आवर्तितात् पौनः पुन्येन स्मृतादित्यर्थः। प्रेयोवृत्तात्प्रियवृत्तान्तात् अन्यत् भिन्नं, सामान्ये नपुंसकम्,

आश्वासहेतुर्न भवति । एवञ्च वियोगकाले कुलवधूनां प्रियतमवृत्तान्तस्य पुनःपुनश्रवणस्मरणादिरेव आश्वासहेतुर्भवतीति तात्पर्यार्थः। अतः पुनः पुनः प्रार्थनमुचितमेवेति भावः ।। 11 ।।

**दूरे कस्माद्वसतिमकरोद्रामगिर्याश्रमेऽसौ।**
**पुण्यं क्षेत्रं भवतु स तथा किं न कैलास एषः ।।**
**क्रीडास्थानं यदि गिरिरयं यक्षरक्षोगणानां।**
**शुद्धे चित्ते भुवनमखिलं पुण्यतीर्थायते हि ।। 12 ।।**

- व्याख्या -

इदानीं तु "तव सहचरो रामगिर्याश्रमस्थः" इतिप्रियसन्देशं मनसि निधाय प्रष्टव्यं परिपृच्छति- **दूर इति**। असौ मन्नाथः दूरे अस्मात्कैलासादतिदूरस्थिते रामगिर्याश्रमे कस्माद्धेतोर्वसति स्थानमकरोत्, निष्कारणमतिदूरस्थितिरनुचितैवेति भावः। विचार्य स्वमनसि स्वयमेव समाधत्ते- **पुण्यं क्षेत्रं भवतु स इति**। स रामगिर्याश्रमः पुण्यं क्षेत्रमिति चेद्भवतु तथास्तु, एवञ्च दूरेपि पुण्यक्षेत्रे वसतिरुचितैवास्त्विति पूर्वोक्तार्थस्य प्रतिषेधः। अत एव आक्षेपालङ्कारः। "आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्" इति लक्षणात् । पुनः पृच्छति- **तथेति**। एष कैलासः अस्मत्पुरस्सन्निहितोद्रिः तथा पुण्यक्षेत्ररूपः न किं न भवति किं भवत्येवेत्यर्थः। तथा च अत्रावस्थितिरुचिततरेति भावः। पुनस्समाधत्ते- **क्रीडेति**। अयं गिरिः कैलासः यक्षाणां रक्षसां गणानां प्रमथानां च क्रीडास्थानं विहारस्थानं, यदि तेषां सम्मर्दवशादशुचिस्थानं भवतीतिचेदस्तु, तथापि चित्ते स्वमनसि शुद्धे सति अखिलं भुवनमपि पुण्यतीर्थायते हि परिशुद्धक्षेत्रसदृशं भवति खलु। तथा च शुद्धचित्तानां सर्वमपि स्थलं परिशुद्धमेव भवतीत्यतोत्रैव स्थितिरस्योचिततरेति तात्पर्यार्थः । अत्र पूर्ववदाक्षेपस्य काव्यलिङ्गोपमयोश्च संसृष्टिः ।। 12 ।।

**दूरे स्थित्वा सततमपि मां चिन्तयन् मन्दभाग्यां।**
**क्लान्तस्वान्तः कथमिव नयेद्दीनदीनो दिनानि ।।**
**त्याज्यान् भोगान् त्यजतु स गृहे किं प्रवासी वृथाऽभूत्।**
**कष्टे काले जगति महतां बुद्धयोऽपि स्खलन्ति ।। 13 ।।**

- व्याख्या -

अथ दूरगतं प्रियमनुशोचति- **दूर इति**। स मे प्राणकान्तः दूरे स्थित्वा मन्दभाग्यां मां सततमपि रात्रिं दिवमपि चिन्तयन् मदेकायत्तत्वादिति भावः। क्लान्तं लूनकिसलयवदतिशिथिलं स्वान्तं मनो यस्य तादृशस्सन्, किञ्च दीनदीनश्च सन् दिनानि मद्विरहदीर्घाणि कथमिव नयेत् कथंकारं यापयेत्, इवेति वाक्यालङ्कारे। गृहे स्वभवने स्थितस्सन् त्याज्यान् भोगान् मत्सम्भोगसंश्लेषणादीन् त्यजतु नानुभवतु नाम, वृथा निष्फलमेव किं किमर्थं प्रवासी देशान्तरगमनवानभूत्, तदिदमनुचितमेवेति निश्चित्यार्थान्तरन्यासेन

समाधत्ते- **कष्ट इति**। कष्टे काले शापविपत्त्यादिना कृच्छ्रावस्थायां सत्यां महतामपि बुद्धयः स्खलन्ति इतिकर्तव्यतामूढतया स्वयमनभिमतेऽपि प्रवर्तन्त इत्यर्थः। अत्र नायिकानायकाभ्यां विभावितः परस्परालम्बनकरतिरूपः स्थायी साधारणीकृतवर्षासमय-केकारवादिभिः उद्दीप्यमानतया प्रवासदेहकार्श्यादिभिरनुभाव्यमानतया सततचिन्तामनःक्लान्तिदैन्यबुद्धिस्खालित्यादिभिर्व्यभिचर्यमाणतया च कविनिबद्धाक्षेपकाव्यलिङ्गार्थान्तरन्यासानुप्रासाद्यलङ्कारैः परिष्क्रियमाणः रीतिपाकपदमैत्र्यर्थौचित्र्यादिभिरभिपोष्यमाणस्सन् अलौकिकतामासाद्य सहृदयैश्चर्व्यमाणो रसात्मकतामापद्यत इति ध्येयम् ।। 13 ।।

**विज्ञाप्यं मे जलधर! वचश्श्रावयन् प्राणनाथं।**
**सौजन्यं ते प्रकटय मुहुः प्राञ्जलिः प्रार्थये त्वाम् ।।**
**निश्शब्दस्त्वं मम निगदितान्यभ्युपैषीति मन्ये।**
**वक्तव्यांशे जगति महतां मौनमङ्गीक्रिया हि ।। 14 ।।**

- व्याख्या -

नैपुण्येन स्वसन्देशं मेघमङ्गीकारयति- **विज्ञाप्यमिति**। हे जलधर! मे विज्ञाप्यं वचः प्राणनाथं श्रावयन् सन् अणिकर्तुः प्राणनाथस्याण्यन्तावस्थायां गतिबुद्धीत्यादिना कर्मत्वम्। ते तव सौजन्यं प्रकटय अहो महानुभावस्सुजनोऽयं जलधरः, यक्षपत्नीसन्देशं तत्प्रियमुपनयन्नुपकर्तासीदिति यशः प्रकाशयेत्यर्थः। प्रगतौ अञ्जली यस्यास्तादृशी सती त्वां मुहुः प्रार्थये, एतावानेव मदुपकार इति भावः। त्वं निश्शब्दः मम प्रत्युत्तरं न ददासीति तदर्थः । तथापि मम निगदितानि वचनानि अभ्युपैष्यङ्गीकरोषीति मन्ये। "ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम्" इति न्यायादिति भावः। वक्तव्यांशे प्रत्युत्तरदानविषये जगति महतां मौनमङ्गीक्रिया हि तूष्णीभावः अङ्गीकारप्राय एवेति भावः। अर्थान्तरन्यासोऽलङ्कारः ।। 14 ।।

**मद्वृत्तान्तं त्वयि कथयति प्रेरिते वार्षवातैः।**
**भर्तुश्चिन्ताकलुषितधियः कष्टमुत्प्रेक्ष्य दूये ।।**
**मित्रस्नेहात्स्वसरि च मयि प्रेमभावानुबन्धा-।**
**त्कारुण्याद्वा स खलु भवता रक्षणीयः प्रमादात् ।। 15 ।।**

- व्याख्या -

**मद्वृत्तान्तमिति**। वर्षासु भवा वार्षाः तत्र भव इत्यण्। ते च ते वाताश्च तैस्तदुद्दीपकैरिति यावत्। प्रेरिते तत्सन्निधिं प्रापिते त्वयि मद्वृत्तान्तं कथयति सति चिन्ताकलुषितधियः मद्ध्यानविपर्यस्तबुद्धेर्भर्तुः मन्नाथस्य कष्टं तात्कालिकमनोव्यथामुत्प्रेक्ष्याभ्यूह्य दूये तदा स कीदृगवस्थः सदिति खिद्ये। अतो भवता स मे

पतिः मित्रस्नेहात् मत्सख इति स्नेहमनुरुध्येति, ल्यब्लोपे पञ्चमी। एवमुत्तरत्रापि। स्वसरि सहोदरीप्रायायां मयि प्रेमरूपो यो भावश्चित्तवृत्तिविशेषस्तस्माद्वा कारुण्यात्त्वदीयसहजदयाशालित्वाद्वा प्रमादात्प्राणान्तकरादनवधानताजन्यादपायात् रक्षणीयः त्रातव्यः। भीत्रार्थानामिति पञ्चमी। एवमुचिताशङ्कापूर्वकमनुनीय पतिप्राणरक्षणप्रार्थनया नायिकायामतिचातुर्यमभिज्ञत्वमात्मकान्तप्रणयातिशयश्च व्यज्यते ।। 15 ।।

**मद्वार्तायाः कथनसमये स्वात्मनाच्छादयेन्दुं।**
**श्रोत्रासह्यान् शुकपिकरवान् गर्जितैर्निर्जयाऽशु ।।**
**नृत्तारम्भं शिथिलय धनुर्दर्शयन् बर्हिबन्धो-**
**र्धारापातैः परिहर परावर्तयन् भृङ्गमालाम्** ।। 16 ।।

- व्याख्या -

इदानीं सम्भविष्यतः प्रमादान् तत्परिहारोपायांश्च दर्शयति – **मद्वार्तेति**। मद्वार्तायाः मदीयवृत्तान्तस्य कथनसमये परिबोधनकाले स्वात्मना स्वशरीरेण इन्दुमाच्छादय तददर्शनतां प्रापय, उद्दीपकदर्शनेन तत्प्राणहानिभयादिति भावः। श्रोत्रासह्यान् विरहकाले व्यथाकरत्वाच्छ्रवणकटून् शुकपिकरवान् गर्जितैर्निर्जय त्वदीयगर्जितारवेण तानश्रुतान् कारय। बर्हीति यस्ते बन्धुर्मित्रं, तस्य नृत्तारम्भं धनुस्त्वत्सन्निहितमैन्द्रं दर्शयन् शिथिलय त्याजय। धनुर्दर्शनेन ते भीत्वा नृत्तकुतूहलं त्यजेयुरेवेति भावः। भृङ्गमालां भ्रमरश्रेणीं धारापातैर्जलधारासम्पातैः परावर्तयन् निवर्तयन् जलपाते तेषां सञ्चाराक्षमत्वादिति भावः। परिहर दूरं गमय। एवमुद्दीपकपरिहारेण स चित्तवैकल्यं विहाय सावधानं मत्सन्देशं श्रुणुयादिति भावः। अत्र वक्तुर्मेघस्याप्युद्दीपकत्वेपि कथञ्चित्तत्सोढव्यमिति ज्ञेयम्। उक्तं च कालिदासेनैव "तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः" इति ।। 16 ।।

**निद्रामुद्री नहि नहि धवे शोकमुद्रीकृताक्षे।**
**निश्शब्दस्सन्नपसर विभुर्यावदुन्मीलिताक्षः ।।**
**शोकान्मोहाद्विरतहृदये स्वोक्तिकालं विदित्वा।**
**वाचा क्रेतुं सुकृतमधिकं प्रक्रमेथाः क्रमेण** ।। 17 ।।

- व्याख्या -

अथ द्वाभ्यां सन्देशनिवेदनक्रममुपदिशति- **निद्रेति**। धवे मद्भर्तरि निद्रामुद्रीकृतदृशि इति वक्तव्ये निद्रामुद्रीत्यर्धोक्तौ विरहिणस्तस्य निद्राभावमाशङ्क्य नहि नहीति निषेधः। ततश्शोकमुद्रीकृताक्ष इत्यन्यथापूरणेन विच्छित्तिविशेषः। तथाच निद्राभावेपि तस्मिन् शोकनिमीलितनयने सति निश्शब्दस्सन्नपसर। अन्यथा तस्य आकस्मिकोद्वेगस्स्यादिति भावः। विभुस्तत्त्वावबोद्धा यावदुन्मीलिताक्षः

वृथाऽयं शोक इति निश्चित्य यावन्नयने निमीलयेत्तावदिति पूर्वेणान्वयः। अथ शोकान्मोहाच्च विरतहृदये प्रसन्नात्मनि सति तस्मिन् जुगुप्साविरामेत्यादिना पञ्चमी। स्वोक्तिकालं सन्देशनिवेदनावसरं विदित्वा निश्चित्य वाचा सुकृतमधिकं क्रेतुं `वाचा धर्ममवाप्नुहि' इति न्यायमनुसृत्य क्रमेण श्रुतिक्रमेणाभिधातुं प्रक्रमेथाः उपक्रमस्व, प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदम्। अत्र अभिधेहित्यर्थस्य वाचा क्रेतुं सुकृतमधिकं प्रकमेथा इति भङ्ग्यन्तरेण व्यक्तीकरणात्पर्यायोक्तमलङ्कारः। "पर्यायोक्तन्तु गम्यस्य वचोभङ्ग्यन्तराश्रयम्" इति लक्षणम् ।। 17 ।।

**अस्माद्देशात्पुनरपगतो रामगिर्याश्रमस्थं।**
**मित्रं दृष्ट्वा मृदुलहृदयं मद्वियोगाभितप्तम् ।।**
**सिञ्चन् शीतैर्निजजलकणैस्स्वस्थचित्तं विधास्यन्।**
**मन्दं मन्दं कथयतु भवानेतदुक्तं यथोक्तम् ।।** 18 ।।

- व्याख्या -

**अस्मादिति**। हे जलधर! भवानस्माद्देशात्कैलासोपान्तात् पुनरपगतः प्रतिनिवृत्तस्सन् रामगिर्याश्रमस्थम् एतेनान्वेषणायासाभावस्सूच्यते। मृदुलहृदयं, एतेनाभिगम्यत्वमभिव्यज्यते। मद्वियोगाभितप्तम्, एतेन दयनीयत्वमभिव्यज्यते। एतादृशं मित्रं भवत्सखं दृष्ट्वा शीतैर्निजजलकणैस्सिञ्चन् सन्, तप्तस्य सेचनं स्नेहोचितमिति भावः, स्वस्थचित्तं दुःखपरवशीकृतचित्तमपि मित्रदर्शनेन प्रियावृत्तान्तश्रवणोत्कण्ठया च स्वायत्तचित्तं विधास्यन् विधातुमिति तात्पर्यार्थः। मन्दं मन्दं न तु घोरं यथा तथा, एतदुक्तं मयाद्य निवेद्यमानं यथोक्तमुक्तमनतिक्रम्य यथार्थेव्ययीभावः। यया शब्दार्थानुपूर्व्या मया प्रतिपाद्यते तयैवेत्यर्थः। कथयतु सादरं सविनयं सस्नेहं च ब्रवीतु ।। 18 ।।

**सत्यं यस्य प्रियसख इव द्वेष्यकोटावसत्यं।**
**त्याज्ये पक्षे स्थितिमुपगताः कोपदम्भाभिमानाः ।।**
**स्वप्नेप्यासन् परयुवतयस्सोदरीवर्गभाजः।**
**स त्वं क्वासि प्रियसख कथं मय्युपेक्षां करोषि ।।** 19 ।।

- व्याख्या -

अथेदानीमभिमुखस्थितमिव प्राणनाथं निर्दिश्य तद्गुणवर्णनपूर्वकं तमनुशोचति- **सत्यमिति**। हेप्रियसख! यस्य तव सत्यं प्रियसख इव भवति, सर्वदा सत्यसन्धस्त्वमित्यर्थः। असत्यं द्वेष्यकोटौ वर्तते सर्वदाऽसत्यद्वेषीत्यर्थः। कोपदम्भाभिमानाः त्याज्ये पक्षे स्थितिमुपगताः परित्यक्तकोपदम्भाभिमानस्त्वमित्यर्थः। परयुवतयः परस्त्रियः यस्य ते स्वप्नेपि सोदरीवर्गभाजः आसन् परनारीसहोदर इत्यर्थः। स तादृशधीरोदात्तगुणयुक्तस्त्वं क्वासि क्वनु लीयसे, अदर्शनतां गतोसीत्यर्थः। किञ्च

मयि निर्दुष्टायामनुरूपायाश्च प्रियायां कथं केन कारणेन उपेक्षां करोषि, तादृशं कारणं न किञ्चिदप्यस्ति, अतश्शीघ्रं सन्निधेहीति तात्पर्यार्थः ।। 19 ।।

**दूरीभूते दयित भवति त्वां विनाऽहं वृथाऽसं।**
**निर्यत्ना धीरिव विरहितेवाकृतिस्सद्गुणेन ।।**
**भोगेच्छेव द्रविणरहिता श्रीरिवारोग्यशून्या।**
**वाणी सत्यादिव विगलिता श्रूयतां मद्दशापि ।। 20 ।।**

- व्याख्या -

अथ सप्तभिः श्लोकैः स्वावस्थां प्रस्तौति- **दूरीभूत इति**। हे दयितप्राणेश्वर! त्वयि, दूरीभूते दूरं प्रयाते सति, त्वां विना अहं वृथा व्यर्थस्थितिरासम्। उपमानविधया वैयर्थ्यं प्रदर्शयति- **निर्यत्नेति**। निर्गता यत्नान्निर्यत्ना। निरादयः क्रान्ताद्यर्थे पञ्चम्येति पञ्चमीसमासः। यत्नरहिता धीरिव वृथाऽसं, तथा च नवनवोन्मिषत्प्रतिभायास्सत्वेपि प्रयत्नाभावे सा यथा व्यर्था भवति तद्वदिति भावः। सद्गुणेन विरहिता आकृतिरिव सद्रूपसम्पत्तिसत्वेपि सद्गुणसाहचर्याभावे सा यथा निष्फला तद्वदिति भावः। द्रविणरहिता भोगेच्छेव यद्यपि कस्यचित्स्रक्चन्दनवनिताद्युपभोगेच्छा वर्तते, तस्य यत्किञ्चिद्धनस्याप्यभावे सा यथा व्यर्था भवति, तद्वदिति भावः। आरोग्यशून्या श्रीरिव सम्पत्समृद्धेस्सत्वेपि आरोग्याभावे तस्य सा समृद्धिर्यथा वृथा, तद्वदिति भावः। सत्याद्विगलिता चाकचक्यप्रवृत्तापि सत्यविरहिता वाणी यथा वृथा, तद्वद्व्यर्थाऽहमस्मीत्युपमामाला। एवंभूता मद्दशा श्रूयतामेवं कृतवता भवतेति शेषः ।। 20 ।।

**भित्तेर्मूले भवनधरणावर्धपद्मासनस्था।**
**द्वारे चक्षुर्जलकणचितं न्यस्य पाणौ कपोलम् ।।**
**ध्यायन्ती त्वां प्रचलति तृणेप्यागतं तर्कयन्ती।**
**मासानष्टौ कथमपि भवद्दर्शनार्थिन्यनैषम् ।। 21 ।।**

- व्याख्या -

**भित्तेरिति**। भवनधरणौ गृहान्तःप्रदेशे भित्तेर्मूले स्वशरीरपश्चाद्भागावलम्बककुड्याधोभागे अर्धेन पद्मासनेन तिष्ठतीत्यर्धपद्मासनस्था। तत्र पद्मासनं नाम त्रिशिखिब्राह्मणोपनिषदि---

ऊर्वोरुपरि वै धत्ते सदा पादतले उभे।
पद्मासनं भवेदेतत्सर्वव्याधिविषापहम् ।। इति

तस्यार्धं नाम एकां जङ्घां भूमौ तिर्यक्प्रसार्यापरामुत्क्षिप्य तत्र बाहुमध्यमारोप्य स्थितिः। एवं तिष्ठन्ती सती जलकणचितं अश्रुधाराव्याप्तं चक्षुर्द्वारे न्यस्य प्रियागमनशङ्कया द्वारभागं पश्यन्तीति यावत्। पाणौ उत्क्षिप्तजङ्घाश्रयिणि करतले कपोलं न्यस्य। स्त्रीणां कष्टावस्थायां स्वाभाविकी स्थितिरियम्। एवं स्थित्वा त्वां

ध्यायन्ती, तृणेपि प्रचलति सति किञ्चन्मर्मरध्वनावपि त्वदीयपादन्यासध्वनिशङ्कया त्वामागतं तर्कयन्ती च सती अष्टौ मासान् प्रायशः उत्थानद्वादशीमारभ्य शयनद्वादशीपर्यन्तान्, भवद्दर्शनार्थिनी कथमप्यनैषं, कथंकथञ्चिद्दुःखेन जागरेण चात्यवाहयम्। पुनर्दर्शनाशयेति भावः। स्वभावोक्तिरलङ्कारः। "स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्" इति लक्षणात् ।। 21 ।।

**पौष्पीं शय्यामभजमथ तां पद्मिनीपत्रशय्या-**
**मुष्णालुर्द्राक् शशिमणिभुवं चन्दनोशीरचर्चाम् ।।**
**केनाप्यात्मा नहि शिशिरितस्त्वद्वियोगार्कतापः।**
**शैत्यं सर्वं जगति सहसा शोषयामास नूनम् ।। 22 ।।**

- व्याख्या -

**पौष्पीमिति**। उष्णालुरुष्णमसहमानाऽहं, शीतोष्णतृप्रेभ्यः तदसहन इत्यालुः (च् 5.2.122 बहुलं छन्दसीति सूत्रे वार्तिकम्) पौष्पीं पुष्पमयीं शय्यामभजं, शैत्यसंपादनार्थमिति भावः। अथ तत्र शैत्याननुभवानन्तरं, पद्मिनीपत्रशय्यामभजं, सततजलोषितानि पद्मिनीपत्राणि शैत्यमवश्यं दद्युरित्याशयेति भावः। अथ शशिमणिभुवं चन्द्रकान्तमणिमयभूमिमभजम्, जन्द्रोदयकाले वा जलं प्रस्राव्य सा शीतलयेदात्मानमितीच्छयेति भावः। अथ तत्रापि शैत्यादर्शनानन्तरं चन्दनोशीरयोः चर्चां लेपनभाजम्। गन्धोदकसेचनं बाह्यतापं शमयत्येवेति निश्चयादिति भावः। केनापि पूर्वनिर्दिष्टेनैकेनापि पदार्थेन आत्मा मच्छरीरं नहि शिशिरितः अभूत् । कुतस्तथेति विविच्यमाने त्वद्वियोग एवार्कस्तस्य ताप आतपः जगति विद्यमानं शैत्यं सर्वं शोषयामास। नूनमित्युत्प्रोक्षा । अन्थथा कतिचिदपि शैत्यं स्यादिति भावः। अत्र वियोग एवार्क इत्यभेदारोपाद्रूपकम्। एकस्याः नायिकायाः पुष्पशय्या-पद्मिनीपत्रशय्याद्यनेकाश्रकथनात् पर्यायालङ्कारः। तयोश्च आत्माधिकरणकशीतलत्वाभावनिमित्तेन जगदधिकरणकशैत्यशोषणोत्प्रेक्षया सह संसृष्टिः। तथाच असह्यविरहवेदनया अतिसन्तप्ताऽस्मीति भावः ।। 22 ।।

**मारः क्रूरः कठिनहृदयश्चन्द्रमाश्चण्डतापः।**
**प्राणाकर्षी पवनहतको दुस्सहाः केकिकेकाः ।।**
**वाचा प्रीतिं विशदयसि मे नाग्रतस्सन्निधत्से।**
**मन्ये पुंसां कुसुमपिहितं वज्रमेवान्तरङ्गम् ।। 23 ।।**

- व्याख्या -

**मार इति।** मारो मदनः मयि विषये क्रूरः वर्तते। एष चन्द्रमाः मयि चण्डतापः अतएव कठिनहृदयः मन्मारणोद्युक्त इव प्रतिभातीति यावत्। हतकः पवनः पवनहतकः मयूरव्यंसकादयश्चेति विशेष्यपूर्वपदसमासः। प्राणाकर्षी प्राणापहारोद्योगीव वर्तत इत्यर्थः। केकिनां प्रचलाकिनां केकाः केकारावाः

दुस्सहास्सोढुमशक्याः ईषद्दुस्सुष्वित्यादिना खल्। एतैरुद्दीपनैर्बाध्यमानास्मीति भावः। त्वन्तु वाचा वाङ्मात्रेण प्रीतिं विशदयसि केवलसन्देशं संप्रेष्य मां प्रीणयसि। मे नाग्रतस्सन्निधत्से न पुरो दृश्यसे। अतः पुंसामन्तरङ्गं कुसुमाच्छादितं वज्रमणिमेव मन्ये वज्राभिन्नं जानामीत्यर्थः। अत्र विशेषणानां साभिप्रायत्वात्परिकरालङ्कारः। वज्राभेदप्रतिपादने कुसुमपिहितत्वरूपाधिक्यस्य प्रदर्शनादधिकाभेदरूपकम्। तृतीयपादवाक्यार्थस्य चतुर्थपादवाक्यार्थं प्रति हेतुत्वकल्पनाद्वाक्यार्थहेतुकं काव्यलिङ्गम्। तथा मन्य इत्युत्प्रेक्षावाचकसत्त्वात् नाथस्य सन्देशप्रेषणानागमनाभ्यां व्यज्यमानेन बाह्यमार्दवसहितान्तःकाठिन्यवत्त्वेन निमित्तेन सकलपुमन्तरङ्गे कुसुमाच्छादितकठिनवज्रत्वोत्प्रोक्षा चेत्येषां संसृष्टिः ।। 23 ।।

**त्यक्तुं प्राणान् त्वरयति मुहुस्त्वद्वियोगव्यथा मां।**
**शापोदन्तः क्रकच इव मामन्तरेव क्षिणोति ।।**
**औदास्यं ते मम न सहते जीवितं जीवितुं मे।**
**हस्तालम्बं वितरति पुनर्दर्शनेच्छा तवैका ।। 24 ।।**

- व्याख्या -

**त्यक्तुमिति**। त्वद्वियोगव्यथा कर्त्री प्राणान् त्यक्तुं मां मुहुस्त्वरयति मरणसङ्कटं जनयतीत्यर्थः। शापोदन्तश्शापवृत्तान्तः क्रकच इव करपत्र इव मां अन्तरेव क्षिणोति आन्तरमर्मच्छेदनव्यथां जनयतीत्यर्थः। ते तवौदास्यं मत्परित्यागरूपं मम जीवितं प्राणनं न सहते, त्वत्कृतमौदास्यमालोच्य झटिति प्राणत्याग एव वरमिति बुद्धिरुदेतीति भावः। तथाप्येका तव पुनर्दर्शनेच्छा तावत् जीवितुं किञ्चित्कालपर्यन्तं प्राणान् धर्तुं मे हस्तालम्बं वितरति। बहूनां मारकसामग्रीणां सत्त्वेपि `जीवन् भद्राणि पश्यति' इति न्यायमालोच्य त्वत्पुनर्दर्शनाशयैकया जीवामि नान्यथेति भावः ।। 24 ।।

**द्रष्टुं दृष्टिः प्रचलति मनः कर्षति ध्यातुमन्त-**
**र्निर्निद्रा धीर्वशयति तनुः श्रीयते त्वामलब्ध्वा ।।**
**दिव्यान् भोगानपि मम रुचिर्द्वेष्टि लज्जा प्रवासा-**
**दुन्मत्ताऽसं न विदितमथो मूर्छिता वान्यथा वा ।। 25 ।।**

- व्याख्या -

**अथ।** दृङ्मनःसङ्गसङ्कल्पाः जागरः कृशताऽरतिः।
ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश ।।

इति कविभिस्तत्रतत्र वर्ण्यमाना दशाप्यवस्थाः कविरत्रैकेनैव श्लोकेन प्रदर्शयति- **द्रष्टुमिति**। हे नाथ! त्वां द्रष्टुं चित्रे विलिख्य त्वां द्रष्टुमित्यर्थः। दृष्टिर्मदीयं चक्षुः प्रचलति निरन्तरं त्वां द्रष्टुमिच्छामीत्यर्थः। एतेन चक्षुःप्रीतिर्दर्शनसङ्कल्पश्चोक्तौ भवतः। मनः त्वां ध्यातुमन्तः कर्षति निरन्तरं मनसि त्वामेव ध्यायामीत्यर्थः।

एतेन मनस्सङ्ग उक्तः। निर्निद्रा निद्रारहिता धीर्मद्बुद्धिः त्वां वशयति स्ववशे करोति। निद्रामपि विहाय निरन्तरं त्वदासक्तेत्यर्थः। एतेन जागरावस्था प्रदर्शिता। तनुर्मच्छरीरं त्वामलब्ध्वा क्षीयते कृशीभवति। एतेन कार्श्यमुक्तं भवति। मम रुचिरिच्छा दिव्यान् भोगानपि द्वेष्टि तेषु प्रीतिं न करोतीत्यर्थः। उक्तमेवेदं मदीये भैमीपरिणयनाटके नायिकायाः वियोगावस्थाप्रदर्शनप्रस्तावे "नो वीणां समुपैति पञ्जरशुकीं दृष्ट्वापि नालोकते, न स्नाने न विलेपने न कुसुमे नाक्षे च धत्ते मतिं" इति। एवंविधास्मीति भावः। एतेन अरतिरुक्ता भवति। लज्जायाः प्रवासाद्देशान्तरगमनात् लज्जात्यागादित्यर्थः। हेतौ पञ्चमी। उन्मत्ताऽऽसं "तदुदितस्स हि यो यदनन्दरः" इति न्यायेन लज्जात्यागोन्मादयोरत्र हेतुहेतुमद्भावो द्रष्टव्यः। एतेन ह्रीत्यागोन्मादौ प्रदर्शितौ भवतः। अथो तदनन्तरमहं मूर्च्छिता वा अन्यथा वा मृता वा न जाने इति शेषः। तयोर्द्वयोरप्यैहिकज्ञानवैकल्यादिति भावः। अत्र कविरश्लीलत्वदोषानवकाशार्थं मूर्छिता वा मृतावेति पाठं परित्यज्य मूर्छितावान्यथावेत्युक्तवानिति ज्ञेयम् ।। 25 ।।

**दृष्टे ध्यानात्त्वयि दिशिदिशि च्छिद्यते हृत्पुटं मे।**<br>
**सन्देहो मे गलति निखिलः क्षीयते कर्म सर्वं।**<br>
**कामास्सर्वे हृदयगलिताः निर्भयाथाऽमृतत्वा-**<br>
**दत्रैवाहं तव सुखमयं सत्यमैकात्म्यमापम् ।। 26 ।।**

- व्याख्या -

**दृष्टे इति**। हे नाथ! त्वयि ध्यानाद्दिशि दिशि दृष्टे भ्रान्त्या वीक्षिते सति मे हृत्पुटं हृदयान्तर्भागः छिद्यते अदृश्यस्याकस्मिकदर्शनेन स्तम्भप्रलयरोमाञ्चादिसात्त्विकभावानुत्पाद्य हृदयं स्वयमपि प्रक्षुभ्य स्फुटतीव भवतीति यावत्। अन्यत्र त्वयि परमात्मनि ध्यानात्तैलधारावत्सन्तताविच्छिन्नप्रत्ययात् दिशिदिशि अणुरेणुतृणकाष्ठादिषु दृष्टे `सर्वं खल्विदं ब्रह्म' इति प्रत्ययविषयीकृते सति मे हृत्पुटं हृदयग्रन्थिः हृदयग्रन्थिर्नाम दुर्मोचग्रन्थिवत् हृदयं सन्निरुध्य स्थिताः अविद्याजनितरागद्वेषाभिनिवेशास्मितादिरूपाः ये हृदयगुणाः तत्समुदायरूपः। स च छिद्यते भिद्यते नाशं प्राप्नोति। ब्रह्मसाक्षात्कारे सति सर्वे चाविद्यावासनामयाः संस्काराः प्रणश्यन्तीति भावः। मे मम सन्देहः प्रियप्राप्तिर्भवेद्वा न वेत्यादिः गलति प्रत्यक्षगतत्वादिति भावः। अन्यत्र ब्रह्मसाक्षात्कारे सति अहं ब्रह्मास्मि वा न वेत्याद्यविद्याजनितस्सर्वोपि प्रत्ययः प्रणश्यतीत्यर्थः। सर्वं कर्म क्षीयते अश्रुमोचनप्रियप्रतिकृतिलेखनादिव्यापारस्सर्वोपि विरमतीत्यर्थः। अन्यत्र इह जन्मनि जन्मान्तरे वा कृतानि फलानारम्भकाणि यानि सञ्चितानीत्युच्यन्ते, यानि चोत्तरोत्तरोत्पत्स्यमानानि आगामीनीत्युच्यन्ते, तत्समुदायस्सर्वोपि "ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा" इति न्यायेन प्रशान्तो भवतीत्यर्थः। श्रूयते च "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति। किञ्च कामास्सर्वे हृदयगलिताः किं वेषान्तरेण प्रियमन्विष्यामि किमुत चित्रे विलिख्य साक्षात्करोमि किमथवा कयाऽपि मूलिकया निद्रामासाद्य स्वाप्निकेन प्रियेण सङ्गमिष्य

इत्यादिमनोरथास्सर्वेपि शान्ताः आसन् इत्यर्थः। अन्यत्र वेदारम्भण-गुरुशुश्रूषण-पत्नीपरिग्रह-पुत्रोत्पादन-गृहारामक्षेत्रार्जन-अग्निहोत्रारम्भण-गङ्गास्नान-मूर्तिपूजन-वेदान्तविचारश्रवण-मनन-निदिध्यासन-योगाभ्यासादिषु ऐहिकामुष्मिकसाधनेषु अभिलाषाः हृदयान्निरस्ताः भगवत्साक्षात्कारस्य सकलविकल्पविच्छेदकत्वादिति भावः। अहं एषाऽहं ते प्रियतमा अथ निर्भया सती अमृतत्वात् अमृत्वा जीवितत्वात् अत्रैव अस्मद्गृहान्तश्शयनागार एव तव सुखमयं सम्भोगानन्दप्रचुरं ऐकात्म्यं सम्भोगकालसम्भावितैकशरीरत्वमापम्। तथाच त्वद्दर्शनमात्रेण त्वत्सङ्गमसुखमन्वभवमित्यर्थः। अन्यत्र अथ वेदारम्भणादिसकलकामविच्छेदानन्तरं अहं संसारिभावनाभावितान्तःकरणावच्छिन्नचैतन्यरूपोहं अमृतत्वात् मरणस्वभावं परित्यज्य नित्यस्वभावं प्राप्तत्वात् अत्रैव देशान्तरकालान्तरादिनियममनपेक्ष्य एतच्छरीरावच्छेदेनैवानुभूयमानब्रह्मोपासनावेलायामेव तव परमात्मनः सुखमयं ब्रह्मानन्दरूपं ऐकात्म्यमन्त्यन्तसादृश्यरूपमैक्यं आपं ब्रह्मीभूतोस्मि क्रिमिकीटन्यायेनेति भावः। श्रूयतेच-- "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते" इति। "यथा नद्यस्स्यन्दमानास्समुद्रे अस्तंगच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः निरञ्जनः परमं साम्यमुपैति" इति। अत्र प्रकृतनायिकावृत्तान्ते वर्ण्यमाने विशेषणसाम्यादप्रकृतयोगिनीवृत्तान्तस्य गम्यत्वात्समासोक्त्ययलङ्कारः। "समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्" इति लक्षणात् ।। 26 ।।

**कस्त्वां क्वापि स्थितमुपचरेत्कोऽनुगच्छेद्व्रजन्तं।**
**को वा पृच्छेत्कुशलमसकृद्व्याधितं बाधितं वा ।।**
**एकाकी सन् निवससि कथं बन्धवस्ते हताः किं।**
**कष्टंकष्टं विधिविलिखितं केन शक्यं प्रमार्ष्टुम्** ।। 27 ।।

- व्याख्या -

इदानीं स्वकान्तस्यापि दुर्दैवमनुशोचति- **क इति**। क्वाप्यदृष्टपूर्वे वनान्तराले स्थितं त्वां क उपचरेत् न कोपीत्यर्थः। व्रजन्तं कुत्रचित्प्रयान्तं कः अनुगच्छेत् न कोपीत्यर्थः। व्याधितं बाधितं वा, तारकादित्वादितच्। एतादृशं त्वां असकृत्पुनःपुनरागत्य को वा वैद्यस्सखा वा कुशलं पृच्छेन्न कोपीत्यर्थः। असहायः एकः एकाकी तादृशस्सन् कथं निवससि। एकाकिनस्ते दूरस्थितिरपायकारिण्येवेति भावः। ते तव बन्धबोऽस्मदादयः हताः प्रणष्टाः किं, नहि नहि त्वद्विरहेपि हतजीवितं धारयाम एवेत्यर्थः। कष्टं कष्टं! तव दूरवर्तनं अस्मदादेः प्राणधारणं चेति द्वयमप्यतीव दुःखावहमिति भावः। अथवा युक्तमेवेदं। विधिविलिखितं प्रमार्ष्टुमन्यथयितुं केन शक्यं स्यात्, न केनापीत्यहो तव चास्माकं च दुर्दैवफलमिदमिति निर्वेदातिशयः। लोकोक्तिरलङ्कारः "लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते" इति तल्लक्षणात् ।। 27 ।।

**पत्रन्यासैरलकरचनैः प्रापितासं विनोदं।**
**छायेव त्वामनुसृतवती लालितासं त्वयाऽहम् ।।**

**मध्ये काले विरहविपदा व्याहतं वैभवं मे।**
**हाहा! दैवं भुवि न सहते दीर्घसौख्यं जनानाम्** ।। 28 ।।

- व्याख्या -

**पत्रन्यासैरिति**। पत्रन्यासैर्मत्कपोलादिषु मकरिकापत्रलेखनैः अलकानां चूर्णकुन्तलानां रचनैरलङ्करणैश्च त्वया विनोदं कालयापनोपायं प्रापिता आसं। छायेव त्वामनुसृतवती अहं त्वया नानाविधैश्चित्तोल्लासनैः लालिता विनोदिता आसमभवं। मध्ये काले एवं किञ्चित्कालसुखानुभवावस्थायामेव विरहविपदा मे वैभवं सर्वमपि व्याहतं नाशितमभूत्। हाहेति खेदे। दैवं दुर्विधिः जनानां दीर्शसौख्यं चिरानुभाव्यमानन्दं न सहते सद्य एव नाशयतीत्यर्थः। दैवायत्तं मत्कष्टमभूत् न पुरुषदोषादिति भावः। अत्रार्थान्तरन्यासः लोकोक्त्यलङ्कारश्च उपमया संसृष्टः ।। 28 ।।

**कैलासाद्रौ स्थितिमगणयन् तापसीभूय भूयः।**
**मर्त्यस्त्रीणां मुखकमलकश्रीर्दिदृक्षुः किमासीः ।।**
**नो चेदेवं वद कितव मे तेषु कस्मादकार्षीः।**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु** ।। 29 ।।

- व्याख्या -

इदानीं पत्युर्दूरवर्तनाद्धेतोः कमपि कामुकभावमनुमाय तमधिक्षिपति- **कैलासेति**। हे कितव धूर्त परस्त्रीपरत्वाभिमुखेति यावत्। कैलासाद्रौ यक्षरक्षोगणाक्रान्तत्वादविविक्तस्थान इति यावत्। स्थितिमगणयन्ननिच्छन् तापसीभूय अतापसोपि तापसो भूत्वा रावणसन्न्यासिवेषमाश्रित्येत्यर्थः। भूयः पुनः पुनः मर्त्यानां मृतिस्वभावानां या स्त्रियस्तासां अल्पानि मुखकमलानि मुखकमलकानीत्यल्पार्थे कन्। अल्पत्वं तु कान्त्या प्रमाणेन जरया चेति भावः। तादृशमुखकमलकस्य श्रीश्शोभाः दिदृक्षुर्द्रष्टुमिच्छुः। दृशेस्सन्नन्तादुप्रत्ययः। नलोकेत्यादिना षष्ठीप्रतिषेधः। तादृशः आसीः किं? दिव्यस्त्रीसंसेव्यमानस्य तवेदमनुचितमित्यर्थः। एवं नोचेदन्यथा यदि मे वद मह्यं प्रत्युत्तरं देहि। तेषु कस्मादकार्षीः। केषु किमकार्षमिति कर्माधिकरणयोर्जिज्ञासा चेच्छ्रूयतां "स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु" इति। अत्र स्निग्धच्छायातरुष्विति विशेषणेन कामोपभोगानुकूलत्वं द्योत्यते। रामगिर्याश्रमेष्विति विशेष्येण स्वकृतकपटतापसत्वगोपनार्थं पुण्याश्रमस्थितिरिति व्यज्यते। वसतिं स्थानमकार्षीरित्यनेन मुग्धाल्पमानुषीवञ्चनार्थं समयं प्रतीक्षमाणस्तत्र चिरमवात्सीरित्याद्यर्थास्सुधीभिरुन्नेयाः। कविरत्र मेघसन्देशप्रथमश्लोकान्त्यपादपूरणं एवं कृतवानिति विच्छित्तिविशेषोवगन्तव्यः। अत्र स्निग्धछायातरुष्विति विशेषणस्य रामगिर्याश्रमेष्विति विशेष्यस्य च साभिप्रायत्वात् परिकर-परिकराङ्कुरौ संसृज्येते ।। 29 ।।

**कष्टंकष्टं कथमहमहो कान्तमध्यक्षिपं तं।**

**भोक्तव्ये मद्विधिविलिखिते किं स कुर्यान्महात्मा ।।**
**क्षन्तव्याहं दयित भवता मा प्रकुप्यन्तु साध्व्यः।**
**दुःखार्तानां वचसि विवशे गृह्यते केन दोषः** ।। 30 ।।

- व्याख्या -

इदानीं स्ववैमनस्यात्सम्पातायातां पतिव्रताविरुद्धां च पतिनिन्दां पर्यालोच्य खिद्यन्ती स्वोक्तमधिक्षिप्य समाधत्ते- **कष्टंकष्टमिति**। अहं स्वप्नेपि पतिविरुद्धभाषामजानतीति तदर्थः। तं सर्वदा मदनुकूलत्वेनानुभूतं कान्तं आकारेण गुणैश्च मनोहरं प्रियं कथमध्यक्षिपं आक्षिप्तवत्यस्मि। तादृशं न किञ्चिदप्यस्ति। अतोऽहमेव मूढास्मीति भावः। कष्टंकष्टं पतिनिन्दासाहसमिदं अत्यन्तदुःखावहमित्यर्थः। अहो कदाप्यनङ्कुरितस्य निन्दोद्यमस्य सद्योदर्शनादाश्चर्यं मद्विधिविलिखिते मत्पूर्वसञ्चितकर्मफले भोक्तव्ये भोगोन्मुखतामुपयाते सति स महात्मा किङ्कुर्यात् मत्कर्माधीना तद्दूरगमनप्रवृत्तिरभूदित्यर्थः। हे दयित भवता क्षन्तव्याहं अनालोच्य दोषाभ्यूहनापराधादिति भावः। साध्व्यः पतिव्रताः मा प्रकुप्यन्तु मदुक्तौ दोषान्न गणयन्तु, कुतस्तत्राह- **दुःखार्तानामिति**। दुःखार्तानां विवशे दुःखकाले स्वयमौचित्यानौचित्यमनालोच्य निर्गते वचसि केन दोषः गृह्यते न केनापीत्यर्थः। अतो दुःखपरवशया मया यद्यदुक्तं तन्न दोषायेति भावः। अत्र पूर्वश्लोके स्वोक्तायाः पतिनिन्दायाः अनेन श्लोकेन दुःखार्तानामिति विचारपूर्वकं प्रतिषेधादाक्षेपालङ्कारः ।। 30 ।।

**उत्सार्यन्ते श्वसितपवनैर्देहलीधूलयो मे।**
**प्रक्षाल्यन्ते गृहधरणयः प्रत्यहं बाष्पसेकैः ।।**
**भित्तेश्चित्रं भवति विकृतं स्विन्नगात्रानुषङ्गैः।**
**लूतातन्तुप्रकरनिचिताः मञ्चकास्ते मनोज्ञाः** ।। 31 ।।

- व्याख्या -

अथेदानीं दशभिश्श्लोकैर्नाथविरहितस्य स्वगृहस्यावस्थां प्रदर्शयति- **उत्सार्यन्त इति**। श्वसितपवनैर्देहलीधूलयः अलिन्दोपान्तपतितरजांसि उत्सार्यन्ते परिमृश्यन्ते, विरहव्यथाप्रवृत्ताः दीर्घाश्च मन्निश्वासमारुताः शोधिनीकार्यं कुर्वन्तीति भावः। गृहधरणयः गृहान्तःप्रदेशाः अहन्यहनि प्रत्यहं प्रतिदिनं अव्ययं विभक्तीत्यादिना अव्ययीभावः। अनष्टजिति टच्। बाष्पसेकैः प्रक्षाल्यन्ते मदविच्छिन्नरोदनाश्रुपाताः दैनन्दिनगृहसम्मार्जनं कुर्वन्तीति भावः। भित्तेर्भवनकुड्यस्य सम्बन्धि चित्रं पुरातनदिव्यचरित्रावगमनार्थं लेखितमालेख्यजातं स्विन्नगात्रानुषङ्गैः विरहव्यथोत्पन्नस्वेदवच्छरीरसम्पर्कैः विकृतं विवर्णं मुषितश्च भवतीत्यर्थः। ते तव मनोज्ञाः मञ्चकाः लूतानां तन्तुवायक्रिमीणां ये तन्तवस्तेषां प्रकरेण निचिताः व्याप्ताः भवन्ति। इदानीं त्वया मया चानुपयुज्यमानत्वादेव गृहशोभा प्रणष्टेति भावः ।। 31 ।।

**नाहारेऽपि प्रणयति मनश्शारिकादारिकासौ।**
**तुच्छं पुच्छं नमयति शिखी शोकमूकीकृतोयम् ।।**
**शश्वत्सिक्ताप्यनिशमयते शुष्कतां पुष्पवाटी।**
**क्षामच्छायं भवनमधुना त्वद्वियोगेन नूनम् ।।** 32 ।।

- व्याख्या -

**नेति**। शारिकायाः गृहशुक्याः असौ दारिका त्वत्परिपोषितमिदं स्त्र्यपत्यं, आहारेऽपि यदभावे प्राणरक्षणं न भवेत्तादृशि मृदुमधुरजम्बूफलदाडिमीबीजक्षीरान्नाद्याहारेऽपि मनः न प्रणयति न योजयति, त्वद्दर्शनाभावप्रयुक्तव्यथयेति भावः। अयमेषः शिखी च त्वद्बोधितया मया तालैस्सिञ्जावलयसुभगैः नर्तितः इदानीं शोकमूकीकृतस्सन् पुच्छं स्वबर्हभारं तुच्छं विकृतं यथातथा नमयति नोर्ध्वमुखं प्रसारयति, त्वददर्शनव्यथयेति भावः। नमयतीत्यत्र नमेरमन्तत्वेन मित्वात् मितां ह्रस्व इति ह्रस्वः। पुष्पवाटी त्वद्गृहपृष्पवाटी शश्वत्पुनःपुनः सिक्तापि जलसेकादिना सादरं प्रवर्ध्यमानाऽपि शुष्कतां शुष्कीभावमयते, न पल्लविता पुष्पिता वा भवति। सापि त्वद्विपत्तिमन्तस्संज्ञया ज्ञात्वा खिद्यतीति भावः। "अन्तस्संज्ञा भवन्त्येते तरुगुल्मलतादयः" इति विष्णुपुराणे। अत एवाधुना त्वद्वियोगेन भवनं क्षामच्छायं भवति नूनं सत्यमित्यर्थः। मेघसन्देशे गृहवर्णनप्रस्तावे "क्षामच्छायं भवनमधुना मद्वियोगेन नूनं" इत्युक्तम्। अत्र तु त्वद्वियोगेनेति युष्मच्छब्दविनिमयमात्रेण विच्छित्तिरुपदर्शितेति ध्येयम् ।। 32 ।।

**रक्ताशोकस्तव विरहतस्तप्यते केसरश्च।**
**द्वौ मुञ्चन्तौ परिणतिपतत्पाण्डुपत्राश्रुबिन्दून् ।।**
**प्रोद्यच्छाखासमुदयभुजालिङ्गितान्योन्यगात्रौ।**
**काकारावैः प्ररुदित इव प्राप्तकाकुप्रकारैः** ।। 33 ।।

- व्याख्या -

पूर्वं तावत् "रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः" इत्यादिना महावैभवं प्रदर्शितं। इदानीन्तु हैन्यं दर्शयति- **रक्ताशोकइति**। रक्ताशोकः गृहाजिरोत्पादितः केसरश्च तव विरहतस्तप्यते शुष्कीभवति प्रभुनाशप्रयुक्तोयं शोषइति भावः। द्वौ पूर्वोक्तकेसररक्ताशोकौ परिणत्या परिपाकेन पतन्ति यानि पाण्डुपत्राणि तान्येवाश्रुबिन्दूनिति रूपकं। तान्मुञ्चन्तौ सन्तौ प्रोद्यन्तीनामुन्नमन्तीनामूर्ध्वमुखानामिति यावत्। शाखानां समुदय एव भुजास्तैरालिङ्गितान्योन्यगात्रौ च सन्तौ प्राप्तकाकुप्रकारैः उपगतविकृतध्वनिविशेषैः काकारावैः, न तु भ्रमद्भ्रमरसम्भ्रमकोकिलकुलकोलाहलैः, प्ररुदित इव प्ररोदनं कुरुत इवेति रूपकसमुत्थापितेयमुत्प्रेक्षा। लोके हि यथा बन्धुजनविरहितौ अन्तस्तप्यमानावश्रुपातपूर्वकमन्योन्यमालिङ्ग्य विकृतस्वरैः प्ररुदितस्तद्वदिति भावः ।। 33 ।।

**कीर्णैर्जीर्णैररुणकमलैः प्राप्तकाषायवेषा।**
**शैवालौघैर्बिसपरिचितैश्शीर्षतः कीर्णकेशा ।।**
**पद्माक्षौघैः परिवृततनुर्भस्मितालङ्क्रियाऽसौ।**
**वापी चापि व्यथयति मनो दीनकात्यायनीव** ।। 34 ।।

- व्याख्या -

अथ विलासवापीदशां प्रदर्शयति- **कीर्णैरिति**। जीर्णैरत एव समन्तात्कीर्णैः अरुणकमलैः कोकनददलैः प्राप्तकाषायवेषा अन्यत्र काषायवसनाच्छादिता बिसपरिचितैः धवलकमलनालसंमिलितैः शैवालौघैः शीर्षतः कीर्णकेशा आपादतलमस्तकं प्रलम्बमाननीलशुक्लकचकलापवती। विशेषणद्वयेन "कात्यायिन्यर्धवृद्धा स्यात्काषायवसनापि च" इति तत्स्वरूपं प्रदर्शित भवति। पद्माक्षौघैः परिणतकमलबीजैः, अन्यत्र कमलाक्षमालाभिः, परिवृततनुः भस्मिता नाशिता, अन्यत्र भस्मसम्मिलितेति यावत्। तारकादित्वादितच्। तादृश्यलङ्क्रिया यस्या इति अत्र पद्माक्षेति रुद्राक्षाणामप्युपलक्षकं। भस्मितालङ्क्रियेति लिङ्गात्। एवञ्च विष्ण्वाराधनकाले तस्याः पद्माक्षमालाधारणं, शिवपूजाकाले रुद्राक्षधारणमिति तत्त्वं। एतादृशी असौ वापी दीनकात्यायिनीव भिक्षार्थं गृहाद्गृहमटन्ती सेव मनो व्यथयति। एवं ते विलासवापी दीनावस्थां गमितेति भावः। श्लिष्टोपमा ।। 34 ।।

**अस्मद्भोगोद्यमघुमघुमत्कन्दराऽऽवासकाले।**
**सानुक्रोशं सभयमपि मां सानुषु क्रीडयित्वा ।।**
**यानि प्रौढान्यसकृदकरोर्वृत्तवृत्तानि तानि।**
**क्रीडाशैलस्स्मरयति मया त्वद्रहस्सङ्गतानि** ।। 35 ।।

- व्याख्या -

अथ क्रीडाशैलवृत्तान्तमाह- **अस्मदिति**। आवयोर्यः भोगोद्यमः सुखानुभवानुकूलगन्धपुष्पताम्बूलैलालवङ्गकस्तूरीहिमवालुकादिसुगन्धिद्रव्यनिवेशनसम्भ्रमः तेन घुमघुमन्ती या कन्दरा गुहा तत्र आवासकाले आवयोः स्थितिकाले सानुक्रोशं सदयं सभयञ्च यथातथा, मसृणगिरिप्रस्थात्प्रतेत् पादप्रतिघातो भवेद्वेति चिन्तयेति भावः। सानुषु मां क्रीडयित्वा सञ्चार्य यानि प्रौढानि रहस्सङ्गतानि असकृदनेकवारान् अकरोः, तानि त्वद्रहस्सङ्गतानीति कर्मनिर्देशः। क्रीडाशैलः स्वगृहोपान्ते विहारार्थं कल्पितो गिरिः कर्ता मया स्मरयति, सोत्कण्ठमहं तं स्मरामीत्यर्थः। अत्र स्मरयतीत्यत्र "स्मृ आध्यान" इति मित्संज्ञया "मितां ह्रस्व" इति ह्रस्वः। मयेत्यत्र "गतिबुद्धि" इत्यादिना न कर्मत्वं, स्मृतेर्बुद्धिविशेषत्वात्, गतिबुद्धीत्यादौ बुद्धेस्सामान्यज्ञानपरत्वस्य शास्त्रज्ञैर्विवक्षितत्वाचेति ज्ञेयम् ।। 35 ।।

# महाकविरङ्गनाथशर्मप्रणीतं

# एकचक्रम् नाम नाटकम्

पात्रपट्टिका

सूत्रधारः

कुन्ती

भीमः

युधिष्ठिरः

अर्जुनः

नकुलः

सहदेवः

ब्राह्मणः

ब्राह्मणी

कन्यका

बालकः

बकः

।।श्रीः।।

# एकचक्रम्

(नान्द्यन्ते सूत्रधारः)

**निखिलजगदधीशं सर्वधीसाक्षिभूतं**
**शबलितगुणयोगात्कल्पिते विश्वरङ्गे।**
**निरवधिनवनाट्ये नर्तयन्तं नटन्त**
**प्रणमत विभुमाद्यं सूत्रधारं महान्तम्।।१**

(पुष्पाणि विकीर्य)

अहो! धन्येयं भारतभूमिः। यैषा

**गिरिवनजलपुष्पैः सर्वतः शोभमाना**
**मृदुवहपवमाना पावनी रत्नगर्भा ।**
**शुभचरितविधात्री धर्मशान्त्योः सवित्री**
**मम हृदयमुपास्ते सौख्यदात्री प्रजानाम्।।2।।**

वेदवेदाङ्गविदुषां समस्तजनकल्याणकाङ्क्षिणां जन्मभूमिरियम्। साधु खल्विदमुच्यते-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः** ।। ३।। इति ।

परन्तु कालमहिमा दुरत्ययः । उत्पद्यते किल जनो यो दुर्मनायते गुणेषु । य एषः सनातनीं सूनृतां संस्कृतवाणीं निन्दति, सौरीं प्रभामपलपति, चान्द्रमसीं पटेनाच्छादयति। भवति किल कण्टकीतरुराम्रवणेषु। भारतजननी सम्प्रति-

**सत्यपि प्राज्यसाम्राज्ये सत्सु प्राज्ञसुतेष्वपि।**
**दुर्जनैरभिभूतैषा कुन्तीव परिशोचति ।।४।।**

(निर्गच्छति)

(ततः प्रविशति कुन्ती)

**कुन्ती-** (आत्मगतम्) अहमस्मि कुन्तीभोजेन पालिता कुन्तीति विश्रुता लोके । पितृसङ्केतितं 'पृथा' इति नामधेयं तु जनैर्विस्मृतप्रायम् । शूरसेनमहाराजो मे पिता । मारिषा च माता । हन्त । स्वप्नायितमिव मे पित्रोः स्मरणम्। नारीणां सौख्यत्रयमामनन्ति वृद्धाः । शैशवे पितृसौख्यम्, यौवने पतिसौख्यम्, वार्धके पुत्रसौख्यश्चेति।

अहं तु सौख्यत्रयेणापि वञ्चितास्मि मन्दभाग्या । शैशव एव मातापितृभ्यां विरहिता कुन्तीभोजाय दत्तास्मि। यौवने च पाण्डुचक्रवर्तिनः पट्टाभिषिक्ता महिषी क्षणमन्वभवं राजभोगं, विद्युद्विलसितमिव यामिनी । शापोपहतेन भर्त्रा सह वनात् वनमटन्ती तेनापि विप्रयुक्ता । वार्धके च गतिरीदृशी ।

हन्त! अस्ति कुरुपितामहः परपुरञ्जयो भीष्मः। अस्ति मे देवरो महामना धृतराष्ट्रः। अस्ति च विद्यागुरुर्द्रोणाचार्यः कृपाचार्यश्च । द्वेधा विभक्तं तु भारतसाम्राज्यं, दायादमात्सर्येण केवलम् ।

पञ्च मे पुत्राः सन्ति देवेन्द्रकल्पाः भरतवंशप्रदीपाः । अहो दैवपारुष्यम्! एकचक्रायामेते भिक्षामटन्ति । कष्टं भोः कष्टम् !

**भाग्यशाली प्रसूतव्यो न शूरो न च पण्डितः**
**शूराश्च कृतविद्याश्च मत्पुत्राः भैक्षजीविनः।।५।।**

(ततःप्रविशति भीमसेनो भिक्षापात्रहस्तः)

**भीमः**- (सोद्वेगमात्मगतम्)

**जन्मापि वंशे विशदे हिमांशोः**
**दायादता पाण्डुमहीश्वरस्य।**
**भैक्षेण वृत्तिः परगेहवासः**
**धिग्भीमसेनं धिगिमौ च बाहू।।६।।**

(पुनरपि) **धिग्भीमसेनं धिगिमौ च बाहू।**

**कुन्ती-** (आलोक्य) सोद्वेग इव लक्ष्यते वत्सो भीमः

भीमः- साधु लक्षितम्।

**सवित्री शूराणां कुरुकुलमहीशस्य महिषी**
**स्वपुत्रैरानीते कतिपयगृहेभ्यः प्रतिदिनम्।**
**कदन्ने सन्धत्ते यदि सकुतुकं दृष्टियुगलं**
**कथं सीमन्तिन्यः प्रसवमभिकाङ्क्षेयुरपराः।।7।।**

**कुन्ती-** वत्स, किमवाच्यमभिहितं केनापि कुटुम्बिना ?

**भीमः-** **अवाच्यं वाच्यं वा किमिव चरतां भैक्षमनिशं**
**प्रहारं हारं वा खर इह समानं गणयति।**
**धनुः सज्यं त्यक्त्वा दधति यदि मे पाण्डुतनयाः**

**कपालं तच्चित्रं दलति न हि तेऽद्यापि हृदयम् ।।८।।**

**कुन्ती -** (सबाष्पम्) भीमसेन, नूनं वज्रहृदयास्मि मन्दभाग्या।

**भीमः -** (सविमर्शम्) अम्ब, अलं रुदित्वा। ननु क्षत्रियासि ।

प्रवृद्धोयः पूर्वं विषमविषदिग्धान्नहविषा
प्रदीप्तो यो लाक्षागृहदहनमित्रेण मरुता।
समिन्धे क्रोधाग्निर्मम स धृतराष्ट्रस्य तनयान्
खलान्भस्मीकर्तुं, यदि न खलु रुन्धेऽत्र भवती।।९।।

**कुन्ती -**वत्स, क्षमा हि परमं धनम् ।

**भीमः-** किमिवास्ति भिक्षुकाणामपरं धनम् ?

(ततः प्रविशति युधिष्ठिर अर्जुननकुलसहदेवैरनुगम्यमानः )

**युधिष्ठिरः-**सत्यम्।

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः।।१०।।

**भीमः-**(सवैलक्ष्यस्मितम्) समागताः शमिनां धुरन्धराः।

**युधिष्ठिरः-** वत्स, पाण्डवधुरन्धरो हि भवान्। यस्य बाहुबलमाश्रित्य रक्षिता वयं लाक्षागृहहुताशनात्।

**भीमः-** सोऽयं रक्ष्यत इदानीं सोदरैरानीतेन भिक्षान्नेन।

**युधिष्ठिरः-** वत्स, त्यज मानसं कषायम् । दैवं हि दुरतिक्रमम् ।

**अर्जुनः-**दैवं पृष्ठतः कृत्वा पौरुषमाश्रयन्ते पुरुषर्षभाः। पश्य ।

**चापाचार्यस्त्रिभुवनजयी शस्त्रविद्यागुरुर्मे**
**नासारज्ज्वा पशुरिव मया यस्य कारुण्यलेशात्।**
**कृष्टो युद्धे निखिलबलमुच्छिद्य पाञ्चालराजः**
**सोऽहं धन्वी यदि नरपते, किङ्करं विद्धि दैवम् ।।११।।**

**युधिष्ठिरः-** अर्जुन, जानामि ते पराक्रमम् । समर्थोऽसि शत्रुनिबर्हणे । किन्तु पितृव्यस्य धृतराष्ट्रस्याभिमतमविज्ञाय नास्माभिश्चेष्टितव्यम्।

**नकुलः**- खलु न विज्ञायते तदभिमतम् । सोऽयं पितृव्यः,

**पितेव पालितो येन जन्मान्धश्चक्रवर्तिना ।**

**तस्यात्मजान् निर्विशङ्कं यो निष्कासितवान् गृहात्।।१२।।**

**युधिष्ठिरः-** वत्स, अस्ति पितामहो भीष्मः। अस्ति च धनुराचार्यो द्रोणः । तौ किलास्माकं हितं द्रक्ष्यतः।

**सहदेवः-** आर्य, निर्मलं हृदयं किल सर्वमात्मनीनमाकलयति। पश्य।

**वयं पितृव्यसंमानात् प्रयान्तो वारणावतम्।**

**मृगा इव वधस्थानं ताभ्यामेवानुमोदिताः।।१३।।**

**भीमः-** सम्यगाह सहदेवः।

**कर्तुर्विनिन्दितं कर्म तथा तदनुमोदितुः।**

**अन्तरं नैव पश्यामि सर्पसौनिकयोरिव ।।१४।।**

**युधिष्ठिरः-** सर्वे भवन्तो विनीताः सुष्ठु मन्त्रयन्ते । परिपालयन्तु भगवतो वेदव्यासमहर्षेर्वचनम् । यदाह तत्रभवान् अस्माकमेकचक्रानगरवासमुद्दिश्य “वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः” इति।

**कुन्ती**- युज्यते। पुत्रकाः, आगच्छत । विभजामि भैक्षम्।

(सर्वे निष्क्रान्ताः)

।।इति प्रथमोऽङ्कः।।

## अथ द्वितीयोऽङ्कः

(ततः प्रविशति कुन्ती)

**कुन्ती-** (आकर्ण्य) अये! किं नु खलु प्रतिवेशिगृहे रोदनध्वनिरिवश्रूयते । अङ्ग पश्यामि।

(ततः प्रविशति ब्राह्मणः, ब्राह्मणी, कन्यका च। त्रयोऽपि संविग्नाः। बालकश्च क्रीडन् प्रविश्य पितरावलोकयति।)

**ब्राह्मणः-** ( सविषादम्) धिक्संसारम् । नास्त्यत्र सुखलेशः। जन्मप्रभृति धर्मे श्रद्धालुना श्रान्तं मया। न स्मरामि जातुचित् धर्मे मम स्खलितम् । कोऽयं धर्मो यो न रक्षति ? यमाश्रित्य महापङ्के इव गजः सीदामि । मोक्षस्तु नभसःपृष्ठे । ( सविमर्शम्) अर्थकामावेव पुरुषार्थौ यदि राजा सम्यक् पालयति। 'राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ' इत्यस्ति नीतिविदां वचनम् । मया तु विपर्यासितम्। ब्राह्मणि, न त्वया मम वचनं श्रुतं येनेयं विपत्तिः शिरसि निपतिता।

**ब्राह्मणी-** आर्य, जानासि मे त्वयि भक्तिम् । किं वा दुरनुष्ठितं मया?

**ब्राह्मणः-** स्मरसि यन्मया नगरादन्यत्र गन्तुं व्यवसितम् ? दुर्बलो दुर्मेधाश्चास्य नगरस्य राजा । अत्र निवासो नास्माकं क्षेमङ्करम् इत्यसकृदुक्तं मया । त्वया तु नानुमोदितं, न विमृष्टम्। 'इह जाता विवृद्धास्मि मातापितरौ चात्र निवसतः' इत्युक्तवती त्वम् । अदूरदर्शिनी खल्वसि । अधुना तु-

**स्वर्गतस्ते पितावृद्धो माता चानुगता पतिम्।**
**बान्धवा भूतपूर्वाश्च का तवात्र पुरे रतिः ।।१।।**

**ब्राह्मणी-** आर्य, अनुत्तरास्मि । (अश्रूणि मुञ्चति)

**ब्राह्मणः-** साध्वि, शोकनिर्विण्णेन किमपि मया जल्पितम् । मा भूद्विषादः। सर्वदा हि त्वम्-

**सुशीला सत्त्वसम्पन्ना सहधर्मचरी मम ।**
**सखी चापत्यजननी मातेव शुभकाङ्क्षिणी।।२।।**

पश्य, का गतिरिदानीम् ? यद्यहं बकासुरस्य भक्ष्यो भविष्यामि को नु त्वां पुत्रौ च पालयिष्यति ? वृष्टिवाताहतं जीर्णकुड्यमिव शीर्यते कुटुम्बकमिदम् । न चैकाकिनी शक्नोषि धुरं वोढुम् । न खल्वेकचक्रो रथो गच्छति।

**ब्राह्मणी-** आर्य, अलं चिन्तया । अहमेव यास्यामि राक्षसनिकटम्।

**अयं हि परमो धर्मो नारीणां सम्प्रकीर्तितः।**
**प्राणानपि परित्यज्य यद्भर्तुर्हितरक्षणम् ।।३।।**

**ब्राह्मणः-** (सकरुणम्) भद्रे, मैवं वोचः।

**कुमारं कन्यकाश्चैव प्रसूय कुलतारिणीम्।**
**दैत्याय चेत् बलिं दद्यां पित्रे कृपणजीवितम्।।**
**ममैव जीवितस्यार्थे पत्नीं कल्याणिनीं सतीम्।**
**किं नु जह्यां सुखापेक्षी मतिहीनस्त्रयीमिव।।५**

कष्टं भोः कष्टम्।

**ब्राह्मणी-** आर्य, स्त्रीति मन्यमानः सानुकम्पो भूत्वा स दैत्यो मां विसृजेदपि।

**ब्राह्मणः-** सौम्ये, न हि व्याघ्रो हरिणीम् अनुकम्पमानो दृष्टः।

**कन्यका-** अम्ब श्रूयतां मम वचनम् । तातेन विनाकृता त्वं सत्यं प्राणान् न धारयिष्यसि । युवाभ्यां विहीनाहं नैव

जीवितुं शक्ष्यामि । सत्येवं कुतो नु जीवितशङ्का ममानुजे बालके ? धर्मतोऽहं कदाचित्परित्याज्यैव । 'अर्थो

हि कन्या परकीय एव ' । तात, अधुनैव मां परित्यज्य कुलं त्रायस्व। यास्यामि राक्षसमुखकुहरम्।

(उभौ कन्यकां परिष्वज्य )

**ब्राह्मणः-** मैवं मैवं पुत्रिके,

**नैव श्येनाय दास्यामि प्रियां गृहशकुन्तिकाम्।**

**ब्राह्मणी-** वत्से,

**कथङ्कारमिदं श्रुत्वा हृदयं मे न दीर्यते।।६।।**

(सर्वे रुदन्ति)

बालकः -(वेत्रलतामादाय) तात, मा रुदः। अम्ब, मा रुदः। अक्क मा रुदः। अनेन दण्डेन तं राक्षसं हनिष्यामि।

(सर्वे बाष्पाणि मार्जयन्तः स्मयमानाः बालकमालिङ्गन्ति।)

(ततः प्रविशति कुन्ती)

**कुन्ती -** पूजनीय, तपोधन, कुतोमूलमिदं दुःखम् ? तत्त्वतो ज्ञातुमिच्छामि । ज्ञात्वा च प्रतिकर्तुं यतिष्ये यदि प्रभविष्यामि।

**ब्राह्मणः-** तपोधने, उपपन्नमेतत् सतां यदन्यदुःखसंवेदनम् । इदं दुःखं मानुषेण व्यपोहितुं न शक्यम्।

**कुन्ती –** विशदय विप्रोत्तम, यदि वाचि न मत्सरः।

**ब्राह्मणः-** हन्त! वराकस्य मे भागधेयम् । गव्यूतिमात्रे नगरात् बको नाम नरभक्षको राक्षसः प्रतिवसति ।

वैदेशिकी भवतीति ब्रवीमि। अस्य पुरस्य राजा मन्दधीर्दुर्बलश्च । राक्षसवैयात्यभीतेन राज्ञा तस्मै प्रतिश्रुतम्-

प्रतिदिनमाहारं प्रेषयिष्यामीति। शकटपूर्णं मृष्टान्नं, वृषभौ द्वौ, मानुषश्चैक इति दैत्यस्य भोजनकथा । इदं च बकासुरस्य दैनिकं बलिहरणं प्रतिदिनं पौरैः पर्यायतो देयमिति राजनियोगः । स च वारः श्वः प्रभाते ममापतितः । तदेवं दुःखार्णवे मग्नं मम कुटुम्बकम्।

**कुन्ती-** किमध्यवसितं भवता?

**ब्राह्मणः-** किमन्यत्? प्रभाते सपुत्रदारः प्रविशामि राक्षसकुक्षिम् ।

**कुन्ती-** ( सविमर्शम्) न विषादस्त्वया कार्यः। सन्ति मे पञ्च पुत्राः। तेष्वन्यतमं त्वदर्थे प्रेषयिष्यामि ।

**ब्राह्मणः-** (कर्णौ पिधाय) नैवं नैवं तपोधने ! नश्वरस्य मम जीवितस्यार्थे किमतिथिं ब्राह्मणं

प्राणैर्वियोजयिष्यामि?

> **आगतस्य गृहं घातो नृशंसो लोकगर्हितः।**
> **श्रेयान्सदारपुत्रस्य विनाशोऽद्य मम स्वयम्।।६।।**

सर्वथा नानुमन्ये तवाभिसन्धिम्।

**कुन्ती -** ब्रह्मन्, अवहितमनाः शृणु ।

**ब्राह्मणी-** विरम विरम। न दृष्टा तादृशी सीमन्तिनी लोके या दुष्टमपि पुत्रं परित्यजेत् ।

**कुन्ती –**श्रूयताम् । नास्ति मे कश्चिदनिष्टः पुत्रः । न च कोऽपि धर्मपथाच्चलितः। न च त्यजेयमेकमपि, यदि पुत्रशतं भवेत् । अस्ति मे पुत्रो मन्त्रसिद्धस्तेजस्वी वीर्यवान् । बहुधा तस्य मन्त्रवीर्यं परीक्षितम् । बलवन्तो

महाकाया राक्षसास्तेन निहताः मया दृष्टपूर्वाः। स ते राक्षसबलिं तस्मै नेष्यति निहनिष्यति च तं दुरात्मानं निश्चयेन। विश्वसिहि ।

**ब्राह्मणः**-महामातः!

> **न मानुषी वदत्येवं देवता प्रतिभासि मे।**
> **स्थाने मया तपस्तप्तं येनेदानीं प्रसीदसि ।।७।।**

**कुन्ती** – रहस्यमेतत् । न कदाचन कस्मैचिदप्याख्यातव्यम् । राक्षसं निहतं श्रुत्वा मन्त्रार्थिनो जनाः पुनः मम पुत्रान् स्वार्थाय विप्रकुर्युः । अननुज्ञाता हि गुरुणा मन्त्रविद्या परस्मै न कदाचिदुपदेष्टव्या भवति । सर्वथा गोपनीयमेतत्।

**ब्राह्मणः**-मम देवते, अनुगृहीतोऽस्मि । सत्यं महात्मनां वचनं 'धर्मो रक्षति रक्षितः' ।

।।इति द्वितीयोऽङ्कः।।

## अथ तृतीयोऽङ्कः

(ततः प्रविशति कुन्ती)

**कुन्ती –** मन्ये साध्वनुष्ठितं मया । सत्कृताः सुखं निवसामः खलु तपस्विनो विप्रस्य निवेशने । सदा चिन्तयामि किमस्य प्रियं कुर्यामिति । समुचितोऽयं कालः प्राप्तः प्रत्युपकारस्य । नागायुतबलो मम पुत्रो भीमसेनः। दृष्टं हि तस्य विक्रान्तं जतुगृहे । बलवांश्च हिडिम्बः पिष्टपेषं पेषितः । हनिष्यति मे पुत्रको बकहतकम् । चोदयिष्यामि वत्सं भीमसेनम् । न जाने किं वक्ष्यति युधिष्ठिरः ।

(ततः प्रविशति भीमः)

**भीमः**- (सावेगमात्मगतम् ) दुर्योधनहतक, निष्कण्टकं मन्यसे किल हस्तिनावतीप्रभुत्वम् ।

जतुगृहव्यतिकरेण दग्धानवगच्छसि पाण्डुपुत्रान् । निर्लज्ज, जीवन्ति पाण्डुपुत्राः। जागर्त्ययं भीमसेनस्तव मृत्युः। गणयस्व दिनानि ।

( कुन्तीं दृष्ट्वा ससम्भ्रमम् ) अये! अम्बा। अम्ब, किमपि गभीरं चिन्तयसीव।

**कुन्ती-** पुत्रक, दैववञ्चिताया मम चिन्ता भवति सहभूः।

**भीमः-** अम्ब, न खलु विमनायितव्यं भवत्या । वीरप्रसूरसि। अद्यापि धरते भीमः। व्यपैतु ते शोकः। समयं प्रतीक्षस्व केवलम्।

**कुन्ती-** जानामि, वत्स, जानामि । सन्ति मे पुत्रा अप्रतिमशूरा गुणशालिनश्चेति प्रत्याशया जीवामि । इदानीमसंमन्त्र्य पुत्रैः सह किञ्चित् साहसं कृतमिति तप्यते हृदयम् ।

**भीमः** –(विलोक्य) मातः, भवत्या वचनमेवास्माकं संमन्त्रणम् । कदाचिदप्यविमृश्य न क्रियते भीमजनन्या । यदि वा कृतं समीकरिष्यते भीमेन।

**कुन्ती -** पुत्रक, किञ्चित् प्रतिश्रुतं मया प्रतिवेशिने ब्राह्मणाय ।

भीमः- सम्यगनुष्ठितम् । आतिथेयः किल तत्रभवान् उपकर्ता वसतिप्रदानेन।

**कुन्ती -** आकर्णय, अस्य पुरस्यादूरवर्तिनि पर्वते वसति बकनामा दैत्यः।

**भीमः-** श्रुतं तस्य दुरात्मनो वृत्तम् । पर्यायक्रमेण तस्मै बलिमाहरन्ति पौराः ।

**कुन्ती –** श्वः प्रभाते भवत्यस्य विप्रस्य पर्यायः।

**भीमः** - बाढम्।

**कुन्ती** - न चैतावत् । मानुषभोजी स राक्षसः श्रूयते । भोज्यसमाहारे मानुषोऽपि तस्मै प्रेषयितव्यः। तस्मात् बालकस्य पिता तपस्वी शोचति ।

**भीमः**- विदितमवशिष्टम् । मत्पुत्रेषु कोऽपि प्रेषयिष्यत इति भवत्या प्रतिश्रुतम् ।

(कुन्ती मौनमवलम्बते)

**भीमः**- मात, नास्त्यत्र किमप्यनुशोचितव्यम् । क्षत्रियाण्या यदुचितं तदनुष्ठितम् । युक्तोऽयं प्रतिश्रवः। श्रोत्रियोऽयं प्रतिवेशी प्रत्युपकारमर्हति । पश्य-

**भैक्षप्रदानेन चिरं पौरैरुपकृता वयम् ।**
**कृतं प्रतिकृतं स्यादेष धर्मः सनातनः ।।१।।**

अहमेव बकासुरमभिगमिष्यामि।

**मातस्तवाशिषा सत्यं पोथयिष्यामि दानवम्।**
**चिरं जीवन्तु नगरे साधवश्चाकुतोभयाः ।।२।।**

**कुन्ती** - वत्स, भीम, अनुरूपमभिहितं भरतवंशप्रदीपेन मम पुत्रेण । भक्ष्यभोज्यादिकं मृष्टान्नं शकटपूरं पूरयित्वा प्रेषणीयं भवति राक्षसाय । तदेतत्सज्जीक्रियतामिति चोदयिष्यामि ब्राह्मणकुटुम्बम्।

**भीमः**- अहो! प्रियं मे सज्जीक्रियताम् । अपरमिदं प्रियमनुष्ठितं मे भवत्या । प्रभूतमुपाहरिष्यते भोजनम्।

(ततः प्रविशन्ति युधिष्ठिरादयः )

**युधिष्ठिरः** - (विलोक्य) अये ! हर्षेण उत्फुल्लाक्ष इव वत्सो भीमः ।

**भीमः** – प्रभूतमुपस्थितं मे भोजनम् ।

अर्जुनः - स्थाने खलु प्रहर्ष औदरिकस्य !

**नकुलः** - ओष्ठौ स्फुरत इवाग्रजस्य !

**भीमः**- पश्य बाहू अपि स्फुरतः।

**सहदेवः**- अपि हस्तद्वयेन भोक्ष्यसे ?

**भीमः**- तदपि भविष्यति । न केवलं भोजनमुपस्थितं । अयोधनमपि ।

**युधिष्ठिरः**- अयोधनमिति। केन?

**भीमः**- बकासुरेण ।

**युधिष्ठिरः** – अम्ब, किमिदानीमुपक्षिप्तम् ?

**कुन्ती**- पुत्रक, बकासुरस्य भोजनपरिकल्पनं जानीथ पौराणाम् । तदिदानीं पर्यायपतितं प्रतिवेशिनो ब्राह्मणस्य ।

**युधिष्ठिरः**- ततस्ततः।

**कुन्ती**- स खल्वेकपुत्रस्तपस्वी भृशं परिदेवयते ।

**युधिष्ठिरः**- ज्ञातमवशिष्टम् । मातः, न खलु भवत्या अध्यवसितं समर्थये ।

**कथं परार्थे धीमन्तं तनयं त्यक्तुमिच्छसि।**

**मोहिताः दुःखदोषैस्ते न बुद्धिस्साधुदर्शिनी ॥३॥**

यस्य वीरस्य भुजबलमाश्रित्य वयं सुखं शेमहे, यच्च चिन्तयन् दुर्योधनो निद्रां न लभते, तस्य भीमस्य प्रेषणं कथं त्वया सङ्कल्पितम्? अहो! अत्याहितं। अविमृश्यकारी स्त्रीजनः ।

**भीमः**- धर्मं विजानता भवता धर्मसङ्ग्रहोऽत्र द्रष्टव्यः । नहि मातुराज्ञा प्रत्यादेशमर्हति।

**युधिष्ठिरः**- वत्स, भीमसेन, बलवान्मानुषभोजी स राक्षस इति श्रूयते।

**भीमः**- ततः किम्? राक्षसध्वंसी भीमः स्मर्यते। अलं विशङ्कया । हनिष्यामि तं दुरात्मानम्।

**अर्जुनः**- धनुर्धरोऽहमनुगमिष्यामि ।

**भीमः**- मा मैवम् । न हि खरदंष्ट्रो मृगाधिपः सहायमपेक्षते।

**इमौ हि पीवरौ बाहू सहायौ सहजा मम।**

**बकं विध्वंसयिष्यामि सिंहः क्षुद्रमृगं यथा।।४।।**

।।इति तृतीयोऽङ्कः।।

# हेच्. वि.नागराजरावरचिता

# ऋणविमुक्तिः

## 1

पूर्वा दिक् अरुणकिरणैः शोभमाना सूर्यस्य आगमनं सूचयति स्म । तावत्पर्यन्तम् अन्धकारेण आवृतं निर्जीवमिव स्थितं जगत् तेषां किरणानां स्पर्शेन किञ्चित् सचेतनमिव भवति स्म । निःशब्दे अरण्ये कश्चन पक्षी मधुरं कूजित्वा दिवसस्य तस्य जगद्व्यापाराणां नान्दीम् आचरत् । ब्राह्मः मुहूर्तः उपस्थितः इति तेन ज्ञात्वा महर्षिः उद्दालकः निद्रां विमुच्य पर्णशय्यातः उत्थितवान् । करतलद्वयं दृष्ट्वा तत्र सङ्कल्पेन देवतानाम् आह्वानं कृत्वा क्षणमात्रं ध्यात्वा पर्णशालातः बहिः आगतवान् ।

महर्षेः उद्दालकस्य विशालः आश्रमः तमसानद्याः तीरे आसीत् । पञ्चषाः ऋषयः, अनेके शिष्याः च तत्र वसन्ति स्म । वेदानां  शास्त्राणां च अध्ययनं तत्र प्रवर्तते स्म सततम् । सर्वेषु शिष्येषु महर्षेः इष्टतमः खगोदरः । तं सर्वे प्रीत्या 'कहोड' इति आह्वयन्ति स्म ।

''कहोड, ब्राह्मः मुहूर्तः उपस्थितः । उत्तिष्ठ'' इति महर्षिः उच्चैः उक्तवान् । क्षणमात्रेण शय्यातः उत्थितः कहोडः - ''गुरुभ्यो नमः'' इति महर्षेः पादौ स्पृष्ट्वा तस्य आशीर्वादं प्राप्नोत् । ततः वल्कलयुग्मं कमण्डलुं च आनीतवान् ।

''तमसायां स्नात्वा आगमिष्यामः'' इति वदन् महर्षिः प्रस्थितः । कहोडः गुरुम् अनुसृतवान् ।

तावति काले आश्रमस्य इतरे मुनयः वटवश्च उत्थाय नदीतीरं गन्तुं सिद्धाः अभवन् । प्रातर्विधिं समाप्य सर्वे तमसां प्राप्तवन्तः । 'लोकस्य सर्वं तमः क्षालयिष्यामि' इति कल्पयन्ती इव तमसा मञ्जुलेन नादेन प्रवहति स्म । तस्याः शुभ्रे जले स्नात्वा सर्वे देहस्य अन्तःकरणस्य च शुद्धिं प्राप्तवन्तः ।

पूर्वस्यां दिशि सूर्यस्य कान्तिपूरितं रक्तवर्णं बिम्बम् अर्धोदितं दृश्यते स्म ।

''सूर्यमण्डले विराजमानाय देवाय सवित्रे गायत्र्या अर्घ्यप्रदानं कुर्वन्तु'' इति महर्षिः उद्दालकः आदिष्टवान् । 'ओम् भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्' इति पवित्रं मन्त्रम् अर्थानुसन्धानपूर्वकं त्रिवारम् उच्चार्य सर्वे अर्घ्यं दत्तवन्तः । ततः जपं सूर्योपस्थानं च कृत्वा आश्रमम् आगताः ।

समग्रं विश्वं शाखाभिः व्याप्तुं प्रयतमानस्य इव महतः वटवृक्षस्य मूले रचितायां वेदिकायां महर्षिः उद्दालकः उपविष्टवान् । सर्वे शिष्याः तदभिमुखम् उपविष्टवन्तः । महर्षेः अनुज्ञां लब्ध्वा शान्तिमन्त्रान् उच्चैः पठितवन्तः । ततः वेदाध्ययनं प्रवृत्तम् । स्वरबद्धं गम्भीरं वेदपठनं समस्तम् अपि अरण्यं सत्यलोकमिव करोति स्म ।

"अधुना प्रत्येकं छात्रः अपि अधीतपूर्वस्य वेदानुवाकस्य पठनं करोतु" इति महर्षिः उक्तवान् ।

कहोडस्य पठनं समीचीनं निर्दोषं च आसीत् । अन्येषां न तथा । गौतमाख्यः शिष्यः सर्वं सदोषम् एव पठति स्म ।

"गौतम ! वेदस्य सदोषं पठनं महते अनर्थाय भवेत् । निर्दोषं पठितुं यत्नं कुरु" इति महर्षिः उद्दालकः उक्तवान् ।

गौतमः शिरः नमयित्वा भूमिं दृष्टवान् । 'महर्षिः सदा कहोडं प्रशंसति, मां निन्दति, मयि दोषम् एव पश्यति' इति सः भावयति स्म ।

"अद्य अलम् एतावता अध्ययनेन । मम वैश्वदेवस्य समयः उपस्थितः । मुनिपत्नीभिः दीयमानम् आहारं भुक्त्वा यूयं गोसेवायै गच्छत । यज्ञाय समिधाहरणं च कुरुत । शुभम् अस्तु" इति उक्त्वा महर्षिः उत्थितः ।

"गुरुभ्यो नमः" इति वदन्तः सर्वे वटवः स्वस्वकार्याय प्रस्थिताः ।

कहोडः अपि गोशालां मार्जयित्वा, गाः क्षालयित्वा ताभ्यः हरितानि तृणानि अर्पितवान् । गोवत्सान् प्रथमं क्षीरं पाययित्वा ततः दोहनकार्यम् आरब्धवान् । यदा घटः क्षीरेण पूर्णः तदा तं नीत्वा गुरुपत्न्यै दत्तवान् । महति पात्रे चुल्ल्याः उपरि स्थापिते क्षीरं निक्षिप्य सा अधस्तात् अग्निं प्रज्वालितवती ।

"कहोड, इन्धनं न पर्याप्तम् । कानिचित् शुष्काणि काष्ठानि आनय" इति उक्तवती गुरुपत्नी ।

"भवतु, शीघ्रम् आनयामि" इति उक्त्वा कहोडः आश्रमात् बहिः गत्वा कानिचित् शुष्काणि काष्ठानि आनीय दत्तवान् ।

गुरुपत्नी अग्निं प्रज्वाल्य क्षीरं क्वथितवती । ततः उक्तवती - "कहोड, वटून् आह्वय । क्षीरं पिबन्तु सर्वे ।"

"तथा" इत्युक्त्वा कहोडः आदेशं पालितवान् । सर्वेभ्यः वटुभ्यः क्षीरं वितीर्णम् ।

“वटवः, गु्ुडः नास्ति । यावत् कश्चन राजा धनिकः वा गुडम् आश्रमाय न दास्यति, तावत् गुडरहितमेव क्षीरं पातव्यं युष्माभिः” इति गुरुपत्नी उक्तवती ।

“अम्ब, भवत्या सप्रीति दीयमानं सर्वमपि पीयूषायते । अतः चिन्ता मास्तु” इति वटवः उक्तवन्तः । ततः ते समिधाहरणाय प्रस्थिताः ।

“कहोड, यदि तव कार्यान्तरं नास्ति, तर्हि एतां मम पुत्री किञ्चित् अवेक्षस्व । मम पाककार्यम् अस्ति” इति गुरुपत्नी उक्तवती । कहोडः शिशुं हस्ताभ्यां गृहीतवान् ।

“अम्ब, भवती निश्चिन्ता भवतु । अहम्  एताम् इतस्ततः नेष्यामि । मृगान् पक्षिणश्च दर्शयित्वा हासयिष्यामि” इति वदन् कहोडः बहिः गतवान् ।

शिशोः वयः पञ्चषाः मासाः । नामधेयं सुजाता । तस्याः मन्दहासः सर्वान् आकर्षति स्म । कहोडः तां नीत्वा अरण्यस्य वृक्षान् प्राणिनश्च दर्शयित्वा स्वल्पकालानन्तरं मात्रे अर्पितवान् ।

## 2

उद्दालकमहर्षेः आश्रमे बहवः ब्रह्मचारिणः आसन् । हारीतरोमहर्षणादयः ऋषयः सपत्नीकाः तत्र वसन्ति स्म । महर्षेः पर्णकुटीं परितः इतराः पर्णकुट्यः आसन् । यज्ञेषु ऋषिभिः दक्षिणारूपेण प्राप्ताः धेनवः, तैः प्रीत्या पालिताः मृगाः च आश्रमस्य निवासिनः आसन् । समीपे तमसानदी प्रवहति स्म, अतः सदा तत्र जलसमृद्धिः । तृणानि सस्यानि च निर्बाधं रोहन्ति स्म । विविधाः फलवृक्षाः, कुसुमभरिताः लताः, इन्धनयोग्याः तरवः च कानने लभ्यन्ते स्म । अपि च भूमौ विविधानि भक्षणयोग्यानि कन्दानि सुलभानि आसन् । अतः तपस्विनां जीवनं वेदाध्ययने ध्याने तपसि च निरतम् आसीत् ।

राजानः, धार्मिकाः, धनिकाः च आश्रमाय व्रीहीन्, वस्त्राणि, गुडादीनि च प्रेषयन्ति स्म । यज्ञान् प्रवर्तयितुम् आहूताः ऋषयः भूरिदक्षिणां प्राप्नुवन्ति स्म । विद्याभ्यासाय आश्रमं प्रविष्टाः राजकुमाराः गुरुभ्यः तदिष्टं धनकनकादि च दक्षिणारूपेण यच्छन्ति स्म । इत्थम् आश्रमे वटूनां परिचालने किमपि कष्टं न आसीत् ।

आश्रमं प्रविष्टवतः कहोडस्य पञ्च वर्षाणि गतानि । तस्य पिता कस्मिंश्चन ग्रामे वसति स्म । माता तु तस्य शैशवे एव परलोकं गता । सुतस्य गर्भाष्टमे वर्षे उपनयनसंस्कारं विधाय पिता खगोदरशर्माणं, तन्नाम कहोडम् आश्रमं प्रेषितवान् वेदाध्ययनाय । वेदोच्चारणे अतीव निपुणः कहोडः महर्षेः प्रियशिष्यः

आसीत् । विधेयतया सर्वान् आदेशान् पालयन् सः सर्वेषाम् ऋषीणां, सर्वासाम् ऋषिपत्नीनां च इष्टः आसीत् ।

आश्रमस्य दिनचर्या नियमानुसारेण प्रवर्तते स्म । ब्राह्मे मुहुूर्ते उत्थानं, देहकर्मनिर्वर्तनानन्तरं तमसायां स्नानं, सन्ध्यावन्दनं, वेदाध्ययनं, दुग्धपानं, योगाभ्यासः, गोसेवा, समिधाहरणं, कन्दमूलफलादीनां सङ्ग्रहणं, मध्याह्ने भोजनम्, अपराह्णे शास्त्राणाम् अध्ययनं, सायाह्ने क्रीडाकलापः, सन्ध्योपासना, फलाहारः, यथेच्छं परिप्रश्नः, ततः निद्रा ।

कहोडस्य दिनानि अविदिततया यान्ति स्म । अध्ययने आश्रमस्य कार्येषु च सः सदा निमग्नः भवति स्म । गोदोहः, कन्दमूलफलसंग्रहणं, वल्कलक्षालनम्, आश्रममृगाणां पालनम् इत्यादि तस्य प्रियम् । गुरुपुत्री सुजाता च दिने दिने वर्धमाना कहोडात् अक्षराभ्यासादिकम् कृतवती । तेन सह आश्रमस्य परिसरे अटन्ती मृगाणां वृक्षाणां लतानां च परिचयं प्राप्नोति स्म सा ।

आश्रमस्य सर्वे विद्यार्थिनः गुरुभक्ताः, विधेयाः, अध्ययनशीलाः च । किन्तु गौतमः अपवादः अस्य नियमस्य । अनिच्छन् एव आश्रमं प्रविष्टवान् आसीत् सः । तत्रत्याः कठोराः निंयमाः तस्मै न अरोचन्त । यथा अन्ये शिष्याः संगृहीतानि फलानि मूलानि कन्दानि च गुरुभ्यः समर्प्य तैः दत्तेन तृप्यन्ति स्म, तथा गौतमः न करोति स्म । रहसि यथेच्छं भुक्त्वा अवशिष्टं यत्किञ्चित् आश्रमाय सः आनयति स्म । अध्ययने तस्य मनः न लगति स्म । अल्पवयसः वटून् भाययित्वा तैः स्वकार्याणि कारयति स्म सः ।

यदा एतत् कहोडेन अवलोकितं, तदा सः गौतमाय अकुप्यत् । तदा तदा कहोड-गौतमयोः कलहः भवति स्म ।

कदाचित् आश्रमस्य शान्तं परिसरं क्षोभयन्ती काचन घटना प्रवृत्ता । गौतमः एव तस्याः घटनायाः केन्द्रबिन्दुः आसीत् ।

आश्रमस्य अनतिदूरे भिल्लाः वसन्ति स्म । तैः सह आश्रमवासिनां कोऽपि व्यवहारः न आसीत् । ते कामपि प्राकृतभाषां भाषन्ते स्म । तेषां वेषोऽपि भिन्नः । मृगयायां निपुणाः भिल्लाः प्राणिनां हनने सदा रताः । मांसं चर्माणि च ते नगरं नीत्वा तत्र तेषां विक्रयणं कुर्वन्ति स्म ।

कदाचित् कहोडः कन्दमूलसंग्रहणाय अटन् भिल्लपल्लीपरिसरं प्रविष्टः । फलभरितं कमपि वृक्षं दृष्ट्वा फलानि अवचेतुं तं सः आरूढवान् । तदा वृक्षाग्रे उपविष्टेन तेन समीपे गुल्मानां मध्ये कामपि भिल्लतरुणीम् आलिङ्ग्य स्थितः गौतमः अवलोकितः । कहोडस्य मनसि गौतमं प्रति कोपः, जुगुप्सा,

आश्चर्यं, चिन्ता च युगपत् उदभवन् । इदानीं किं करोमि ? गुुरुभ्यः सर्वं निवेदयामि उत तूष्णीं भविष्यामि ? यदि गुरुभ्यः गौतमस्य आश्रमविरुद्धं चरितं निवेदयिष्यामि, तर्हि तस्य कीदृशः दण्डः भवेत् ? गौतमः आदितः एव गर्वी, गुरुकुलस्य नियमान् तृणाय अपि न गणयति । कहोडः वेदोच्चारणे प्रावीण्यं प्राप्य गुरूणां प्रशंसायाः पात्रं भवति इति गौतमः तस्मै असूयति स्म । इदानीं कहोडः एव मम दुश्चरितं निवेदितवान् इति गौतमः जानाति चेत् सः किं कुर्यात् ?

इत्थं विचिन्त्य कहोडः गुरुभ्यः गौतमस्य विषये किमपि न उक्तवान् । रात्रौ अपि गौतमः गुरुकुलं नागतः । महर्षिणा यदा एतत् ज्ञातं, तदा सः सर्वान् पृष्टवान् । कदाचित् गौतमः हिंस्रपशूनाम् आहुतिः स्यात् इति चिन्ता महर्षिं बाधते स्म ।

महर्षिः कहोडम् अपि पृष्टवान् - "त्वया गौतमः क्वचित् दृष्टः किम् ?"

असत्यं वक्तुम् अशक्तः कहोडः उक्तवान् - "अपराह्णे भिल्लपल्ल्याः समीपे गौतमः दृष्टः । सः कयाचन भिल्लस्त्रिया सम्भाषमाणः मया अवलोकितः ।"

एतत् श्रुतवतः महर्षेः उद्दालकस्य चिन्ता अधिका जाता । हारीतमुनिं सः उक्तवान् - "श्वः प्रातः भवान् सशिष्यः भिल्लपल्लीं गत्वा गौतमस्य विषयं विचारयतु । तम् आश्रमम् आनयतु" इति ।

परेद्यवि यदा सशिष्यः हारीतमुनिः भिल्लपल्लीं गतः तदा तत्र भयानकं दृश्यं गोचरीभूतम् । गौतमः कस्मिंश्चन वृक्षे रज्जुभिः बद्धः आसीत् । तस्य दन्तश्च कश्चन भग्नः । अधरे रक्तं स्रवति स्म ।

"गौतम, केयं तव अवस्था ?" इति मुनिः हारीतः पृष्टवान् ।

गौतमः किमपि न उक्तवान् । न च अवनतं शिरः उन्नमितवान् । तस्य लोचनाभ्याम् अश्रुबिन्दवः निपतिताः । तावता कालेन भिल्लाः तत्र आगताः । तेषां भाषा मुनिना हारीतेन ज्ञाता । अतः सः तान् पृष्टवान् - "केन कारणेन अस्माकं शिष्यं हिंसित्वा अत्र एवं बद्धवन्तः यूयम् ?" इति ।

तदा कश्चन भिल्लः उक्तवान् - "तमेव पृच्छन्तु , किं तस्य चरितं समुचितम् इति । विद्यावतः ब्राह्मणस्य तादृशं कर्म शोभते वा इति च ।"

हारीतः उक्तवान् - "सः निर्विण्णः, खिन्नः, विषण्णः च वर्तते । इदानीं तेन किमपि वक्तुं न शक्यम् । यूयम् एव वदत ।"

भिल्लनायकः उक्तवान् - ‘‘अयं दुष्टः रहस्ये अस्माकं समाजस्य कयाचन स्त्रिया रममाणः आसीत्, अस्मदीयैः गृहीतः । अस्य व्यभिचारिणः दण्डः दातव्यः किल’’ इति ।

एतत् श्रुतवतः हारीतमुनेः शिरसि वज्रपातः जातः इव । किमपि वक्तुम् अशक्नुवन् सः मौनी स्थितः । ततः कथञ्चित् धैर्यम् अवलम्ब्य गौतमम् उद्दिश्य उक्तवान् - ‘‘गौतम, किमिदं सत्यम् ? अनृतं मा वद । सत्यं वद ।’’

गौतमः किमपि न उक्तवान् । तस्य दैन्यं मौनं च अपराधस्य प्रमाणम् इति हारीतमुनिना ज्ञातम् ।

‘‘तव अपराधस्य कियान् अपि दण्डः न अलम् । वयम् अस्मिन् विषये किमपि कर्तुम् असमर्थाः । अनुभव पापस्य फलम् । गुरुकुले पुनः पदं मा स्म न्यधाः’’ इति उक्त्वा हारीतः सशिष्यः आश्रमं प्रति आगतवान् ।

महर्षिः उद्दालकः एतं वृत्तान्तं ज्ञात्वा - ‘‘दैवेच्छा’’ इति वदन् तम् अप्रियं विचारं विस्मृतवान् ।

## 3

गतानि कानिचिद् दिनानि । कदाचित् सायङ्काले कहोडस्य ग्रामात् आगताः केचन महर्षिम् अभिवन्द्य - ‘‘कहोडस्य पितुः अन्त्यकालः उपस्थितः । सः पुत्रं द्रष्टुम् इच्छति’’ इति उक्तवन्तः ।

महर्षिः कहोडम् आहूय समीपे उपवेश्य गम्भीरेण स्वरेण उक्तवान् - ‘‘कहोड, जगति सर्वः अपि जीवः मृत्योः आहारः भवति । न कश्चित् शाश्वतः इति जानासि खलु ?’’

‘‘जानामि गुरुदेव । जातस्य मरणं ध्रुवम् ।’’

‘‘मृत्युः सर्वेषाम् अपि अनिवार्यः । एतत् नित्यं सत्यम् । अतः यदा मृत्युः अभ्येति, तदा तं प्रियम् अतिथिमिव इष्टं मित्रमिव स्वागतीकुर्यात्, भीत्या विचलितः भूत्वा मनुष्यः कर्तव्याद् भ्रष्टः मा भूत् इति च त्वया ज्ञातं खलु ?’’

‘‘ज्ञातं गुरुदेव !’’

‘‘श्रूयतां तर्हि त्वया अविचलितेन । तव ग्रामात् एते जनाः आगताः । तव पिता मरणोन्मुखः अस्ति । तस्य अन्तिमं दर्शनं प्राप्तुं तथा और्ध्वदैहिकानि कार्याणि कर्तुं त्वम् एव अधिकारी । अतः एतैः साकं

स्वग्रामं गत्वा कर्तव्यं विधिवत् कृत्वा ततः आश्रमं निवर्तस्व । देवपितृकार्याभ्यां न प्रमदितव्यम् इति औपनिषदं वाक्यं न विस्मर्यताम् ।''

महर्षेः वाक्यं श्रुत्वा क्षणं कहोडः सम्भ्रान्तः । तस्य लोचनयोः अश्रूणि दृष्टानि । तथापि क्षणमात्रेण स्थिरीकृतचित्तः - ''गुरुदेव, भवतः आदेशम् उपदेशं च कदापि न विस्मरामि'' इति उक्त्वा कहोडः प्रयाणाय सिद्धः अभवत् ।

अष्टमीचन्द्रस्य मन्दप्रकाशे गन्तव्यम् अरण्यमार्गेण । मध्ये सर्पेभ्यः हिंस्र-जन्तुभ्यश्च भयम् । व्याधाः, भिल्लाः, किराताः इति तत्र तत्र अपायकारिणः जनाः । कण्टकमयः मार्गः न सुगमः । लताभिः, पतितैः वृक्षैः च अवरुद्धः । तथापि कहोडः ग्रामजनैः सह प्रयातः ।

'जन्म दत्त्वा, परिपाल्य, संपोष्य, उपनयनं कृत्वा गुरुकुलं प्रेषितवतः पितुः ऋणं कथं निर्यातयितुं शक्यते ? तस्य प्राणोत्क्रमणात् प्राक् मुखदर्शनं प्राप्तव्यम् । तेन सह भाषितव्यम्' इति कहोडस्य महती आशा । वन्यप्राणिनां गर्जनं, कीटानां ध्वनिः वा तेन न श्रूयते स्म । ग्रामजनाः मध्ये मध्ये कांश्चन प्रश्नान् कुर्वन्ति स्म तस्य अध्ययनविषये । यन्त्रवत् तेषां प्रश्नानाम् उत्तरं ददत् कहोडः यावच्छक्ति वेगेन गन्तुं प्रयतते स्म । अर्धरात्रे अरण्यम् अतीत्य ते कस्यचन ग्रामस्य समीपम् आगताः । तत्र क्वचित् सुप्ताः, प्रातः उत्थाय तटाके प्रातर्विधीन् निर्वर्त्य पुनः चलनम् आरभ्य ते मध्याह्नवेलायां स्वग्रामं प्राप्तवन्तः ।

कहोडस्य पिता पुत्रस्य आगमनं प्रतिपालयन् इव सप्राणः आसीत् । कश्चन ब्राह्मणः सुप्तस्य तस्य कर्णे - ''कहोडः आगतः । पश्यतु'' इति उच्चैः उक्तवान् । कहोडपिता नेत्रे उन्मील्य क्षणं कहोडं दृष्टवान् । अस्पष्टैः अक्षरैः - ''पुत्रक, सत्यं धर्मं च मा त्यज । कोपं लोभं च त्यज । वेदान् यथाशक्ति अधीष्व । अहं लोकान्तरं गन्तुं सिद्धः अस्मि । तव शुभं भवतु'' इति उक्त्वा विरतः । प्राणाः तस्य शरीरं विहाय उड्डीनाः ।

कहोडः ग्रामस्य जनैः सान्त्वितः उत्तरक्रियाः निर्वर्तयितुं सिद्धः अभवत् । कहोडस्य पित्रा किमपि धनं नार्जितम् । अग्रहारस्य कोणे क्वापि जीर्णं पर्णगृहं परम्परागतम् आसीत् । यज्ञेषु दक्षिणात्वेन प्राप्ताः काश्चन धेनवः आसन् । आमन्त्रणनिमन्त्रणेषु लब्धेन भोजनेन वस्त्रेण च कथञ्चित् तेन जीवनं यापितम् । धनकनकानां गन्धः अपि तेन न आघ्रातः ।

गाः विक्रीय प्राप्तेन धनेन कहोडः पितुः और्ध्वदैहिकानि कर्माणि निर्वर्तितवान् । गृहे अवशिष्टानि धान्यानि ब्राह्मणभोजनाय उपयुक्तानि ।

सर्वान् क्रियाकलापान् समाप्य, द्वित्राणि दिनानि अग्रहारे उषित्वा, ततः सर्वान् अभिवन्द्य, आश्रमाभिमुखं प्रयातः कहोडः । दिवसे एव प्रस्थाय सक्षेमं गुरुकुलं प्राप्तवान् । महर्षिः उद्दालकः प्रीत्या तं समालिङ्ग्य मूर्ध्नि उपाघ्राय तस्य सान्त्वनं कृतवान् । ''एतत् लोके अनिवार्यम् । तद् विस्मृत्य बुद्धिं वेदाध्ययने प्रवर्तय'' इति च उक्तवान् । कहोडः तदाज्ञां पालितवान् ।

चतुर्षु अपि वेदेषु प्रावीण्यं प्राप्तव्यम् इति कहोडस्य आकाङ्क्षा । क्रम-घन-जटाख्याभिः प्रक्रियाभिः वेदान् हृद्गतान् कृत्वा विद्वत्सभासु नैपुण्यं प्रदर्श्य प्रशंसा प्राप्तव्या इति तस्य अभिलाषः । वेदानां सर्वाणि सूक्तानि सः अधीतवान् । स्वप्ने अपि अखिलं वेदं यथावत् पठितुं सः समर्थः अभवत् । किन्तु मन्त्राणाम् अर्थः तेन न गृहीतः आसीत् । यज्ञकार्येषु मन्त्राणां विनियोगः कथं कर्तव्यः, गृहस्थानां ब्राह्मणादीनां विवाहादयः कर्मकलापाः कथम् अनुष्ठापनीयाः इति च तेन अध्येतव्यम् आसीत् ।

कदाचित् मध्याह्ने पाठः प्रचलति स्म । कहोडः किञ्चन सूक्तं पठितवान् । महर्षिः तम् - ''अस्य मन्त्रस्य अर्थः कः ?'' इति पृष्टवान् । कहोडः तस्य सतीर्थ्याः च शिरः अवनतं कृतवन्तः । 'मन्त्रस्य कश्चन अर्थः अस्ति । सः अपि ज्ञातव्यः' इति तैः कदापि न चिन्तितम् ।

महर्षिः उक्तवान् - ''मन्त्रः यदा अर्थानुसन्धानपूर्वकं पठ्यते, तदा एव तस्य पूर्णं फलम् । अतः अर्थज्ञाने च यत्नः कर्तव्यः'' इति ।

कश्चन ऋषिः उक्तवान् - ''वेदस्य महिमा तस्य शब्देषु वर्तते, न तदर्थेषु । वेदस्य सस्वरम् उच्चारणम् एव फलं जनयति । अर्थस्य विचारः अनावश्यकः ।''

महर्षिः उद्दालकः इदं श्रुत्वा स्मयमानः उक्तवान् - ''सत्यं, तथापि केवलेन शब्दोच्चारणेन पूर्णं फलं लभ्यते इति न युक्तम् । शब्दाः अर्थं बोधयितुं प्रयुज्यन्ते । अतः अर्थं बुद्ध्वा अनुष्ठानं कर्तव्यम् । अर्थस्य मननं च आवश्यकम् । अतः एव वेदः स्वयं वदति - 'य एवं वेद.., य उ चैनमेवं वेद' इत्यादि । एतानि वचनानि अर्थज्ञानस्य प्रामुख्यं बोधयन्ति ।''

तदा कश्चन शिष्यः पृष्टवान् - ''यदि अर्थस्य प्राधान्यं, तर्हि शब्दपरिवर्तनं कर्तुं शक्येत । यथा 'अश्वम् आनय' इति लौकिकवाक्ये 'हयम् आनय' इति परिवर्तने कृते न दोषः भवति । तथा वेदे नास्ति ।

'अग्निमीळे पुरोहितम्' इत्यस्य स्थाने 'वह्निमीळे पुरोहितम्' इति वक्तुं न शक्यते । अतः अत्र शब्दस्य एव प्राधान्यम् ।"

महर्षिः उक्तवान् - "त्वया उक्तं युक्तम् । वेदेषु कस्यापि शब्दस्य परिवर्तनं वा, पौर्वापर्यभङ्गो वा न क्रियते । अपौरुषेयत्वेन परिगण्यमाने शब्दराशौ कोऽपि व्यत्यासः मा भूत् । तथापि अर्थज्ञानम् अपि आवश्यकम् ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

इति पूर्वर्षिभिः निर्णीतम् । अतः सर्वैः वेदपाठस्य परिशुद्धता रक्षणीया । तथा अर्थज्ञानाय यत्नः अपि करणीयः" इति । एवं तस्य दिनस्य पाठः अवसितः ।

## 4

गतानि कानिचिद् वर्षाणि । कहोडस्य वेदाध्ययनं समाप्तप्रायम् । अध्ययनस्य समाप्तेः अनन्तरं गुरवे प्रियां दक्षिणां दत्त्वा समावर्तनं विधाय गृहस्थाश्रमस्य स्वीकारः उचित इति तेन ज्ञातम् एव । 'गुरवे कां दक्षिणां दास्यामि ?' इति चिन्ता कहोडस्य चित्तं बाधते स्म । तस्य किमपि धनं न आसीत् ।

उद्दालकस्य महर्षेः कहोडः अतितमां प्रीतिपात्रम् । विधेयतया श्रद्धया भक्त्या च तेन गुरुसेवा अविरतं कृता । सा सेवा एव पर्याप्ता गुरुदक्षिणा इति महर्षिः भावयति स्म । अन्यत् किञ्चिदपि कहोडात् सः न अपेक्षितवान् ।

काशीनरेशः हरिषेणः यागम् एकं कर्तुम् इच्छति स्म । तस्य पौरोहित्यं वोढुं सः महर्षिम् उद्दालकं दूतमुखेन याचितवान् । किन्तु तपोनिरतत्वात् महर्षिः स्वयं तत्र गन्तुम् अनिच्छन् कहोडम् इतरैः शिष्यैः साकं तत्र प्रेषितवान् । पवित्रायाः गङ्गायाः तटे स्थितां काशीं द्रष्टुम् अवसरः कहोडादिभिः लब्धः । गङ्गायाः पवित्रे जले स्नात्वा ते धन्याः अभवन् ।

महता वैभवेन यज्ञः प्राचलत् । यज्ञशालायां प्रातःकाले मध्याह्ने च विविधाः होमाः कार्यकलापाः च भवन्ति स्म । सायङ्काले सर्वे याज्ञिकाः महाराजस्य अध्यक्षतायां विविधान् विषयान् विचारयन्ति स्म ।

यज्ञविधौ चर्चायां च कहोडस्य वाचं सर्वे मान्यां भावयन्ति स्म । सर्वेषां प्रश्नानां समाधानं कहोडः पक्षपातं विना ददाति स्म । तस्य वाचि औचित्यं स्पष्टता च सदा भाति स्म । श्रुतिं प्रमाणीकृत्य स सर्वान् विवादान् पर्यहरत् । एतेन काशीनरेशः अत्यन्तं तृप्तः अभवत् । यज्ञसमाप्तौ कहोडं नितान्तम् अभिनन्द्य तस्मै भूरिदक्षिणां, श्रेष्ठानि वसनानि, शतं धेनूः च दत्त्वा नरेशः अवन्दत ।

‘यज्ञफलप्राप्तिरस्तु, सकलसम्पदभिवृद्धिरस्तु’ इति आशीर्भिः नृपम् अनुगृह्य कहोडादयः आश्रमं प्रत्यागच्छन् ।

कहोडादयो विधिवद् प्रत्यागताः इति महर्षिः अतितमाम् अतुष्यत् । कहोडम् आहूय - “कहोड, प्रियशिष्य, तव विद्याभ्यासः समाप्तः । इतः परं शास्त्रानुसारेण स्नातको भूत्वा समावर्त्य गृहस्थाश्रमं प्रविश” इत्यवदत् ।

“गुरुवर्य, तव अनुग्रहात् मया वेदाः अधिगताः । किन्तु गृहस्थाश्रमप्रवेशे मम सन्देहः । पत्नी, पुत्राः, गृहम् इति एतत् मे बन्धनवत् भाति । एतस्मिन् जाले अपतित्वा अध्ययने एव निरतः मुक्तिं साधयितुम् इच्छामि” इति कहोडः अब्रवीत् ।

“कहोड, त्वया उच्यमानं न युक्तम् । अनुभवः तद्विरुद्धं कथयति । देहे पाशवी प्रवृत्तिः वर्तते । तस्याः दमनं न सुलभम् । तां प्रवृत्तिम् अतर्पयित्वा साधने प्रवृत्ताः विकृतमानसाः भविष्यन्ति । अत एव शास्त्रं ब्रह्मचर्यानन्तरं गार्हस्थ्यं विधत्ते । गौतमं स्मरसि ननु ?”

“स्मरामि गुरुदेव । भिल्लस्त्रीसङ्गादेव स पतितः ।”

“अत एव इदम् उच्यते । ब्रह्मचर्यं गार्हस्थ्यं वानप्रस्थं संन्यास इति चतुरः आश्रमान् पूर्वे ऋषयः विनोदाय नाकुर्वन् । शरीरस्य सहजाः अपेक्षाः न बलात्कारेण रोद्धव्याः । तटाकस्य परीवाहः यथा आवश्यकः, तथा शरीरस्य मनसः च ।”

“गुरुवर्य, यदि गृहस्थाश्रमे पदं निधास्यामः तदा तत्र शाश्वती अनर्थपरम्परा । कुटुम्बभरणस्य चिन्ता, पुत्राः, पुत्र्यः, तेषां विद्याभ्यासः, तासां विवाहः इति अनन्तः चिन्ताप्रवाहः । तत्र कदा कथं वा ब्रह्मज्ञानम् ? कथं च आत्मोद्धारः ?”

“कहोड, त्वं ब्रह्मज्ञानी भवितुम् इच्छसीति मम महान् प्रमोदः । किन्तु क्रमेण सर्वं साधनीयम् । सहसा शिखरम् आरोढुं प्रयत्नं मा स्म करोः । सोपानक्रमेण एकैकं पदं निधेहि । एषः मे उपदेशः ।”

“गृहस्थाश्रमं प्रविष्टेन सर्वं ब्रह्मादिकं विस्मर्येत इति मे भीतिः, गुरुवर्य !”

महर्षिः उद्दालकः किञ्चित् स्मित्वा अब्रवीत् - “किमहं ब्रह्मविमुखः इति तव भावना ?”

कहोडेन स्वप्रमादः ज्ञातः । क्षमां प्रार्थयमानः सः उक्तवान् - "गुरुदेव, भवान् सर्वज्ञः । जलमध्यस्थम् अपि नलिनीदलं यथा जलेन न सम्पृक्तं, तथा भवान् संसारे स्थितः अपि कर्मबन्धमुक्तः । मादृशाः साधारणाः मानवाः किं तथा भवितुम् अर्हन्ति ?"

महर्षिः उक्तवान् - "कहोड, साधारणाः एव साधनेन असाधारणाः भविष्यन्ति । महान् अपि सिंहः आदौ अशक्तः शावकः एव भवति । त्वं ज्ञानी भवितुम् अर्हसि । अपि च, विषयान्तरम् अपि वक्तव्यम् अस्ति ।"

"किं तत् गुरुदेव ? कृपया कथयतु भवान् ।"

"स्वीकृतगृहस्थाश्रमस्य तव महामेधावी लोकोत्तरः पुत्रः उत्पत्स्येत । तेन तव पूर्वजाः सर्वे शाश्वतब्रह्मलोकप्राप्तये अर्हाः भविष्यन्ति । यदि ते मम वाचि विश्वासः, तर्हि गृहस्थो भव ।"

"गुरुदेव ! समस्तां वेदविद्यां प्रदाय माम् अनुगृहीतवति अत्रभवति भवति कथं न मे विश्वासः ? भवदाज्ञां शिरसा वहन् पालयिष्यामि । किन्तु ततः पूर्वम् 'आचार्याय प्रियं धनमाहृत्य...' इति उपनिषद्वाणीम् अनुसृत्य भवते दक्षिणां दातुम् इच्छामि । ततः एव गृहस्थाश्रमं प्रवेष्टुं मम मनः इच्छति ।"

"कहोड ! मम प्रिया दक्षिणा कीदृशी इति वक्ष्यामि । अपि दास्यसि ?"

"अवश्यं गुरुदेव ! प्राणैरपि विक्रीतैः तां दक्षिणां सम्पाद्य भवते दास्यामि ।"

"तर्हि शृणु । सम्पदि न मम आकाङ्क्षा । तव वंशे जनिष्यमाणस्य महात्मनः पुण्यप्रभावः मम वंशस्यापि यथा स्यात्, तथा त्वया कर्तव्यम् । एषा एव मे दक्षिणा अस्तु ।"

"गुरुदेव, भवतः वचनस्य तात्पर्यं मन्दबुद्धिना मया न गृहीतम् । कृपया विवरणं क्रियताम् ।"

"विवृणोमि, कहोड ! मदीया सुता सुजाता सम्प्रति परिणययोग्या वर्तते । तां परिणीय त्वं वंशम् अस्मदीयं पावय । एतेन अहं सन्तुष्टः भविष्यामि ।"

एतत् श्रुत्वा कहोडस्य मुखं विकसितम् । गुरोः पुत्रीं सः बहुवारं दृष्टवान् एव । तस्याः सुन्दरं मुखं, विशाले नयने, मधुरः मन्दहासः इति एतत् सर्वं तेन ज्ञातम् एव । 'एतादृशी कन्या लभ्यते चेत् कृतार्थः भविष्यामि' इति सः अचिन्तयत् ।

''गुरुदेव, महान् प्रसादः एषः यद् भवान् मां पुत्र्याः अनुरूपं वरं मन्यते । अनुगृहीतम् आत्मानं गणयामि । किन्तु ....''

''किन्तु किम् ?''

''मया कापि गुरुदक्षिणा न दत्ता इति लज्जा मां न मुञ्चति ।''

''तर्हि काशीराजेन तुभ्यं दत्ताः धेनूः मह्यं दक्षिणारूपेण देहि । ताः पुनः विवाहे अहं तुभ्यं दास्यामि'' इति महर्षिः सस्मितम् अवदत् ।

खगोदरशर्मणः, कहोड इति प्रथितस्य, विवाहः उद्दालकमहर्षेः सुतया सुजातया साकं ब्राह्मेण विधिना सम्पन्नः । ऋष्याश्रमेषु प्रवृत्तानां विवाहानां तुलनया अयं विवाहः सवैभवः इति गणयितुम् अर्हः आसीत् । असंख्याः महर्षिशिष्याः, इतरे ऋषयः च समागत्य वधूवरौ आशीर्भिः अभिनन्दित-वन्तः । अतिथिभ्यः यथेच्छं मिष्टान्नं परिवेषितम् । सर्वे सन्तृप्ताः सन्तुष्टाः च । काशी-कोसल-विदेहादीनां राजानः विविधानि उपायनानि वधूवराभ्यां प्रेषितवन्तः । सखीभिः यथौचित्यम् अलङ्कृता सुजाता देवकन्या इव राजति स्म ।

सुजाता तदा अष्टादशवर्षीया । मातापित्रोः प्रीतेः पात्रीभूता सा सम्प्रति पत्युः प्रेम्णः पात्रं च । कुशाग्रबुद्धिः सा समस्तस्य आश्रमस्य विभूषणवत् आसीत् । तथापि बाला सती विवाहं क्रीडां मन्यते स्म । पत्या साकं कथं व्यवहर्तव्यं, गृहस्थस्य पत्नी भूत्वा गृहं कथं निर्वहणीयम् इति सा न जानाति स्म । विवाहानन्तरम् अपि पितृगृहे स्थित्वा बालिकाः क्रमेण गृहनिर्वहणादिकं मातुः ऋषिपत्नीभ्यः च विदित्वा रजोदर्शनानन्तरं पुनः प्राप्तोचितसंस्काराः पतिगृहं यान्ति स्म । गृहस्थाश्रमे प्रवेष्टुम् अपेक्षिता प्रबुद्धता यावत् न प्राप्ता, तावत् कन्याः पितृगृहे एव वसन्ति स्म । तत्सम्प्रदायम् अनुसृत्य सुजाता आश्रमे एव अवसत् । कहोडः स्वकीयम् अग्रहारं प्राप्नोत् । विवाहे प्राप्तानि उपायनानि शकटे आरोप्य महर्षिभिः तत्र प्रेषितानि । प्राचीनं जीर्णं गृहं कहोडेन नवीकृतम् । तत्र उषित्वा स कालं सुखेन अनयत् ।

वेदाध्यापनेन पौरोहित्येन यजनेन याजनेन च कहोडस्य कालो याति स्म । देवकार्याणां पितृकार्याणां च अनुष्ठापने तस्य नैपुण्यं सर्वान् आकर्षति स्म । तस्य एकः दोषः आसीत् यत् यस्मै कस्मै अपि शीघ्रं सः कुप्यति स्म । 'वेदोच्चारणविषये त्वया अत्र त्रुटिः कृता' इति यः कोऽपि यदि तं वदेत्, तर्हि तस्मै सहसा अक्रुध्यत् कहोडः । सदुद्देशेन कृताम् अपि स्वल्पाम् अपि टीकां सः न सहते स्म । क्षणमात्रेण स्वीयं शान्तं स्वभावं परित्यज्य अग्निपर्वतवत् ज्वलति स्म । 'एतादृशः क्रोधः न हिताय' इति वृद्धाः तम् उपदिष्टवन्तः । "सत्यं, मम अयं दोषः" इति सः वेलान्तरे अङ्गीकरोति स्म । पश्चात्तापेन दह्यते स्म । 'एवं न करिष्यामि' इति मनसि प्रतिज्ञाम् अपि करोति स्म । किन्तु तस्य स्वभावः दुरतिक्रमः अपरिवर्तनीयः अभात् । पुनः कदाचित् यदि 'एतद् एवं न, त्वया अत्र स्खलितम्, अयं स्वरः अन्यथा कृतः' इति कश्चिद् वदेत्, तर्हि कहोडः क्रोधेन आत्मानं विस्मृत्य कलहायते स्म ।

तथापि तस्य विद्या जनान् आकर्षति स्म । तया तेन भूरि धनं समार्जितम् । पत्नी यदा आगमिष्यति तदा सुखेन तिष्ठतु इति गृहस्य सुधालेपनादिकम् अकारयत् कहोडः । यज्ञयागादिषु प्रधानपुरोहितः भूत्वा तत्र प्राप्तया दक्षिणया धनकनकधान्यादिसङ्ग्रहम् अपि अवर्धयत् । तदा तदा सुजातायाः मुग्धं मुखं सः स्मरति । इदानीं सा कथं स्यात् इति कल्पना तस्य मनसि उदयते स्म ।

कदाचित् सायं सन्ध्यावन्दनां निर्वर्त्य कहोडः स्वगृहे जपनिरतः आसीत् । तदा द्वौ ऋषिकुमारौ उद्दालकाश्रमात् तत्र आगतौ । तौ कहोडस्य परिचितपूर्वौ एव । उभौ अपि प्रवरोच्चारणपूर्वकं कहोडम् अभिवादितवन्तौ । 'आयुष्मन्तौ भूयास्ताम्' इति कहोडः तौ आशिषा अभ्यनन्दयत् ।

मार्गायासपरिहाराय ताभ्यां फलानि क्षीरं च दत्त्वा सुखोपविष्टौ कृत्वा ततः कहोडः उद्दालकमहर्षेः, गुरुपत्न्याः, इतरेषाम् ऋषीणां, ब्रह्मचारिणां च कुशलं पृष्टवान् । 'सर्वेषां कुशलम्' इति निवेद्य ऋषिकुमारयोः अन्यतरः उक्तवान् - "महर्षिः भवतः कुशलं पृष्ट्वा इदं पत्रं देयम् इति आदिष्टवान्" इति । ततः वस्त्रावृतं तालपत्रं सः कहोडाय अर्पितवान् ।

तालपत्रम् अनावृत्तं कृत्वा कहोडः अवाचयत् - "स्वस्ति । आयुष्मन्तं प्रियशिष्यं जामातरं खगोदरशर्माणं वेदोक्ताभिः आशीर्भिः अनुगृह्य इदं कथ्यते । भवता परिणीता अस्मत्सुता सुजाता सम्प्रति गृहस्थस्य भवतः सहधर्मचारिणी भवितुं योग्या जाता । अतः शीघ्रम् आश्रमम् आगच्छतु आयुष्मान् । अस्मान् सर्वान् दर्शनसम्भाषणसँल्लापैः आनन्दयतु । विधिवत् परिगृह्य पत्नीं स्वगृहं नयतु ।

द्वितीयाश्रमोचितानि सुखानि अनुभवतु, धर्मान् अपि अविकलम् आचरतु । निरीक्षामहे भवतः अत्र आगमनम् । सर्वविधं श्रेयः अस्तु'' इति ।

पत्रस्य वाचनेन कहोडस्य महान् प्रमोदः जातः । 'पुनः सर्वान् सहाध्यायिनः द्रक्ष्यामि, तैः साकं सम्भाषणं करिष्यामि, ऋषिवराणाम् आशिषः लप्स्ये, सुजातां यौवनारूढां द्रक्ष्यामि, तस्याः मुग्धानि वचनानि श्रो ेष्यामि' इत्यादि चिन्तयन् क्षणकालं सः लोकं विस्मृतवान् । ततः कर्तव्यं पूर्वाङ्गीकृतं स्मृत्वा ऋषिकुमारौ उद्दिश्य उक्तवान् - ''प्रतिज्ञातपूर्वाणि कानिचित् यज्ञकर्माणि सन्ति । तानि त्यक्तुं न शक्नोमि । अतः तानि यथाविधि समाप्य आगामिनि माघमासे द्वितीयायाम् इतः प्रस्थितः परेद्युः तत्र आश्रमे उपस्थितः भविष्यामि । एतत् महर्षये नमोवाकपुरस्सरं भवन्मुखेन निवेदयितुम् इच्छामि'' इति ।
सन्देशं स्वीकृत्य ऋषिकुमारौ परेद्युः आश्रमं प्रति प्रस्थितौ । कहोडस्य तु मनः सदा सुजातायाः चिन्तायां मग्नम् अभवत् । तारुण्ये न्यस्तपदा सा कथं दृश्येत इति मुहुर्मुहुः कल्पयित्वा तस्याः रूपं द्रष्टुं तत् प्रयतते स्म । द्विगुणीभूतरूपसम्पदः तस्याः कपोलौ स्पृशामि, तां दृढम् आलिङ्गामि, तस्याः ताम्राधरं चुम्बामि इति दिवास्वप्नं कहोडः अपश्यत् । कतिपयानि दिनानि कथं नेष्यामि इति च सः चिन्तयति स्म । याज्ञिकेषु कर्मसु अपि सः पूर्वमिव बुद्धिं निधातुं न शक्तः अभवत् । कदा उद्दालकाश्रमं गमिष्यामि, कदा सुजातां द्रक्ष्यामि इति तस्य हृदयम् उत्कण्ठितं नृत्यति स्म ।
माघमासस्य द्वितीयायां शुभतिथौ कहोडः आश्रमं प्रति प्रस्थितः । वृष्टिः विरता आसीत् । अतः प्रयाणं सुखकरम् । मार्गे ग्रामेषु अग्रहारेषु च जनाः सन्तोषेण अतिथिसत्कारं कुर्वन्ति स्म । दिनद्वयप्रयाणं कृत्वा कहोडः उद्दालकाश्रमं प्राप्तवान् ।
महर्षिः उद्दालकः स्वयं तस्य स्वागतम् अकरोत् । सर्वे आश्रमवासिनः ससम्भ्रमं तस्य मधुपर्कार्घ्यर्पणे भागिनः अभवन् । राज्ञः इव तस्य सत्काराः कृताः ।
दुकूलधारिणी आभरणशोभिता सौभाग्यचिह्नालङ्कृता सुजाता अवनतमुखी मन्दं मन्दम् आगत्य मातुः आदेशानुसारेण कहोडस्य पादयुगलम् अस्पृशत् । कहोडस्य नयने तस्याः मुखारविन्दे कीलिते इव अभवताम् । तस्य कल्पनाम् अपि अतीत्य सा रूपलावण्यनिधिः जाता । कस्य जन्मनः पुण्येन रूपखनिः इयं मदीया अभवत् इति कहोडः चिन्तितवान् ।

''सुजाते, अपि कुशलिनी त्वम् ? इतः परम् आश्रमं परित्यज्य मदीयं गृहम् आगन्तव्यम् । अपि सिद्धं तव मानसम् ?'' इति कहोडः अपृच्छत् ।

लज्जया भूमिम् एव पश्यन्ती सुजाता न किञ्चित् अवदत् । तस्याः माता उक्तवती - ''जामातः, यद्यपि आश्रमे अस्याः स्नेहः बलवान्, किन्तु त्वयि स्नेहः बलवत्तरः । त्वां द्रष्टुं, त्वया सँलपितुं च इयं कियद् उत्सुका आसीद् इति वक्तुं न शक्नोमि । नूतनः अग्रहारः कथं स्यात् इति, तत्र ग्रामजीवनस्य अपरिचिता कथम् अहं गृहकर्माणि निर्वर्तयिष्यामि इति च अस्याः भयम् आसीत् । यथाशक्ति मया तद् दूरीकृतम् । पत्युः प्रेम एकं दृढं चेत् नार्यः सर्वम् अन्यत् सोढुं सिद्धाः भवन्ति । इयं पाककर्मणि कुशला । अन्यत् अपि क्रमेण शिक्षिष्यते । त्वया क्षमावता भवितव्यम् ।''

''मातः, तत्र चिन्ता मास्तु । अस्याः मनः यथा न दूयेत, तथा भवितुं सर्वथा प्रयत्नं करिष्यामि'' इति कहोडः आश्वासयत् ।

महर्षिः उक्तवान् - ''पुत्रि, सुजाते, प्रियशिष्यस्य हस्ते त्वां समर्प्य मम हृदयम् उच्छ्वसितम् । इतः परं पतिम् एव दैवं मन्यमाना तस्य इच्छानुवर्तिनी सुखवती भव । तारुण्यसहजाः अभिलाषाः यथेच्छं पूर्यन्ताम् । धर्माविरुद्धः कामः अभिलषणीयः एव । युवयोः कृते आश्रमस्य समीपे रमणीयम् एकान्तस्थलं कल्पितम् । तत्र द्वित्राणि दिनानि सुखेन विहारं कुरुतम् । ततः शुभतिथौ कहोडस्य ग्रामं गन्तुं व्यवस्था करिष्यते । सुजाते, सम्मतं खलु ते ?''

एतत् श्रुतवत्याः सुजातायाः मुखं सहसा अरुणं स्विन्नं च जातम् । क्षणं मुखम् उन्नमय्य कहोडं दृष्ट्वा - ''पितः, अहं गमिष्यामि । कार्यान्तरम् अस्ति'' इति उक्त्वा सा त्वरितैः पदैः ततः अपाक्रामत् ।

आश्रमस्य अनतिदूरे कश्चन अल्पशैलः आसीत् । तस्मिन् काचित् पर्णशाला विशेषेण नवदम्पत्योः कृते निर्मिता आसीत् । फलपुष्पभरिताः वृक्षाः लताश्च तत्र आसन् । विधिवत् होमादिकं कृत्वा महर्षिः नवदम्पती तत्र प्रेषितवान् ।

रमणीये एकान्ते प्रदेशे सुजातां प्रियां पत्नीं कहोडः दर्शं दर्शं तृप्तिं न प्राप्तवान् । सा तु लज्जया अवनतमुखी कदाचिद् एव मुखम् उन्नमय्य कहोडं पश्यति स्म । तस्याः नेत्रयोः प्रेम, कुतूहलं, भयं च आसन् । तां मृदु आलिङ्ग्य कहोडः अब्रवीत् - ''प्रिये सुजाते, मम पूर्वपुण्यबलात् त्वां प्राप्तवान् अस्मि । त्वां सदा सुखितां कर्तुं प्रयत्नं करिष्यामि । तव इच्छां विरुध्य किमपि न करिष्यामि । किन्तु मम कश्चन दोषः । अत्यल्पेनापि कारणेन मम कोपः उत्पद्यते । एतद्विषये त्वया क्षमा धार्या । अन्यथा तु मां तव किङ्करं जानीहि'' इति ।

एतैः वचनैः सुजातायाः हृदयं सन्तोषेण भरितम् । पतिः मयि स्निह्यति, मां प्रीणयितुं सदा प्रयतते, इतः अधिकं किम् अपेक्ष्यते इति सा चिन्तितवती । उक्तवती च - "अहम् एव तव आदेशानुवर्तिनी दासी । त्वं मम स्वामी । तव सुखं, तव सन्तोषः, तव तृप्तिः इत्येतत् एव मम लक्ष्यम् । पत्युः सेवायाः अधिकं किम् अस्ति पत्न्याः ? त्वम् अधीतवेदः, धर्मस्य वेत्ता च । मयापि पितुः सन्निधौ किञ्चित् अधीतम् । त्वत्तः अपि अधिकं ज्ञातव्यम् इति पिता मां बोधितवान् । त्वं मम न केवलं पतिः, अपि तु गुरुः अपि भव । ज्ञानप्रपञ्चे माम् अपि प्रवेशय" इति ।

एवं परस्परं वदतोः विविधानि यौवनसुखानि अनुभवतोः तयोः तत्र पञ्चषाणि दिनानि व्यतीतानि । ततः स्वकर्तव्यानि स्मरन् कहोडः अग्रहारं गन्तुं मतिं कृतवान् । सुजाता च पतिगृहं गन्तुं सिद्धा अभवत् । तौ शैलाद् आश्रमं निवृत्तौ ।

जन्मनः सुजाता आश्रमाद् बहिः न गता । 'बाह्यः प्रपञ्चः कीदृशः ? तत्र जनाः कथं व्यवहरन्ति, तेषां रीतिः का ? नीतिः का ?' इति तया न ज्ञातम् । तस्याः परिचिताः आश्रमनिवासिनः, तत्रत्याः मृगाः, पक्षिणः, वृक्षाः लताश्च । एतावत्पर्यन्तं तस्याः किमपि उत्तरदायित्वं न आसीत् । इतः परं तु कुटुम्बिनी भूत्वा तया सर्वं निर्वोढव्यम् । अतः तस्याः माता तां सर्वान् पत्नीधर्मान् बोधितवती । सा उक्तवती - "सुजाते, पत्यै सदा प्रीतिं भक्तिं च रक्ष । अपि च सः शीघ्रकोपी इत्येतत् न विस्मर्तव्यम् । येन केनापि कारणेन स्वल्पम् अपि अवमानं न सहते कहोडः । क्रुद्धः सः स्ववचनस्य परिणामः कः स्यादिति न जानाति । तादृशेषु अवसरेषु त्वया सहनावत्या भवितव्यम् । अन्यथा अनर्थः स्याद् अपि । युवयोः जनिष्यमाणः पुत्रः प्रतिभया जगद्विख्यातः भविष्यति इति तव पित्रा उक्तं च मा विस्मर" इति । सुजाता सर्वम् अपि श्रुतवती । सहना तस्याः सहजः गुणः । आ शैशवात् कहोडे तस्याः यः अभिमानः आसीत्, सः विवाहात् अनन्तरं द्विगुणः भूत्वा सम्प्रति प्रेमरूपेण परिणतः । तस्य अध्ययने, अध्यापने, यजने, याजने च सहाया भूत्वा यथार्थतया 'पत्नी' भवेयम् इति तस्याः आकाङ्क्षा ।

महर्षिः उद्दालकः अपि कहोडम् आहूय, समीपे उपवेश्य तं विविधं धर्मम् उपदिष्टवान् । 'कोपः एव मानवस्य प्रथमः शत्रुः । सः ज्ञानिना जेतव्यः' इति च विशेषेण बोधितवान् ।

प्रयाणदिनम् उपस्थितम् । आश्रमस्य अनतिदूरे स्थितस्य ग्रामस्य कश्चन कृषीवलः महर्षेः भक्तः बलीवर्दशकटं दम्पत्योः प्रयाणाय आनीतवान् । तस्मिन् प्रयाणाय आवश्यकानि वस्तूनि सज्जानि आसन्

। मध्येमार्गं क्षुन्निवृत्तये क्षीरं, दधि, पृथुकानि, गुडखण्डाः, फलानि च आसन् । सुजातायाः कहोडाय च वल्कलानि, कानिचित् उपायनानि च वस्त्रग्रन्थिबद्धानि एकत्र स्थापितानि ।

सुजाता अतीव विक्लवा आसीत् । आ बाल्यात् परिचितम् आश्रमं त्यक्त्वा दूरं गन्तव्यम् । प्रत्यहं ये वृक्षाः याः लताः च दृश्यन्ते स्म, स्पृश्यन्ते स्म, तान् विहाय गन्तव्यम् । ये मृगाः तया प्रीत्या पोषिताः, याः गावः स्नेहेन पालिताः, ये पक्षिणः तस्याः हस्तात् धान्यानि भक्षयन्ति स्म, तान् सर्वान् हित्वा गन्तव्यम् । एकैकम् अपि सा निर्भरं वीक्ष्य हस्ताभ्याम् अस्पृशत् । वृक्षकाणाम् आलवालानि जलेन अपूरयत् । "पुत्रि, आगच्छ, प्रयाणाय शकटं सिद्धं तिष्ठति" इति पित्रा आहूता अन्तिमतया सर्वं वीक्ष्य नयनाञ्चलयोः उत्पन्नानि अश्रूणि अङ्गुल्या प्रोञ्छन्ती शकटस्य समीपम् आगता ।

कहोडः गुरोः गुरुपत्न्याः च पादयोः पतित्वा आशिषः गृहीत्वा शकटम् आरोहत् । सुजाता पितुः पादौ स्पृष्टवती । "जाते सुजाते, पत्युः प्रिया, ज्ञानिप्रसविनी च भूयाः, श्रेयोऽस्तु" इति सगद्गदेन कण्ठेन सः उक्तवान् ।

ततः सुजाता मातरं वन्दितुं गता । सा साश्रुनयना तां दृढम् आलिङ्ग्य मूर्ध्नि उपाघ्राय किमपि वक्तुम् अशक्ता मनसा एव सर्वाः आशिषः दत्तवती । "अम्ब, त्वां विहाय कथं जीविष्यामि" इति वदन्ती सुजाता आत्मानं नियन्त्रयितुम् अशक्ता मन्दं रोदितुम् आरब्धवती । गद्गदितेनापि गम्भीरेण स्वरेण महर्षिः - "पुत्रि, पतिगृहे स्थित्वा स्वयं माता भूत्वा मातुः विरहं सहिष्यसे । इदानीं प्रतिष्ठस्व" इति उक्तवान् ।

सुजाता कथञ्चित् बाहुबन्धनं शिथिलीकृत्य मन्दं रुदती एव शकटस्य समीपम् आगता । कहोडः करावलम्बनं दत्त्वा तां शकटम् आरोहयत् । गुरुपत्नी शकटसमीपम् आगत्य - "कहोड, त्वाम् अहं पुत्रवत् पालितवती । इदानीं मम पुत्री तव हस्तयोः अर्पिता । सा अनभिज्ञा । बहुधा कर्तव्ये स्खलेद् अपि । क्षमस्व तां, यदि अपराध्यति । मयि तथा करुणा दर्शिता स्यात्" इति दीनेन स्वरेण याचितवती ।

"अम्ब, किमिदं कथ्यते ? भवत्याः उदरे अजातः अपि अहं भवत्याः शिशुः एव । भवत्या मम कति अपराधाः न सोढाः ? कदापि नाहं भवत्या दण्डितः । प्रीत्या सुजातां पालयामि । निधिमिव तां रक्षामि । तत्र भवत्याः चिन्ता मास्तु" इति कहोडः उक्तवान् ।

“शुभमस्तु, प्रस्थीयताम्” इति महर्षिणा आदिष्टः शाकटिकः बलीवर्दौ हस्ताभ्याम् अस्फालयत् । शकटं प्रस्थितम् । तमसापर्यन्तम् अनुगम्य आश्रमवासिनः प्रतिनिवृत्ताः ।

कहोडस्य प्रयाणं सुखमयम् आसीत् । नवोढा पत्नी समीपे उपविष्टा, श्रवणमधुरं किङ्किणीनादं कृत्वा चलन्तौ बलीवर्दौ, मन्दं वहमानः सुमगन्धवाही पवमानः, नयनासेचनकं दृश्यं, तत्र तत्र हरिततृणानि चरन्तः हरिणाः इति सर्वम् अपि कहोडं सन्तोषसागरे निमज्जयति स्म । मध्येमार्गं कस्मिंश्चिद् ग्रामे विश्रम्य पुनः प्रस्थितौ दम्पती अग्रहारं प्राप्तवन्तौ ।

## 5

सुजाता-कहोडयोः गृहस्थजीवनं सुखमयम् आसीत् । जनाः कहोडम् आद्रियन्ते स्म सर्वेषु यज्ञकर्मसु । अतः तस्य गृहे धनधान्यसमृद्धिः आसीत् । अतिथीन् सः देवतावद् भावयन् सत्करोति स्म । गाः प्रीत्या पालयति स्म । दिवसाः क्षणाः इव यान्ति स्म ।

कस्य वा सुखं शाश्वतम् ? कहोडस्य जीवनेऽपि अनिरीक्षितः प्रक्षोभः आगतः । तेन काचित् वार्ता जनानां मुखात् श्रुता । उद्दालकाश्रमाद् बहिष्कृतः गौतमः दस्युः जातः । दस्यूनां दलं कृत्वा सः ग्रामान् लुण्टति स्म च । विशेषतः तस्य द्वेषः ऋष्याश्रमाणाम् उपरि आसीत् । तस्य क्रौर्यम् अपरिमितम् आसीत् । जनानां पीडा तस्य क्रीडा आसीत् । जनान् बहुधा हिंसित्वा तेषां यातनां दृष्ट्वा गौतमः साट्टहासं नन्दति स्म । ‘अयं ग्रामः लुण्टितः, असौ आश्रमः ध्वस्तः, एते जनाः हताः’ इति वार्ताः जनान् दिने दिने त्रासयितुम् आरभन्त ।

कस्मिंश्चिद् दिने दस्युदलं कहोडस्य अग्रहारम् अपि आक्रामत् । दृष्टं सर्वम् अपि जनं दस्यवः लगुडैः प्रहृतवन्तः । आक्रन्दनध्वनिः गगनम् अस्पृशत् । तमपि अतिशय्य दस्यूनाम् अट्टहासध्वनिः शैलानां कन्दरेषु प्रतिध्वनितः अभवत् । गृहेषु स्थितं धनधान्यादि दस्युभिः लुण्टितम् । कहोडस्य गृहं प्रविष्टः गौतमः कहोडं दृष्ट्वा उच्चैः हसित्वा - “अरे कहोड, ऋषिवर्य, वेदपारङ्गत... ! अपि कुशलम् ?” इति सोल्लुण्ठनं पृष्टवान् ।

“गौतम, एतत् सर्वं कृत्वा कुशलं पृच्छसि ननु ? उत्तमे वंशे जातः कथम् एवं व्रात्यः इव दस्युः जातः ? किं तव उचितम् इदम् ?” इति कहोडः पृष्टवान् ।

“रे ब्राह्मणाधम, उचितं किम्, अनुचितं किमिति नाहं गणयामि । अद्य अहं सुखी । मम आज्ञां शतशः जनाः पालयन्ति । यदिच्छामि, तत् खादामि । यावद् इच्छामि तावत् सुरां पिबामि । यां सुन्दरीं

पश्यामि, तया सुखम् अनुभवामि । इन्द्रवत् सुखानि अनुभवामि । मम नाम श्रुत्वा राजानः अपि कम्पन्ते । इतः अधिकं किं साधनीयम् ?'' इति गौतमः सगर्वम् उक्तवान् ।

''गौतम, लज्जितव्यं त्वया । पापेन अर्जितं सर्वं शीघ्रमेव विनश्यति । पापस्य विषमयं फलं भोक्तव्यं भविष्यति । अद्य वा श्वः वा राजभटैः गृहीतः शूले आरोपितः भविष्यसि । ततः नरके पतिष्यसि । धिक् त्वाम्'' इति दृढेन स्वरेण उक्तवान् कहोडः ।

''कहोड, मामेव निन्दसि ? पश्य ते यत् करिष्यामि'' इति गर्जन् गौतमः कशया तीव्रं प्रहृतवान् कहोडम् । तेन प्रहारेण कहोडः भूमौ पतित्वा ''हा अम्ब'' इति क्रन्दनं कृतवान् ।

पादेन कहोडं समाहत्य हसन् गौतमः - ''अरे तुच्छबुद्धे, पुरा भिल्लपल्ल्यां मां ग्राहितवान् त्वम् । अद्य तदर्थं त्वां पाठं बोधयिष्यामि । यथा त्वं दरिद्रः निर्गतिकः सदोपवासी भविष्यसि, तथा करोमि'' इति कथयित्वा स्वानुचरान् आहूय 'कहोडस्य गृहम् अग्निसात् कुरुत' इति आदिष्टवान् ।

निमेषमात्रे दस्यवः तस्य गृहे स्थितानि वस्त्रधान्यादीनि वस्तूनि लुण्टित्वा, तत्र तत्र तैलं विकीर्य अग्निं प्रज्वालितवन्तः । अपेक्षितं सर्वम् अश्वानां पृष्ठे आरोप्य दुर्गमम् अरण्यं गतवन्तः । अग्रहारस्य जनानां रोदनध्वनिं शृण्वन्, स्वयं च वेदनया पीड्यमानः कहोडः कञ्चित् कालम् अनयत् ।

पुष्पावचयार्थं काननं गता सुजाता प्रत्यागता । ग्रामं धूमायमानं दृष्ट्वा व्याकुला सा धावन्ती गृहं प्राप्तवती । दग्धप्रायं गृहं दृष्ट्वा कारणम् अजानती, पतिम् अन्विष्यन्ती सा इतस्ततः अटितवती ।

क्वचित् वृक्षस्य अधः पतितः विह्वलः दूयमानः कहोडः तस्याः गोचरः अभवत् । क्रन्दन्ती सा तत्समीपं गत्वा तम् अङ्कम् आरोप्य - ''किमिदम् ? कः पापी भवन्तं पीडितवान् ? समस्तः अग्रहारः श्मशानसदृशः कृतः केन दुरात्मना ?'' इति पृष्टवती ।

दीर्घं श्वसन् कहोडः - ''सुजाते, दस्यवः ग्रामं प्रविष्टवन्तः । अस्माकं सर्वस्वं ते लुण्टितवन्तः । गृहे च अग्निं प्रज्वाल्य सकलं दग्ध्वा गताः । दुर्दैवस्य लीला इयम्'' इति उक्तवान् ।

अग्रहारस्य सर्वेषु गृहेषु इयम् एव स्थितिः । न केवलं वस्तूनि दस्युभिः अपहृतानि, अपि तु युवतयः अपि । तासां मातरः पितरः भ्रातरः च अतीव दुःखिताः उच्चैः रुदन्ति स्म । एतस्यां परिस्थितौ कः कस्य समाधानं करोति ? सर्वे समानदुःखाः आसन् ।

कमलदलपुटेन जलम् आनीय पत्ये दत्त्वा सुजाता तं समादधात् ।

"सुजाते ! सुदैवात् तस्मिन् दुष्काले त्वम् अत्र न आसीः । अन्यथा दुष्टः गौतमः त्वाम् अपि अनेष्यत् । करुणावता इन्द्रेण त्वं रक्षिता । पुनः अयम् अग्रहारः निर्मातव्यः । कथम् इति न जानामि" इति सः उक्तवान् ।

"सः दस्युपाशः गौतमः कीटनाशं नश्यतु । तस्य शिरसि वज्रं पततु" इति सुजाता भूयो भूयः दस्युनायकं निन्दितवती ।

वृक्षाः एव तद्रात्रौ जनानां गृहाणि अभवन् ।

* * *

गतेषु कतिषुचित् मासेषु अग्रहारस्य स्थितिः यथापूर्वं भवितुम् आरभत । कैश्चित् पर्णशालाः निर्मिताः । कैश्चित् पूर्वाणि जीर्णानि गृहाणि यथाशक्ति नवीकृतानि । दैनिकं जीवनं परावलम्बनेन चलति स्म । उदारहृदयाः केचन ग्रामान्तरजनाः आहारपदार्थान् तदा तदा यच्छन्ति स्म । कश्चिद् राजा पञ्चषाः गाः दत्तवान् । एवम् अपि अग्रहारस्य गृहे गृहे दारिद्र्यं नृत्यति स्म । पूर्वमिव सुखं न आसीत् । कस्यापि मुखे सन्तोषः न दृश्यते स्म । सर्वे जनाः कानने फलानां मूलानां कन्दानां च अन्वेषणे कालं नयन्ति स्म । वेदाध्ययनं पुराणश्रवणं शास्त्रचर्चा इत्यादि विरलतरम् अभवत् ।

'वर्षर्तुः आगमिष्यति, वृष्टिः भविष्यति, तदा व्रीहीन् भूमौ उप्त्वा पुनः समृद्धिमन्तः भविष्यामः' इति जनानाम् आशा आसीत् । किन्तु इन्द्रः अपि कुपितः । मेघाः एव न दृष्टाः । आकाशात् जलबिन्दुः अपि न पतितः । तमसा दिने दिने कृशतरा अभवत् । पातुम् अपि जलं दुर्लभं सञ्जातम् । वृक्षाः विरलफलाः अभवन् । भूमौ अपि कन्दानि दुर्लभानि जातानि ।

एतादृशस्थितौ जनैः कथं यज्ञाः क्रियन्ते ? वेदपारगान् अपि विप्रान् कः पृच्छति ? सर्वत्र निराशता प्रसृता । 'अद्य मध्याह्ने भक्षयितुं किं लभ्यते' इति एषः एव प्रश्नः सर्वेषां मुख्यः आसीत् । कहोडः अतितमां खिन्नः विषण्णः दीनः च अभवत् ।

"महर्षेः आश्रमं गत्वा साहाय्यं पृच्छ" इति सुजाता तं बहुवारम् उक्तवती । किन्तु श्वशुरस्य गृहे याचकत्वेन स्थातुं कहोडः अलज्जत ।

क्लेशमयेषु एतेषु दिनेषु सुजातायां गर्भलक्षणानि दृष्टानि । येन सन्तोष्टव्यम् आसीत्, तेन सा अधिकां चिन्ताम् एव प्राप्तवती । कदाचित् सा मनसि बहु सङ्कोचम् अनुभवन्ती पतिम् उक्तवती - "मया किञ्चित्

वक्तुम् इष्यते । सुकाले सन्तोषं या वार्ता जनयेत्, सा दुष्काले निर्वेदं दुःखं वा जनयेत् । किं करोमि ? निरुपाया अस्मि । इदं कथनीयम् एव'' ।

निर्विकारः कहोडः उक्तवान् - ''सुजाते, कथय, विधिना निर्दयेन कृताः प्रहाराः मां सम्प्रति भावनाविहीनं कृतवन्तः । इतः अधिकं दुःखं किं भवेत् इति सर्वं सोढुं सिद्धः अस्मि । यद् वक्तुम् इच्छसि, तद् उच्यताम् ।''

''अहं गर्भिणी जाता अस्मि । षट्सु पञ्चसु वा मासेषु माता भविष्यामि ।''

''एवं नु ? एतद्विषये किमिति चिन्ताक्रान्ता त्वम् ?'' इति स्थितप्रज्ञः इव कहोडः पृष्टवान् ।

''इदानीम् एव जीवनं कष्टमयम् अस्ति । इतःपरं कन्दमूलफलानाम् आहरणाय अहं काननं गन्तुम् अपि असमर्था भविष्यामि । गृहे गावः अपि न सन्ति । शिशवे किं दास्यामः ? कथं तं पोषयामः ? का वा अस्माकं गतिः ?'' इति सातङ्कं सुजाता पृष्टवती ।

''सुजाते, लोके विधिनियमानुसारेण सृष्टिः जायते । सम्प्रति अनावृष्ट्या लोकः बाधितः । भूमिः सस्यरहिता । लताः पुष्पहीनाः । वृक्षाः फलवियुक्ताः । किन्तु श्वः यदि इन्द्रः प्रसन्नः भविष्यति, तर्हि सकला प्रकृतिः समृद्धिमयी भविष्यति । चिन्तां मा कार्षीः । किं प्राणिनः आरण्यकाः इत्थं चिन्तया बाध्यन्ते ?'' इति कहोडः सविमर्शम् अकथयत् ।

''ते तु आलोचनाशक्तिरहिताः । वयं मानवाः । चिन्तयितुं शक्तिः अस्मासु अस्ति । कथं चिन्ताक्रान्ताः न भवामः ।''

''अस्तु । तथापि तया चिन्तया पीडिताः मा स्म भवाम । कष्टानि च सुखानि च चक्रस्य अराणीव ऊर्ध्वम् अधः च गच्छन्ति । अस्माकम् अपि उत्तमानि दिनानि भविष्यन्ति ।''

''अहं तु चिन्तया विक्लवा अस्मि । शिशुं जगति आनीय, तस्मै अन्नं वस्त्रं च दातुम् अशक्ताः तस्मै अपराध्यामः इति भावना मे हृदयस्य अन्तरालं तुदति ।''

एतत् श्रुतवतः कहोडस्य क्रोधः समुत्पन्नः । पाणिना शिरः ताडयन् -"त्वादृशी भार्या मया किमिति ऊढा ? तव पाणिग्रहणम् एव मम महान् अपराधः । किमहं करवाणि ? नश्य क्वापि" इति वदन् एव स्वयं ततः दूरम् अपासरत् ।
किं कर्तव्यम् इति सुजातया न ज्ञातम् । प्रतिदिनं पर्याप्तं भोजनम् अपि न लभ्यते स्म । यज्ञं को वा दुर्भिक्षे कारयति ? अतः कहोडः निष्कर्मा आसीत् ।
केषुचित् दिनेषु केवलं जलम् एव पीत्वा दम्पती सुप्तवन्तौ । शीतेन आत्मानं रक्षितुं ताभ्यां पर्याप्तानि वल्कलानि अपि न लब्धानि ।

एवं स्थितेऽपि, अन्तर्वर्त्नीं सुजातां गर्भे वर्धमानः शिशुः तोषयति स्म । शिशोः कादाचित्कं चलनं वलनं च तस्याः महान्तं सन्तोषं जनयति स्म । कहोडस्य पुत्रः लोकोत्तरः जगत्पूज्यः ज्ञानी भविष्यति इति पित्रा उद्दालकमहर्षिणा उक्तपूर्वं स्मृत्वा सा आनन्दति स्म । महर्षेः वाक्यं कदापि मिथ्या न भविष्यति इति तस्याः दृढः विश्वासः ।
कहोडस्य विद्या तदानीं फलवती अर्थकरी च नासीत् । दिनेषु गच्छत्सु तस्य नैराश्यम् अवर्धत । तेन सह तस्य कोपनत्वम् अपि । निष्कारणं सः कुप्यति स्म ।

## 6

कदाचित् मध्याह्ने भुक्तफला सुजाता पर्णशालायां कटे शयिता आसीत् । श्रान्ता सा गाढं निद्रिता । तदा कहोडः अन्यत् किमपि कर्तुम् अशक्नुवन् कांश्चित् मन्त्रान् पठति स्म । अभ्यासस्य वैरल्यात् शरीरस्य शैथिल्यात् च तस्य मन्त्रोच्चारणे विस्वरता जाता ।
सहसा कस्यापि हासध्वनिः श्रुतः । वेदपठनं विरमय्य कहोडः समन्ततः दृष्टवान् । न कश्चित् तत्र दृष्टः । 'सुजाता एव हसितवती, सा सुप्ता इव अभिनयति' इति तस्य कोपः उत्पन्नः । पृष्टवान् सः -
"सुजाते, मयि वेदपाठं कुर्वति किं हससि ?"

सुजाता सुषुप्तौ आसीत् । सा कथम् उत्तरं ददाति ?

किन्तु पुनः सः एव हासध्वनिः श्रुतः ।

"कः माम् उपहसति ?" इति कहोडः सक्रोधं बद्धभ्रुकुटिः सन् पृष्टवान् ।

"अहं तव सुतः । मातुः उदरे अस्मि । अहं हसितवान्" इति उत्तरं श्रुतम् ।

“किम् ? गर्भतः शिशुः..? तव हासस्य किं कारणम् ?” इति कोपेन असहनया च कम्पमानध्वनिः कहोडः पृष्टवान् ।

“लोके प्रवर्तमानं किमपि अहं द्रष्टुं न शक्नोमि । किन्तु शब्दः श्रूयते । तव मन्त्रपठनं मया श्रुतम् । महर्षेः उद्दालकस्य शिष्यः भूत्वा अपस्वरं पठितुं कथं न लज्जसे ?” इति गर्भस्थस्य शिशोः वचनं श्रुतम् ।

कहोडः कोपं नियन्त्रयितुम् अशक्तः अभवत् । अन्यं कमपि उपालम्भं श्रोतुं शक्तः सः वेदपाठविषये तु असहनमूर्तिः एव । क्रोधाविष्टः स्विन्नः कम्पमानगात्रः सः गर्जितवान् - “किं जल्पसि ? वेदस्य विषयं त्वं किं जानासि ? मम वेदपठने दोषं कथयितुं तव कः अधिकारः ?” इति ।

हसन् एव शिशुः अवदत् - “अहं पूर्वस्मिन् जन्मनि कृताध्ययनः । न केवलं वेदान्, अपि तु प्रातिशाख्यम् अपि पठितवान् । अद्य भवता अष्टसु स्थलेषु विस्वरता कृता । लज्जास्पदं ननु इदम् ?” इति ।

क्रोधपिशाचः कहोडम् आवृणोत् । तस्य युक्तायुक्तविवेचना दूरीभूता । नेत्रे रक्ते सञ्जाते । शरीरम् अकम्पत । सः समीपस्थात् पात्रात् जलं चुलुके गृहीत्वा अभिमन्त्र्य - “गर्वेण मदीये वेदपठने अष्ट दोषान् कथितवतः तव शरीरे अष्टसु स्थलेषु वक्रता जायताम् । त्वम् अष्टावक्रो भव” इति वदन् शापजलं सुजातायाः उदरस्य उपरि प्रौक्षत् ।

शीतजलस्य स्पर्शेन निद्रायाः उत्थिता सुजाता पत्युः रुद्ररूपं दृष्ट्वा चकिता अपृच्छत् - “नाथ, किं भवतः उग्रं रूपम् ? किमिति ममोपरि जलं प्रोक्षितम् ?”

क्रोधगृहीतः कहोडः परुषेण ध्वनिना उक्तवान् - “तव उदरे स्थितः दुष्टः शिशुः मम मन्त्रोच्चारणे अष्ट दोषान् उक्तवान् । अतः ‘अष्टावक्रो भव’ इति तं शप्तवान् अस्मि । अनुभवतु सः गर्वस्य फलम् ।”

एतत् श्रुत्वा सुजाता उच्चैः रोदितुम् आरब्धवती । “नाथ, किं कृतं भवता ? नश्यतु भवतः कोपः । देवस्य इन्द्रस्य कृपया जायमानं शिशुं जननात् प्राक् एव स्वयं पिता शप्तवान् । अहो ! एतादृशं घोरं शापं दातुं कथं तव हृदयम् अन्वमन्यत ? चोराय गौतमाय किं शापं दत्तवान् भवान् ? गर्भस्थं शिशुं शप्तवान् धन्यः किल भवान् ? प्रथमतः वयं दरिद्राः । जनिष्यमाणं शिशुं कथं पालयिष्यामि इति चिन्ता

मां पीडयति स्म । स च शिशुः सर्वाङ्गेषु वक्रः, इतस्ततः गन्तुम् अपि अशक्तः भविष्यति चेत्, किम् अहं करवाणि ? मदीयस्य दौर्भाग्यस्य अन्तः एव नास्ति खलु !'' इति वदन्ती सा अश्रुधाराम् अमुञ्चत् ।

कहोडः तदा स्वेन कृतम् अनुचितं ज्ञातवान् । 'शिशुः पशुः वा यदा वास्तवं दोषं दर्शयति, तदा तस्मै न कोपनीयम् । प्रत्युत तत्र कृतज्ञता दर्शनीया । दोषस्य मार्जने यत्नः कर्तव्यः इति शतधा महर्षिः उद्दालकः बोधितवान् । तद् विस्मृत्य अहं क्रोधवशः सन् स्वपुत्रम् एव शप्तवान्' इति तस्य हृदयम् अताम्यत् । पश्चात्तापवह्निना तस्य मनः दग्धम् । किन्तु किं प्रयोजनम् ? क्रोधेन छिन्ना नासिका पश्चात्तापेन न प्ररोहति । मदीयः क्रोधः माम् एव हतवान् इति कहोडः भृशम् अतप्यत । अश्रूणि मुञ्चन् सः बहुधा तीव्रं दुःखम् अनुभूतवान् ।

ततः आरभ्य सुजाता अपि मनोरोगेण पीडिता । 'मम पुत्रः तादृशः भविष्यति, एतादृशः भविष्यति' इति तस्याः आशा पुरा आसीत् । 'अष्टावक्रः भविष्यति, तं सर्वे उपहसिष्यन्ति, अन्ये शिशवः इव सः क्रीडितुं न प्रभविष्यति, प्रतिदिनं जनानाम् उपहासस्य च पात्रम् अहं भविष्यामि' इति चिन्तया तस्याः स्वान्तं तान्तम् । अन्नपानादिषु आसक्तिः नष्टा । भूताविष्टा इव, ग्रहगृहीता इव, उन्मत्ता इव च सदा आकाशं पश्यन्ती सा दिनानि यापितवती ।

## 7

कस्मिंश्चित् दिने सुजाता अतीव व्याकुला आसीत् । गार्हपत्यस्य अग्नेः पुरस्तात् स्थिता कृताञ्जलिः रुदती सा विलापं कृतवती - ''देव, निष्ठया श्रद्धया भक्त्या तव सेवाम् अहं कृतवती । पत्यौ परमया भक्त्या तस्य परिचर्यां कायेन मनसा वाचा कृतवती । अतिथिसपर्यायां च कदापि अनादरं न कृतवती । तथापि मम कथम् इयं दुरवस्था ? शरीरेण वक्रं शिशुं प्रसूय जनतायाः अवहेलनस्य पात्रं भवामि यत् तदपेक्षया विषप्राशनेन आत्मानं हन्तुम् इच्छामि । भवान् वदतु, किं तथा करोमि ?'' इति ।

तदा तस्याः गर्भे स्थितः शिशुः अवदत् - ''अम्ब, किम् एवं दुःखम् अनुभवसि ? अहं तव पुत्रः भविष्यामि इति मां सुकृतिनं मन्ये । पितुः शापात् मम शरीरे केवलं वक्रता भविष्यति, न बुद्धौ । अहं बुद्ध्या सर्वान् जेष्यामि । जनानां दृष्टेः वक्रतां समीकरिष्यामि । भयं तव मास्तु'' इति ।

‘गर्भे स्थितः एव पुत्रः एतादृशं विवेकं प्रदर्शयति । उत्तरत्र सः लोकोत्तरः भविष्यति’ इत्यत्र सुजातायाः विश्वासः उत्पन्नः । विस्मयेन सा पृष्टवती – ‘‘पुत्रक, गर्भे स्थितस्य तव एतादृशः विवेकः कथं सञ्जातः ?’’ इति ।

‘‘अम्ब, सर्वेषां जीविनाम् अपि पूर्वजन्मसंस्कारः अस्त्येव । मीनाः जातमात्राः जले तरन्ति । पक्षिणः अल्पवयसः एव आकाशे उत्पतन्ति । पूर्वसंस्कारस्य किञ्चित् उद्बोधनमात्रम् अपेक्षितम् । पूर्वस्मिन् जन्मनि कृतेन तपसा अहं सर्वं ज्ञानं रक्षामि । जन्मकाले अयं संस्कारः किञ्चित् निगूहितः भविष्यति । किन्तु अल्पेनापि गुरुबोधनेन सर्वं वशीभविष्यति । चिन्तायाः कारणं नास्ति’’ इति गर्भस्थः शिशुः अवदत् ।

एतेन सुजातायाः चिन्ता न शान्ता, अपि तु वर्धिता । ‘एतादृशं तपोधनं सुतम् अन्ये उपहसिष्यन्ति । तस्य जातस्य नामकरणादिकं कर्तुम् अपि नास्माकं शक्तिः । पाययितुं न क्षीरं, धारयितुं न वस्त्रं विद्यते । विद्यया लोकं जेतुं यः शक्तः भविष्यति, तस्य पोषणाय स्तोकम् अपि धनम् अस्माकं नास्ति । धिक् देवम्’ इति सा भृशं विलपति स्म ।

एकदा अश्रूणि विमुञ्चन्तीं तां दृष्ट्वा व्यथितहृदयः कहोडः पृष्टवान् – ‘‘एवं चिन्तया किं गर्भस्थं शिशुं हिंससि ?’’ इति ।

‘‘भवान् क्रोधेन मम शिशवे अदातव्यं शापं दत्तवान् । अस्मिन् गृहे कथं तं विकलाङ्गं शिशुं पालयामि ? कथं पोषयामि ? पापिष्ठा खलु अहम्’’ इति सुजाता अधिकम् रुदितवती ।

‘‘सर्वं दैवेच्छया जातम् । शिशुः शप्तः इति दुःखस्य कारणम् । किन्तु तदेव पुनः पुनः उक्त्वा मां किं निन्दसि ? अहं किं करवाणि ?’’ इति सनिर्वेदं कहोडः उक्तवान् ।

‘‘किं करवाणि इति तूष्णीं स्थीयते चेत् किं प्रयोजनम् ? जातस्य शिशोः अन्नपानकल्पनं किं पितुः धर्मः न ? जन्तवः पक्षिणः चापि स्वापत्यपोषणाय यत्नं कुर्वन्ति । जननात् पूर्वम् एव नीडं कुर्वतः पक्षिणः न दृष्टवान् किं भवान् ?’’

“सुजाते, दृष्टवान् । किन्तु देवतानां क्रोधेन इदानीं देशे अनावृष्टिः । सर्वत्र दुर्भिक्षम् । मम विद्यायाः पुरस्कारः नास्ति । यज्ञाः न प्रवर्तन्ते । किं करोमि अहं मन्दभाग्यः...?”

सुजाता सानुनयम् उक्तवती - “नाथ, दैवं निन्दित्वा एकत्र उपवेशनेन किं कर्तुं शक्यम् ? अत्र देशे अनावृष्टिः । किन्तु विपुला पृथ्वी । सर्वत्र एषा स्थितिः नास्ति इति जनाः कथयन्ति । मिथिलायां जनकमहाराजः शास्ति इति श्रुतम् । तस्य देशे विदेहराज्ये सदा सुभिक्षम् इति श्रूयते । स च महाराजः वेदविदः विप्रान् सगौरवं पश्यति । तत्र गत्वा स्वविद्यां प्रदर्श्य धनार्जनं कृत्वा आगच्छतु भवान् । अन्यथा आवयोः इव शिशोः अपि उपवासः एव स्यात्” इति ।

एतत् श्रुत्वा कहोडः आलोचयितुं प्रारम्भं कृतवान् । ‘यद्यपि मिथिला दूरे अस्ति, प्रयाणं च श्रमकरं, तथापि अदृष्टं परीक्षणीयम् । तदर्थं तत्र गन्तव्यम् । परम् अहं यदि गमिष्यामि, तर्हि सुजातायाः का गतिः ? प्रयाणं बहूनि दिनानि अपेक्षते । तत्र महाराजस्य दर्शनं प्राप्तव्यम् । तत्र पुनः स्वविद्यायाः प्रदर्शनस्य अवसराय प्रतिपालनं कर्तव्यम् । ततः यदि महाराजः प्रसन्नः भविष्यति, तर्हि किञ्चित् प्रदास्यति । ततः प्रतिनिवर्तनीयम् । तावता सुजाता एकाकिनी गर्भिणी कथं जीविष्यति ?’ इति तस्य चिन्ता सञ्जाता ।

“किं भवान् चिन्तयति ?” सुजाता पृष्टवती ।

“यदि अहं मिथिलां गमिष्यामि, तर्हि अत्र तव जीवनं कथम् ?”

“मां पितुः आश्रमे वासय । तत्र एव मम प्रसवः भवतु । तत्र माता समीपे भविष्यति चेत्, मम चिन्ता दूरीभविष्यति ।”

एषा सूचना कहोडाय अरोचत । उभौ समालोच्य, शुभे दिने उद्दालकाश्रमं प्रति प्रस्थितौ । गृहस्य द्वारं पिधाय प्रातिवेशिकेभ्यः ‘पुनः आगमिष्यावः’ इति कथयित्वा तौ प्रस्थितौ । गृहे वा सुजातायाः शरीरे वा किमपि आभरणं नासीत् । पद्भ्यां चलनं यद्यपि सुजातायाः कष्टं, तथापि गत्यन्तरं नासीत् ।

पुरा यदा सुजाता पत्युः गृहम् आगता, तदा सर्वं सुखमयम् आसीत् । बलीवर्दशकटं, मार्गे भक्षणाय भक्ष्याणि फलानि च, परितः हरिद्वर्णाः वृक्षाः - इति सन्तोषमयः परिसरः आसीत् । इदानीं तु किमपि नासीत् । अटव्याम् अपि पर्णरहिताः वृक्षाः, पुष्परहिताः लताः । नदीषु अपि अल्पं जलम् । मार्गे

छाया अपि विरला । ललाटन्तपः सूर्यः आकाशे ज्वलति स्म । मध्ये मध्ये यत्र पल्ली वा ग्रामः वा अदृश्यत, तत्र तौ विश्रमाय स्थितौ । गर्भिणीं सुजातां दृष्ट्वा द्रवितहृदयाः केचन अन्नं पानं च ददति स्म । दिनद्वयस्य दूरं क्रमितुं पञ्च दिनानि अपेक्षितानि अभवन् । अन्ततः यदा आश्रमं प्राप्तौ, तदा द्वौ अपि श्रमेण क्लान्तौ आस्ताम् ।

गर्भिणी सुजाता मातृगृहम् आगता इति महर्षिः उद्दालकः अतीव प्रसन्नः अभवत् । महर्षेः पत्नी ततोऽपि अधिकं सन्तोषं प्राप्तवती । किन्तु सुजातायाः शोचनीया अवस्था, शरीरस्य क्षीणता, दयनीयता च महर्षेः हृदयम् अतुदत् । कहोडस्य मुखात् सः कथां पूर्णाम् अशृणोत् । ततः सः उक्तवान् - "कहोड, कोपः अनर्थस्य कारणम् । क्रोधः सर्वनाशकः इति बहुकृत्वः मया उक्तम् एव । तथापि विधिः अनतिक्रमणीयः । तेन स्वसामर्थ्यं दर्शितम् । तव पुत्रः ज्ञानेन लोके पूज्यः भविष्यति इति अहं जानामि । तव अविवेकस्य कारणात् सः शरीरेण वक्रः भविष्यति । तत्र न सन्देहः । सः एव तव इहपरलोकयोः गतिः । सुजाता अत्र आश्रमे वसतु । त्वं देशसञ्चारं कृत्वा राज्ञाम् आस्थानेषु विद्यां प्रदर्श्य धनम् अर्जय । यशस्वी भूत्वा निवर्तस्व । श्रेयोऽस्तु" इति ।

मिथिला विदेहानां राजधानी । तां प्राप्तुं कहोडः एकाकी उद्दालकादिभिः दत्तं निर्देशनम् अनुसृत्य गच्छति स्म । कतिपयदिवसानां प्रयाणात् ऊर्ध्वं तेन राज्यान्तरम् आगतम् इति ज्ञातम् । तत्र वनानि फलपुष्पभरितानि दृष्टानि । नद्यः अपि जलेन पूर्णाः । जनाः अपि वेषभूषादिषु किञ्चित् भिन्नाः । तृप्तिः तेषां मुखेषु नृत्यति स्म । ग्रामेषु सुभिक्षम् आसीत् । जनाः अतिथीन् देववत् पूजयन्ति स्म । अग्रहारेषु ब्राह्मणाः अतिथिलाभाय प्रतिपालनं कुर्वन्ति स्म । तेषां सत्कारैः कहोडः सुतरां प्रीतः । सः महर्षेः उद्दालकस्य शिष्यः इति ज्ञातवन्तः विद्यावन्तः महता आदरेण तम् आमन्त्र्य दक्षिणया सम्भावयन्ति स्म । तस्य गुरुकुलवासं पाण्डित्यं च ज्ञात्वा तुष्यन्ति स्म, दस्यूनाम् आक्रमणेन सः दरिद्रो जातः इति विषीदन्ति स्म च ।

## 8

कस्मिंश्चिद् अग्रहारे कहोडं तत्रत्यः पुरोहितः आमन्त्रितवान् । आमन्त्रणम् अङ्गीकृत्य तत्र गतः कहोडः भोजनं स्वीकृतवान् । ततः तयोः संवादः प्रवृत्तः । पुरोहितः कहोडं प्रयाणोद्देशं पृष्टवान् ।

"जनकमहाराजस्य आस्थाने मम पाण्डित्यं प्रदर्श्य राज्ञः सम्मानं प्राप्तुम् इच्छामि" इति कहोडः स्वोद्देशम् उक्तवान् ।

पुरोहितः उक्तवान् - "जनकमहाराजः उदारमतिः । तस्य ज्ञानं गम्भीरं विशालं च । किन्तु तस्य आस्थाने काचन समस्या वर्तते ।"

कुतूहली कहोडः पृष्टवान् - "का सा समस्या ?"

पुरोहितः उक्तवान् - "आस्थाने बन्दी नाम कश्चन पण्डितः वर्तते । सः सर्वज्ञकल्पः । तेन अज्ञातं शास्त्रं नास्ति । यः कश्चन पण्डितः आस्थानं प्रविशतु, बन्दी तं मूर्खम् अज्ञानिनं वा कृत्वा दर्शयति । वादस्य नियमान् पूर्वं विधाय पराजितान् पण्डितान् स्ववशीकरोति ।"

"सः पण्डितान् केन कारणेन द्विषति ?"

"वयं न जानीमः । साधारणान् पण्डितान् सः न पीडयति । तेभ्यः राज्ञा किञ्चिद् दापयित्वा प्रेषयति । किन्तु यदा वेदपारङ्गताः, यज्ञकर्मविदः, शास्त्रनिष्णाताः आगच्छन्ति, तदा तान् येन केन प्रकारेण पराजयते । तथा पराजितान् वादनियमानुसारेण स्ववशीकरोति । तथा तद्वशीभूताः क्व यान्ति इति न ज्ञायते । बहवः वेदपण्डिताः आ बहोः कालात् अदृष्टाः । नद्यां तान् पण्डितान् बन्दी मज्जयति इति किंवदन्ती अपि अस्ति ।"

पुरोहितस्य मुखात् इदं श्रुतवतः कहोडस्य वदनं विवर्णं जातम् । जनकस्य आस्थाने वैदुष्यं प्रदर्श्य दारिद्र्यं दूरीकर्तुं सः आगतः । किन्तु अत्र स्वातन्त्र्यस्य प्राणानां च हरणं सम्भाव्यते । किं कर्तव्यम् इति चिन्ता तस्य मनसि उदिता ।

तस्य वैवर्ण्यं दृष्ट्वा सान्त्वयन् पुरोहितः अब्रवीत् - "भवान् महर्षेः उद्दालकस्य शिष्यः, जामाता चेति श्रुतम् अस्माभिः । तादृशस्य भवतः सम्मुखे वराकः बन्दी किं कुर्यात् ? भवान् तं विजित्य राजसम्मानं प्राप्नोतु" इति ।

तां रात्रिं तस्मिन् अग्रहारे नीत्वा सत्कृतवते ब्राह्मणाय कृतज्ञतां समर्प्य कहोडः मिथिलां प्रति प्रस्थितः । अग्रहाराणां तत्र न्यूनता नासीत् । अतः क्लेशं विना कतिपयैः दिनैः सः मिथिलानगरं प्राप्तः ।

मिथिलां परितः पुरुषद्वयदघ्नः प्राकारः लसति स्म । चतसृषु अपि दिक्षु महाद्वाराणि । महागजाः अपि सुखेन तत्र प्रवेष्टुं शक्नुवन्ति स्म । पदातयः, अश्वारोहाः, शाकटिकाः इति बहुविधाः जनाः नगरं प्रविशन्ति स्म । दौवारिकाः सर्वान् प्रविशतः जनान् कुशलप्रश्नादिभिः विचार्य परीक्ष्य प्रवेशानुमतिं

यच्छन्ति स्म । यदा कहोडः तत्र आगतः तदा राजभटाः कुशलाः तं विद्वांसं परिगणय्य सगौरवं सविनयम् अपृच्छन् - "को भवान् ? कुतः आगमनम् ? अत्र आगमनस्य उद्देशः कः?" इत्यादि । तेषां प्रश्नानाम् उत्तराणि कहोडेन दत्तानि । ततः सः लब्धानुमतिः मिथिलां प्राविशत् । 'लोकान्तरम् आगतवान् किम् अहम् ?' इति कहोडः विस्मितः अभवत् । तेन पुरा कापि नगरी न दृष्टा । अत्र तु सर्वत्र वैभवस्य दर्शनम् । यत्र यत्र दृष्टिः प्रसरति, तत्र भव्याः सौधाः । विशालाः घण्टापथाः, तत्र सञ्चरन्तः गजाः, अश्वाः, रथाः, असंख्याताः जनाः । सर्वे उत्तमानि वसनानि धृतवन्तः, लिप्तचन्दनाः, प्रसन्नवदनाः । पर्व आचरन्तः इव सर्वे सन्तोषभरिताः आसन् । 'देशः निरुपद्रवः, राजन्वान् समृद्धिमान्' इति स्पष्टम् आसीत् । केचन संस्कृतं, केचन कामपि प्राकृतीं च भाषां भाषन्ते स्म ।

विशाले पथि सञ्चरन् कहोडः क्वचित् मण्डपम् अपश्यत् । तत्र विवाहः प्रवर्तते स्म । कस्यापि धनिकस्य सुतायाः विवाहः । वाद्यानां निनादः गगनं स्पृशति स्म । कहोडः कुतूहलेन तत्र गतः । पुरोहितेषु अन्यतमः एनं दृष्ट्वा ससम्भ्रमम् उत्थाय समीपम् आगत्य स्वागतं कृतवान् । उक्तवान् च - "मां प्रत्यभिजानासि ननु ? उद्दालकस्य महर्षेः आश्रमे अहं तच्छिष्यः आसम् । नाम्ना यज्ञदत्तः" इति ।

"इदानीं त्वां प्रत्यभिजानामि । सर्वं स्मरामि । अपि कुशलं ते ?" इति उक्तवान् कहोडः ।

"सर्वं कुशलम् । त्वाम् अत्र दृष्ट्वा विस्मितः अस्मि । कदा आगतः ? का वार्ता ?"

"तत्सर्वं परस्तात् कथयिष्यामि । इदानीं विवाहस्य प्रवर्तनायां स्वं पात्रं निर्वह ।"

"भवतु । अत्र आगच्छ । विदुषां गोष्ठ्याम् उपविश" इति उक्त्वा यज्ञदत्तः कहोडं विदुषां मध्ये उपावेशयत् ।

यदा नवदम्पती ब्राह्मणेभ्यः नमस्कारान् समर्पितवन्तौ तदा ताभ्यां विप्राः वेदोक्तान् आशीर्वादान् अयच्छन् । ततः अतिथिसत्काराः, दक्षिणाप्रदानं, मिष्टान्नभोजनम् - इति सर्वं सम्पन्नम् ।

ततः कहोडः यज्ञदत्तेन साकं तस्य गृहं गतः । तद् गृहं सुसज्जितं स्वलङ्कृतं च आसीत् । यज्ञदत्तस्य भार्या अतिथिं दृष्ट्वा अतीव सन्तुष्टा । सुखोपविष्टयोः तयोः सम्भाषणं प्रावर्तत । प्रथमम् आश्रमस्य वार्ता, ततः कहोडस्य विवाहस्य कथा, ततः तस्य कष्टानां वार्ता, अन्ते च मिथिलागमने कारणम् - इति सर्वं कहोडेन प्रस्तुतम् ।

पुनः कहोडः उक्तवान् - "एवं विधिना वञ्चितः अहम् । मम पुत्रः अष्टावक्रः उत्पत्स्यते । जीवनस्य आधारभूतं गृहं, गोधनं, सुजातायै पित्रा दत्तम् आभरणजातम् इति सर्वं नष्टम् । मार्गान्तरम् अपश्यन् मिथिलायाः महाराजस्य जनकस्य आस्थाने मम भाग्यं परीक्षितुम् आगतः अस्मि" इति ।

मौनेन चिन्तनं कृत्वा यज्ञदत्तः उक्तवान् - "त्वया बन्दिपण्डितस्य नाम श्रुतं किम् ?"

"आम्, श्रुतम् । क्लिष्टान् वादनियमान् विधाय पण्डितान् सः अन्ते दण्डयति इति ज्ञायते । अपि इदं सत्यम् ?"

"सत्यम् एव । तेन वशीकृतानां वेदपण्डितानां का गतिः जाता इति वयं न जानीमः । आस्थाने पण्डितैः अपमननं सोढव्यम् । पराजितान् सः नद्यां मज्जयति इति च जनश्रुतिः । इदानीं देशान्तराद् अत्र न कश्चिद् अपि पण्डितः आगच्छति बन्दिभयात्" इति सविषादं यज्ञदत्तः उक्तवान् ।

कहोडस्य मनसि चिन्ता उत्पन्ना । किन्तु मार्गान्तरं नासीत् । निर्धारः पूर्वम् एव कृतः । तमेव यज्ञदत्ताय निवेदितवान् ।

"यथाभिलषसि तथा कुरु । महर्षेः पुत्र्याः सुजातायाः सौभाग्यं कीदृशम् इति सम्प्रति परीक्षितव्यम् । अहं त्वां महाराजस्य आस्थानं नेतुं शक्नोमि । ततः सर्वं तव हस्ते भविष्यति । बन्दिपण्डितस्य वचनं विना तत्र तृणम् अपि न चलति । महाराजः तस्य वचनं वेदाज्ञां मन्यते । पुनरपि समालोच्य निश्चयं कुरु । कुतः इति चेत् अयं तव जीवनमरणयोः प्रश्नः" इति यज्ञदत्तः तम् अचेतयत् ।

"यदा निर्धारः कृतः, तदा ततः अपसरणस्य प्रश्नः एव नास्ति । यद् भवति तद् भवतु । वादे बन्दिपण्डितं जित्वा धनिको भूत्वा प्रतिनिवृत्तः सुजातां तोषयिष्यामि । अथवा पराजितः बन्दिपण्डितस्य आदेशम् अनुसृत्य नद्यां मङ्क्ष्यामि" इति दृढया वाण्या कहोडः अकथयत् ।

"सर्वं विधेः इच्छया प्रवर्तते । तव शुभं भवतु इति अहम् अपि आशासे । द्वित्रेषु दिनेषु तव आस्थाने यथा प्रवेशः स्यात्, तथा यत्नं करिष्यामि" इत्युक्तवान् यज्ञदत्तः ।

## 9

उद्दालकाश्रमात् कहोडः यदा मिथिलां गतः, तदा आरभ्य सुजातायाः स्थितिः शोचनीयतरा आसीत् । "एतादृश्या गाढचिन्तया उदरस्थस्य शिशोः हानिः भवेत्, अतः चिन्तां परित्यज" इति पित्रा

उक्ता अपि सा चिन्तां न परित्यक्तवती । तस्याः चिन्ता दिने दिने अवर्धत, न न्यूनीभूता । 'वक्रशरीरं शिशुं प्रसूय लोकस्य निन्दायाः अपहासस्य च पात्रीभूय कथं जीविष्यामि' इति सा सततं चिन्तयति स्म । रात्रिषु सा दुःस्वप्नान् अपश्यत् ।

'कहोडस्य मिथिलां प्रति प्रेषणम् अनुचितम्' इति तस्याः भाति स्म इदानीम् । तथापि दारिद्र्यपिशाचात् विमोचनं प्राप्तुं मार्गान्तरम् अपि किम् आसीत् ?

कदाचित् उद्दालकाश्रमम् आगत्य लब्धविश्रमः कश्चन मुनिः कहोडस्य मिथिलागमनं श्रुत्वा विषण्णः सन् उक्तवान् - "वेदपारङ्गताः, यज्ञविदः तत्र न गच्छेयुः । तत्र बन्दिपण्डितः तान् ग्राहः इव दृढं गृह्णाति । अद्यावधि न कश्चन तेन मुक्तः दृश्यते" इति ।

एतद् श्रुतवत्याः सुजातायाः शोकः अवर्धततराम् । 'अहम् एव पतिं मृत्युमुखे क्षिप्तवती' इति सा भृशं दुःखितुं प्रारभत । तां समाधातुं महर्षिणा उद्दालकेन, तत्पत्न्या, इतरैः मुनिभिः च कृताः प्रयत्नाः फलवन्तः न भवन्ति स्म । अस्मिन् समये सुजातायाः माता च गर्भिणी आसीत् । सा कियद् वा पुत्र्याः साहाय्यं करोति ?

कदाचित् सुप्ता सुजाता स्वप्नम् एकं दृष्टवती । पुरस्तात् कश्चन बालकः । तस्य हस्तौ पादौ च वक्रौ । नासिका विकृता । नेत्रे द्वयोः भिन्नयोः दिशोः प्रसृते । तं दृष्ट्वा सहसा भीता सा क्रन्दितुं प्रयत्नं कृतवती ।

तदा सः बालकः ताम् उक्तवान् - "अम्ब, मा क्रन्द । अहं तव सुतः । मम बुद्धिः समीचीना वर्तते । एतादृशः पुत्रः जातः इति मा परितप्यस्व । अहं तव, पितुः कहोडस्य, मातामहस्य महर्षेः उद्दालकस्य च कीर्तिं धवलयिष्यामि विद्यया । तव प्रीतिः भविष्यति चेत्, सर्वं लोकं विजेष्ये । सम्प्रति मे पितुः महती विपत् उपस्थिता अस्ति । किन्तु त्वया इदानीं धैर्यं न त्यक्तव्यम् । उचिते काले सर्वं समीचीनं भविष्यति । चिन्ता मास्तु" इति ।

"पुत्र, तव पितुः विपद् उपस्थिता इति श्रुत्वा वेपते मे हृदयम् । कीदृशी सा विपत् ?"

"अम्ब, मा पृच्छ तत् । दैवं रहस्यं न उद्घाटनीयम् । कालान्तरे सर्वं विज्ञास्यसि" इति उक्त्वा बालकः अन्तरधात् । सुजाता निद्रायां लीना । ततःपरं सा चिन्तां त्यक्तवती । धैर्येण जीवनं सम्मुखीकर्तुं निश्चयं कृतवती ।

गतेषु कतिपयेषु दिनेषु सुजाताया मातुः प्रसवः अभवत् । पुंशिशुः जातः । तस्य श्वेतकेतुः इति नाम कृतं पित्रा । ततः सुजातायाः अपि पुंशिशुः जातः । यथा निरीक्षितं तथा शिशोः अङ्गेषु सर्वत्र वक्रता आसीत् । आश्रम-वासिनः बहवः सहानुभूत्या दुःखिताः । केचन कृत्रिमं दुःखं प्रकटितवन्तः । केचन अपहासम् अपि परोक्षे कृतवन्तः । सुजाता स्वान्तं शिलाकठिनं कृत्वा सर्वम् असहत । 'स्वेन लब्धं स्वयम् अनुभवितव्यम् । अन्ये प्रशंसन्तु, निन्दन्तु, अपहसन्तु वा । तेन किम् ?' इति सा निश्चितवती ।

महर्षिः उद्दालकः स्थितप्रज्ञः । वक्रगात्रं शिशुं दृष्ट्वा अपि सः न विचलितः । तस्य जातकं निर्माय, मुखलक्षणं हस्तरेखाः च वीक्ष्य सः - "अयं श्रेष्ठः ज्ञानी भविष्यति । पितृवंशस्य मातृवंशस्य च कीर्तिं विस्तारयिष्यति" इति प्रोक्तवान् । शिशोः नाम 'अष्टावक्रः' इत्येव जातम् ।

## 10

यज्ञदत्तस्य गृहे कहोडः दिनद्वयम् अवसत् । मिथिलायाः वैभवं समृद्धिं च सः दृष्टवान् । । ततः यज्ञदत्तम् उक्तवान् - "अयि मित्रवर्य, अत्र सर्वे जनाः प्रसन्नाः, सुखिनः आनन्दभरिताः च दृश्यन्ते । कस्यापि दरिद्रता न दृश्यते । किं कारणम् अस्याः समृद्धेः ?"

यज्ञदत्तः उक्तवान् - "यथा राजा तथा प्रजाः इति भवान् जानाति एव । अत्र महाराजः जनकः न्यायपरः । अन्यायस्य लेशम् अपि सः न सहते । अथ च सः आत्मज्ञानी । जनाः आत्मज्ञाः धर्मसक्ताः च यथा भवेयुः तथा कृतं तेन नृपेण । अत्रत्याः जनाः परकीयं वस्तु लोष्टं मन्यन्ते । अन्यदीयां स्त्रियं मातरं मन्यन्ते । रोगं मरणं वार्धक्यं च निश्चलमतयः सन्तः स्वीकुर्वन्ति । रोदनं विलापं च न कुर्वन्ति । स्वकर्मलब्धेन वित्तेन सर्वे सुखेन जीवन्ति । चोराणां दस्यूनां च अत्र उग्रदण्डः अस्ति । अतः तत्र न कश्चित् प्रवर्तते । न्याय्येन मार्गेण जीवित्वा सुखम् अनुभवितुं यदा शक्यं, तदा अन्याय्यं कः आश्रयते ? परिश्रमेण कृषीवलाः धान्यसमृद्धिं सम्पादयन्ति । कुविन्दाः वस्त्राणि उत्पादयन्ति । शिल्पिनः गृहाणि निर्मान्ति । पर्जन्यः काले वर्षति । अलसाः वञ्चकाः परोपजीविनः वा अत्र न सन्ति । अतः सर्वे सुखिनः । येषां सविधे स्वोक्षिताद् अधिकं धनं धान्यं वा भवति, ते यथेच्छं दानं ददति । मुख्यतया अत्र लोभः नास्ति । तृप्तिः सर्वत्र वर्तते । अतः एव शान्तिः समृद्धिः च" इति ।

“एतत् सर्वं युज्यते । एवं स्थिते, बन्दिपण्डितः केन कारणेन आगतान् विदुषः अवमानयति ? तस्य एतादृशी अनिष्टा चेष्टा किमर्थं महाराजेन अनुमोद्यते ?” इति कहोडः यज्ञदत्तं पृष्टवान् ।

“कहोड, ममापि इयं समस्या अस्ति एव । वादे पराजिताः पण्डिताः अदृश्याः भवन्ति । तेषां किं जायते इति न ज्ञायते । वादी यस्मिन् विषये दुर्बलः, तत्र प्रश्नान् कृत्वा बन्दिपण्डितः तं पराजयते । नियमानुसारेण महाराजः तं बन्दिपण्डिताधीनं घोषयति । पण्डितः तं नीत्वा अदृश्यं करोति । तद्विषये प्रष्टुं कस्यापि अधिकारः नास्ति । अतः एव इदानीं पण्डिताः विद्यां प्रदर्शयितुम् अत्र न आगच्छन्ति । बन्दिपण्डितः अपरः यमः इति सर्वे भावयन्ति” इति यज्ञदत्तः उक्तवान् ।

कहोडस्य मनसि विक्लवता अवर्धत । तथापि किं करोति ! भवितव्यं भवत्येव इति सः स्थिरमनाः अभवत् ।

निर्दिष्टे दिने शुभवेलायां यज्ञदत्तेन साकं कहोडः जनकमहाराजस्य आस्थानं गतः। मार्गे तेन अशुभानि दृष्टानि । तथापि सः न प्रतिनिवृत्तः । आस्थानस्य दौवारिकाय यज्ञदत्तः स्वपरिचयं दत्तवान् । ततः कहोडं दर्शयन् - “अयं खगोदरशर्मा, कहोडः इति लोके विख्यातः । आस्थानप्रवेशाय राजानुमतिः लब्धा अस्ति” इति निवेद्य कहोडेन साकं प्रविष्टवान् ।

आस्थानमण्डपं वैभवोपेतम् आसीत् । उन्नतवेदिकायां स्वर्णमयं रत्नखचितं सिंहासनं विराजते स्म । उभयोः पार्श्वयोः श्रेष्ठानि पीठानि । सिंहासनस्य पुरतः आसनानां पङ्क्तयः आसन् । तत्र मन्त्रिणः अधिकारिणः श्रीमन्तः च उपविष्टाः । अन्यस्यां पङ्क्तौ कवयः विद्वांसः गण्याः च । स्वोचितयोः पीठयोः कहोडयज्ञदत्तौ उपविष्टौ ।

“विदेहचक्रवर्तिन्, मिथिलाधिपते, चन्द्रवंशाम्बुधिचन्द्र, आत्मोपदेश विख्यात, श्री श्री जनकमहाराज पराक्” इति घोषणा श्रुता । सभा नीरवा जाता । सर्वे सभासदः उत्थाय गौरवं सूचितवन्तः ।

आगच्छतः महाराजस्य एकस्मिन् पार्श्वे महामन्त्री, अपरस्मिन् पार्श्वे तेजसा भ्राजमानः कश्चन ब्राह्मणः । सः एव बन्दिपण्डितः स्यात् इति कहोडेन ऊहितम् । महाराजे सिंहासनम् अभिवन्द्य उपविष्टे, सर्वे सभासदः अपि स्वासनेषु उपविष्टाः । विप्राः वेदघोषान् कृतवन्तः । शरीरं धृतवान् आत्मज्ञानमिव क्षात्रेण ओजसा, ब्राह्मेण तेजसा च राजमानः जनकमहाराजः प्रसन्नतया दृष्ट्या सभाम् अवैक्षत ।

“महाराजः यदि अनुमन्यते, तर्हि सभायाः कलापाः आरभ्यन्ते” इति गम्भीरेण स्वरेण बन्दी निवेदितवान् । महाराजः स्मितमात्रेण स्वानुमतिं सूचितवान् ।

प्रथमतः राजकार्याणां चर्चा प्रवृत्ता । ततः केषाञ्चिद् विवादानां निर्णयः महाराजेन कृतः ।

तत्पश्चात् बन्दी सभां वीक्षमाणः - “यदि केऽपि देशान्तराद् आगताः ब्राह्मणाः, महाराजस्य अनुग्रहापेक्षिणः दीनाः वा सन्ति, तर्हि ते पुरस्ताद् आगच्छन्तु । प्रसन्नः महाराजः तान् दानमानादिना अनुग्रहीष्यति” इति अघोषयत् ।

तदा यज्ञदत्तः उत्थाय राजानं प्रणम्य - “अयं खगोदरशर्मा उद्दालकमहर्षेः शिष्यः राजानुग्रहकाङ्क्षी उपस्थितः अस्ति । तम् अनुगृह्णातु महाराजः” इति सविनयं निवेदितवान् ।

कहोडः स्वासनाद् उत्थाय पुरस्ताद् गत्वा - “शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति” इति वेदोक्ताः आशिषः अवोचत् ।

महाराजः प्रणामपूर्वकम् आशिषः स्वीकृत्य कहोडं पीठं ग्रहीतुं सूचितवान् । ततः - “अपि कुशलं सशिष्यस्य महर्षेः उद्दालकस्य ?” इति पृष्टवान् ।

“सर्वं कुशलम्” इति कहोडः प्रत्यवदत् ।

“गवादिदानं स्वीकरोतु भवान् । वयं भवदागमनेन सुप्रीताः स्मः” इति महाराजः उक्तवान् ।

‘अयं महाराजः मां साधारणं याचकं मन्यते’ इति कहोडस्य अभासत । अवमानितः इव सः उक्तवान् -

“महाराज, उद्दालकमहर्षेः पादारविन्दयोः सन्निधौ अधीतवेदवेदाङ्गशस्त्रः अहम् । मम विद्यां परीक्ष्य मां यथोचितं सत्कर्तुम् अर्हति महाराजः । याचकतया न आगतः अहम्” इति ।

एतत्, श्रुत्वा विस्मितः इव विकसिताभ्यां नेत्राभ्यां कहोडम् आनखशिखं वीक्षमाणः बन्दिपण्डितः हसन् इव उक्तवान् - “जनकमहाराजस्य आस्थाने विद्याप्रदर्शनं कर्तुकामैः कठोराः नियमाः अङ्गीकर्तव्याः भवन्ति । वादरङ्गे प्रवेशः न शिशुक्रीडा । सिंहानां युद्धं तत् । जम्बुकाः दूरे स्थित्वा केवलं पश्येयुः” इति ।

कहोडस्य क्रोधः उत्पन्नः । तथापि तं स्तम्भयन् सः उक्तवान् - "सर्वं ज्ञात्वा एव मया महाराजसन्निधौ निवेदितम् । मदीयं शास्त्रज्ञानं निकषे कषितुम् इच्छामि । यः कोऽपि नियमः भवतु नाम, तम् अङ्गीकरोमि" इति ।

तस्य धीरं स्वरं श्रुत्वा सभास्ताराः - "साधु साधु" इति उत्तेजनम् अयच्छन् ।

"यदि भवान् वादे अस्माकं प्रश्नानाम् उत्तरं समीचीनं दास्यति, तर्हि महाराजः सर्वं भवत्समीहितं प्रदास्यति । अपूर्वस्य सम्मानस्य भवान् भाजनं भविष्यति । किन्तु यदि उत्तरदाने वैफल्यं स्यात्, तर्हि...."

"तर्हि किम् ? कः दण्डः भविष्यति ?"

"तर्हि भवान् मम वशंवदो भूत्वा मया विधास्यमानं दण्डं स्वीकरिष्यति । तत्र जले शाश्वतं निमज्जनं चापि अन्तर्भवति" इति बन्दिपण्डितः सोल्लुण्ठनम् उक्तवान् ।

"भवतु नाम । अहं सिद्धः" इति कहोडः सधैर्यम् उक्तवान् ।

"महान् प्रमोदः । भवान् अद्य राजसौधे आतिथेयीं सपर्यां स्वीकरोतु । श्वः प्रभाते वादाहवसिद्धता भविष्यति । यदि भवतः निर्धारस्य शिथिलता न भविष्यति, तर्हि आगच्छतु" इति बन्दिपण्डितेन उक्तम् ।

माध्याह्निकीः क्रियाः निर्वर्तयितुं महाराजः उत्थितः । सकलाः अपि जनाः तम् अनुसृतवन्तः ।

कहोडः तस्मिन् दिने राजसौधे सत्कारं प्राप्तवान् । महति स्नानगृहे तं नीत्वा तैलाभ्यङ्गम् अकारयन् वनिताः । ततः पुष्कलं हितं मधुरं च भोजनम् । नानाविधानि पेयानि । ततो विश्रान्तिः ।

रात्रौ हंसतूलिकातल्पे शयितोऽपि कहोडः निद्रां न प्राप्नोत् । श्वः किं भविष्यति इति चिन्ता तं बाधते स्म । निशीथे व्यतीते, किञ्चित् निद्रितं तेन । तदापि दुःस्वप्नाः अबाधन्त । आत्मानं केनापि जले मज्ज्यमानं सः अपश्यत् । स्वप्ने लोकान्तरं गतम् इव अनुभूतं तेन । सुजातां रोरुद्यमानां च पश्यति स्म । यदा प्रातः शय्यायाः उत्थितः तदा तस्य मनः प्रसन्नं न आसीत् । कथञ्चित् नित्यकर्माणि निर्वर्त्य स्नात्वा सः सन्ध्योपासनं कृतवान् ।

राजसौधस्य पाचकैः निष्पादितानि विविधानि खाद्यानि पेयानि लेह्यानि च सेवकैः कहोडार्थम् आनीतानि । किन्तु तानि आस्वादयितुं तस्य इच्छा एव न आसीत् । किमपि अशुभं सन्निहितम् इति तस्य मनः शङ्कते स्म ।

स्वगृहे स्थितस्य यज्ञदत्तस्यापि सा एव स्थितिः आसीत् । पत्न्या अर्पितानि अपूपादीनि खाद्यानि तस्मै न अरोचन्त । मित्रस्य कहोडस्य का गतिः भविष्यति इति चिन्तयन् सः अपि चिन्ताक्रान्तः आसीत् । बन्दिपण्डितस्य वाग्जालं पुरा बहून् पण्डितान् पराजितान् अकरोत् इति तेन ज्ञातम् एव । तस्य काठोर्यं, निर्दाक्षिण्यः स्वभावः, गर्वशीलता इति सर्वं भयङ्करं दृष्टम् ।

## 11

जनकराजस्य आस्थानं तस्मिन् दिने जनैः पूर्णम् आसीत् । मिथिलायां साधारणाः अपि जनाः ज्ञानोन्मुखाः । किं पुनः विद्वांसः ? 'उद्दालकमहर्षेः शिष्योत्तमः आगतः । सः बन्दिपण्डितेन साकं विवादं प्रस्तोष्यति' इति वार्ता नगर्यां प्रसृता । अतः आस्थानस्य सर्वाणि अपि पीठानि आक्रान्तानि । सकुतूहलाः जनाः वादारम्भं निरीक्षन्ते स्म । बन्दिपण्डितस्य गर्वं शमयितुं शक्तः कदा आगमिष्यति इति बहवः प्रतीक्षां कुर्वन्ति स्म । 'पुरा यथा बहवः विद्वांसः बन्दिपण्डितस्य वशीभूताः अदृश्याः जाताः, तथा अयं कहोडः अपि भविष्यति' इति केचित् परस्परं भाषन्ते स्म ।

मन्त्रिभिः दर्श्यमानमार्गः विप्रैः आशीर्भिः अभिनन्द्यमानः, वनिताभिः पुष्पप्रकरैः अवकीर्यमाणः, प्रजाभिः सनमोवाकं दृश्यमानः जनकमहाराजः आगत्य सिंहासने समुपविष्टः । बन्दिपण्डितः यथापूर्वं स्मयमानः स्वपीठे विराजमानः अभवत् । तदा मन्त्रिषु अन्यतमः सभाम् उद्दिश्य गम्भीरेण स्वरेण अघोषयत् - "अवधारयतु महाराजः । शृण्वन्तु विद्वांसः । विदांकुर्वन्तु च प्रजाः । अद्य आस्थाने कश्चन विशेषः ! महर्षेः उद्दालकस्य शिष्यः कहोडः जनकास्थानस्य विभूषणेन बन्दिपण्डितेन साकं वादं प्रस्तौति । यः वादे विजयी, तस्य पराजितः वंशवदः भविष्यति । विजयिनं महाराजः गोसहस्रेण कनकाभरणैः च सम्मानयिष्यति । तर्कशास्त्रानुसारेण वादः प्रचलिष्यति" इति

"वादस्य नियमाः उभाभ्यां पक्षाभ्यां स्वीकृताः ननु ?" इति महाराजः पृष्टवान् ।

"वादस्य सर्वान् नियमान् पूर्णतया विदित्वा स्वीकृत्य च वादरङ्गं प्रविष्टः अस्मि" इति कहोडः उक्तवान् ।

“पूर्वम् अपि बहुवारं वादयुद्धं कृतवान् अस्मि । अतः अत्र मम तु नूतनं न किञ्चित्” इति बन्दिपण्डितः कहोडं सावज्ञं वीक्षमाणः उक्तवान् ।

“आरभ्यतां स्पर्धा” इति जनकमहाराजः अनुमतिम् अघोषयत् ।

“प्रथमं वेदवेदाङ्गयोः उभौ अपि वादिनौ स्वपाण्डित्यं प्रदर्शयताम्” इति सभास्तारः प्रार्थितवन्तः ।

हसन् इव बन्दिपण्डितः कहोडम् उक्तवान् - “भवान् नासदीयसूक्तस्य घनपाठं श्रावयतु” इति ।

कहोडः यथोक्तम् अपठत् । एकमेकम् अक्षरं शास्त्रानुसारेण तेन उच्चारितम् । तत्र सर्वेषां सम्मतिः प्रकटिता ।

प्रश्नकरणस्य अवकाशः कहोडस्य । “हिरण्यगर्भसूक्तं जटाक्रमेण बन्दिपण्डितः पठतु” इति सः उक्तवान् ।

बन्दिपण्डितः शास्त्रसम्मतया रीत्या यथोक्तं तथा अपठत् । ततः विविधेषु विषयेषु तयोः प्रश्नोत्तरमाला प्रवृत्ता । संहिता-ब्राह्मण-आरण्यकेषु द्वयोः अपि विशालं ज्ञानं प्रश्नातीतम् इति राजा सभासदश्च सम्यग् ज्ञातवन्तः ।

सन्तुष्टः जनकमहाराजः - “यस्मिन् कस्मिंश्चित् विषये पक्षप्रतिपक्षौ आश्रित्य वादः प्रस्तूयताम् । तदा जयपराजययोः निष्कर्षः सुलभः भविष्यति” इति आदिशत् ।

बन्दिपण्डितः उक्तवान् - “महाप्रभो, वेदाः पौरुषेयाः अपौरुषेयाः वा इति महान् विवादः वर्तते । कहोडः कमपि अभीष्टं पक्षं स्वीकरोतु । अहं तत्प्रतिपक्षीभूय तद्वादं खण्डयिष्यामि” इति सविश्वासम् अघोषयत् ।

“वेदाः अपौरुषेयाः इति मदीयः पक्षः” इति कहोडः दृढया वाण्या उक्तवान् ।

“तं पक्षं खण्डयित्वा ‘वेदाः पौरुषेयाः’ इति अहं साधयिष्यामि” इति बन्दिपण्डितः साट्टहासम् अवदत् ।

“भवतु । अयम् अस्माकम् अपि कुतूहलजनकः विचारः” इति महाराजः अकथयत् । वादः आरब्धः ।

“अनादयो वेदाः । जगत्कर्तुः निःश्वसितं वेदाः । वेदेभ्यो जगत् निर्ममे आदिकर्ता । अतः जगतः पूर्वम् एव वेदाः स्थिताः । प्रलयानन्तरम् अपि ते अवस्थास्यन्ते । तेषाम् एव वेदानां पुनः पाठो भविष्यति । विष्णुः तानेव वेदान् ब्रह्मणे उपदेक्ष्यति । ततो ब्रह्मा जगत् स्रक्ष्यति । ततो गुरुशिष्यपरम्परा भविष्यति । अतः न मानवकृताः वेदाः । अतः तेषाम् अपौरुषेयत्वम्” इति कहोडः स्ववादं प्रस्तुतवान् ।

“वेदाः नाम वाक्यसमुदायाः । वाक्यं नाम बोधजनकः पदसमूहः । स्वाभिप्रायं बोधयितुं जनाः वाक्यानि प्रयुञ्जते इति प्रत्यक्षसिद्धम् । इदानीं वयं मानवाः यथा अर्थबोधकं वाक्यं प्रयुञ्ज्महे, तथा प्राचीनैः प्रत्युक्तानां वाक्यानां समूहः एव वेदः । तत्र परमात्मनिःश्वसितम् इत्यादिकथनं श्रद्धोत्पादनाय विहितः अर्थवादः। ‘यत्र यत्र वाक्यत्वम् तत्र तत्र मनुष्यबुद्धिरचितत्वम्’ इति व्याप्तिः । अतः वेदाः अपि पौरुषेयाः एव इत्यत्र संशयः एव नास्ति” इति बन्दिपण्डितः गाम्भीर्येण अवोचत् ।

“जनाः स्वज्ञातेषु विषयेषु भाषन्ते । तत्र स्वाभिप्रायान् प्रकटयितुं वाक्यानि रचयन्ति । किन्तु मानवैः प्रत्यक्षेण अनुमित्या वा ज्ञातुम् असाध्याः विषयाः यज्ञस्वर्गादयः वेदेषु प्रतिपादिताः । अलौकिकं यज्ञादिरूपं धर्मं तदुपायभूतं यज्ञं वा मानवमात्रं कथं जानीयात् ? अतः यज्ञादिप्रतिपादकः वेदः अपौरुषेयः एव” इति कहोडः स्वपक्षं समर्थितवान् ।

“कल्पनया ऊहया च मानवाः किं किं न भाषन्ते ? परलोकादिकं तथैव तैः कल्पनया उपपादितम् । कथासु लोके क्वापि अदृष्टं विचित्रप्राण्यादिकं तैः किं न वर्णितम् ? तथैव स्वर्गः, तथैव यज्ञः । तेन वेदस्य अपौरुषेयत्वं न सिध्यति । अपि च, वेदेषु यज्ञैः सेत्स्यतः फलस्य कामनया भाषमाणानां वाक्यानि श्रूयन्ते । ‘अस्माकं लोकेषु अस्माकं तनयेषु च कोपो न दर्शनीयः । अस्माकम् आयूंषि रक्ष’ इत्यादि वाक्यानि च । एवं च मानवानाम् एव एतानि वचनानि । ‘अन्नपाने देहि, वासांसि देहि, गाः देहि’ इत्यादि किं सूचयति ? आशान्वितस्य कस्यापि मानवस्य वाक्यम् एतदिति स्पष्टं भाति । अपि च ‘अक्षैर्मा दीव्यः’ इत्यादिकम् अक्षक्रीडां तदनिष्टफलं च दृष्ट्वैव प्रोक्तम् । कथम् अस्य वेदस्य अपौरुषेयत्वम् ?” इति बन्दिपण्डितः अब्रवीत् ।

कहोडः विचलितः नाभवत् । “यदि वेदाः पुरुषरचिताः स्युः तर्हि तत्र कर्तुः उल्लेखः स्यात् । किन्तु ऋग्वेदः अनेन रचितः, यजुर्वेदः अनेन रचितः इति क्वापि नास्ति । ऐश्वर्यप्रार्थना अभययाचना इत्यदि मानवकुलस्य हितम् इति अपौरुषेयः अपि वेदः बोधयति । हिते प्रवर्तनम्, अहितात् निवर्तनम् इति खलु शास्त्रस्य लक्ष्यम् । तद् अपौरुषेयेण वेदेन क्रियते चेत् को दोषः ? अतः अपौरुषेयाः एव वेदाः” इति सोऽपि सधैर्यम् उक्तवान् ।

बन्दिपण्डितः उच्चैः हसितवान् । "कहोड, उद्दालकमहर्षेः शिष्यस्य तव एतावद् एव ज्ञानं वा ? वेदेषु कर्तृस्मरणं नास्ति इति यदुक्तं त्वया, तन्न । सर्वेषां मन्त्राणाम् ऋषिः कीर्त्यते इति त्वं न जानासि किम् ? गृत्स्नमः, विश्वामित्रः, अघमर्षणः इत्यादयः ऋषयः तस्य तस्य मन्त्रस्य कर्तारः । अत एव मन्त्रोच्चारणात् प्राक् ते स्मर्यन्ते । बहुभिः ऋषिभिः रचितानां मन्त्राणां संग्रहः वेदः । अतः वेदस्य एकः कर्ता न कथ्यते । किन्तु तस्य पौरुषेयत्वं स्पष्टं ज्ञायते खलु?" इति च स्ववादम् उपस्थापितवान् ।

"ऋषयो मन्त्रद्रष्टारः । न मन्त्रकर्तारः । नित्यां सत्यां वेदानुपूर्वीं ते तपसः प्रभावेण साक्षात्कृतवन्तः । न पुनः स्वेच्छया किमपि काल्पनिकं रचितवन्तः । कल्पादौ परमात्मा ब्रह्मणे वेदान् उपदिशति । ते एव गुरुशिष्यपरम्परया रक्ष्यन्ते । प्रलये जगत्समस्तं नष्टं भवति । किन्तु परमात्मा नूतनकल्पे आरभ्यमाणे ब्रह्मणे वेदान् यथायथं समुपदिशति । स च ऋषिभ्यः उपदिशति । अतः विश्वामित्रादयः मन्त्रान् ब्रह्मणः साक्षात्कृतवन्तः इति तेषां नाम तत्र तत्र स्मर्यते । एतावता वेदानां पौरुषेयत्वं न भवति । अपि तु अपौरुषेयत्वम् एव" इति कहोडः प्रोक्तवान् ।

"कहोडमुने, प्रथमतः 'वेदा नित्याः' इत्येव न समर्थनार्हम् । परमात्मा ब्रह्मणे उपदिशति इत्यादिकं कथामात्रम् । वेदेषु वसिष्ठ-विश्वामित्रयोः कलहः वर्णितः । दाशराजानां युद्धं वर्णितम् । एताः घटनाः यदा अभवन्, तदा तदनन्तरं वा एवं वर्णितम् इति स्पष्टम् । यदि वेदाः नित्याः, तर्हि कादाचित्कघटनानां तत्र वर्णना कथम् उपपद्यते ? यदि एताः घटनाः नैव लोके अभवन् इति कथ्यते, तर्हि वेदाः मिथ्यावादिनः इति अभ्युपगन्तव्यम् स्यात् । अन्यथा तु लौकिक्यः घटनाः तैः वर्णिताः इति अङ्गीकर्तव्यम् एव । एवं सति कथं वा वेदानाम् अपौरुषेयत्वम् समर्थ्यते ?" इति बन्दिपण्डितः साट्टहासं दशसु दिशासु प्रतिध्वनितं स्ववादं प्रस्तुतवान् ।

कहोडः अप्रतिभः अभवत् । उत्तरं किमपि तस्य न भाति स्म । तस्य शरीरम् स्विन्नम् अभवत् । रसना शुष्का जाता । हृदयम् अकम्पत । मुखं कान्तिहीनं श्वेतं जातम् । दुःखेन अवमानेन च सः शिरः अवनमितवान् । तम् अवाङ्मुखं दृष्ट्वा विजयगर्वेण माद्यन् बन्दिपण्डितः - "किं तूष्णींभूतः ? उत्तरं देहि । अथवा पराजितोऽस्मि इति घोषय" इति व्याघ्रवत् गर्जितवान् ।

कहोडस्य देहः वाताहतशुष्कपर्णवत् वेपते स्म । 'वादे पराजितः अस्मि, मम अन्त्यकालः सन्निहितः । प्रयत्नं कृतवतापि मया सुजातायाः आशा न परिपूरिता । अहं सर्वथा विफलः दरिद्रः एव सर्वं जीवनं

नीतवान्'  इत्यादयः भावनाः तस्य हृदये पुङ्खानुपुङ्खतया उद्गच्छन्ति स्म । अङ्गानि विषसर्पदष्टस्य इव अशक्तानि अभवन् । कण्ठः गद्गदयुक्तः जातः । शून्यदृष्ट्या सभां विलोक्य अवाङ्मुखः भूत्वा सः 'पराजितोऽस्मि' इति अस्पष्टया वाचा अवदत् ।

''बन्दिपण्डितो विजयते'' इति तस्य शिष्यवृन्दम् उच्चैः अघोषयत् । सभायां स्थिताः केचन सहृदयाः पण्डिताः असहायाः सन्तः दुःखेन मुखानि अवाञ्चि कृतवन्तः । 'बन्दिपण्डितस्य क्रूरयज्ञः पशुम् एकं पुनरलभत' इति अन्ये चिन्तितवन्तः । सहाध्यायिनः साधोः मित्रस्य अतिथिभूतस्य एषा दशा जाता इति यज्ञदत्तः शरविद्धः इव नितान्तम् अतप्यत ।

गर्वेण हसन् बन्दिपण्डितः - ''नियमानुसारेण कहोडः मम वशीभूतः इति राजाज्ञा घोषणीया'' इति राज्ञः मुखं पश्यन् निवेदितवान् ।

''वादनियमानुसारेण पराजितः विजितवतः अधीनः । तद्विषये सम्पूर्णम् अधिकारं बन्दिपण्डिताय यच्छामः । कहोडविषये यथेष्टं व्यवहर्तुम् अर्हति अत्रभवान्  बन्दिपण्डितः'' इत्युक्त्वा जनकमहाराजः आस्थानमण्डपात् निर्गतवान् ।

सकलां सभां कटाक्षेण वीक्षमाणः बन्दिपण्डितः गर्वयुतेन  स्वरेण -''कहोड, मम वशंवदोऽसि । अनुगच्छ माम्'' इत्याज्ञापितवान् ।

निस्तेजस्कः कहोडः वधस्तम्भं प्रति गच्छन् पशुः इव बन्दिपण्डितम् अन्वगच्छत् ।

अतितमां विषण्णः खिन्नः गृहम् आगतः यज्ञदत्तः किंकर्तव्यतामूढः सन् सुचिरम् स्थितवान् । यदा सः एकाकी अवाङ्मुखः गृहं प्रतिनिवृत्तः, तदा सभायां किं वृत्तम् इति ज्ञातवती तस्य पत्नी किमपि न पृष्टवती । 'कहोडः मया केनापि उपायेन निवारणीयः आसीत्, बन्दिपण्डितस्य वादकौशलविषये, तस्य कार्यविषये, वादनियमानां कठोरताविषये च मया अधिकं बोधनीयम् आसीत् ।  तदा प्रायशः कहोडस्य इयं विपत् न आपतेत्' इति सः बहुवारम् चिन्तितवान् । पत्नी च अवाङ्मुखी पत्ये भोजनं परिविष्टवती । किन्तु किमपि भोक्तुं सः न अशक्नोत् । दम्पती उपोषितौ एव रात्रिम् अनयताम् ।

किन्तु मानवैः दैवं विरुध्य किं कर्तुं शक्यते ? सर्वं सोढव्यम् । कर्तव्यं परिपालनीयम् । महर्षये उद्दालकाय इयं वार्ता प्रेषणीया एव इति सः निश्चयं कृतवान् । कञ्चन वटुम् आनीय तं ंविदितमार्गं कृत्वा सन्देशं स्पष्टाक्षरैः बोधयित्वा, मार्गव्ययस्य व्यवस्थां कृत्वा, रक्षकभटं च कल्पयित्वा प्रेषितवान् ।

कतिपयानि दिनानि प्रयाणं कृत्वा सः वटुः उद्दालकाश्रमं प्राप्तवान् । सन्ध्यावेलायां सः तत्र उपस्थितः । सायन्तनस्य सवनस्य मन्त्राः तदा श्रूयन्ते स्म । केचन ब्रह्मचारिणः सन्ध्योपासनायां निरताः आसन् । धृतवल्कलाः काश्चन ऋषिकन्याः वृक्षालवालेषु जलं पूरयन्ति स्म । वटुः आश्रमं प्रविश्य प्रवहन्त्यां झर्यां पाणिपादं प्रक्षाल्य सन्ध्यावन्दनं कृत्वा कस्यचन ऋषेः सविधे गत्वा नामगोत्रकथनपूर्वकम् अभिवादनं कृतवान् ।

''आयुष्मान् भव'' इति लब्धाशीः सः पुनः उक्तवान् - ''अहं मिथिलातः आगतः अस्मि । महर्षेः दर्शनं प्राप्य तस्मै मुख्यः सन्देशः प्रापणीयः'' इति ।

मिथिलाशब्दं श्रुतवता ऋषिणा सन्देशस्य महत्त्वं ज्ञातम् । झटिति सः वटुं महर्षेः उद्दालकस्य समीपं नीत्वा - ''अयं वटुः मिथिलातः भवते सन्देशं श्रावयितुम् आगतः अस्ति'' इति उक्तवान् ।

महर्षिः वटोः मुखं दृष्ट्वा 'अयम् अशुभं सन्देशम् आनीतवान्' इति ज्ञातवान् । उपवेष्टुं दर्भासनं दर्शयित्वा 'कथ्यताम्' इति उक्तवान् ।

वटुः प्रवरकथनपूर्वम् अभिवादनं कृत्वा दर्भासने उपविश्य उक्तवान् - ''महर्षिणा अहं क्षन्तव्यः । शोकसन्देशानयनस्य दौर्भाग्यं मया प्राप्तम् । भवतः शिष्यः मिथिलानगरवासी पुरोहितः यज्ञदत्तः भवत्पादयोः प्रणामं समर्प्य सन्दिशति'' इति ।

''शुभम् अशुभं वा, सन्देशवाहकस्य न दोषः । अभिधीयताम्'' इति महर्षिः उक्तवान् ।

''भवतः शिष्यः जामाता च कहोडः मिथिलायाः महाराजस्य आस्थाने स्वविद्यानैपुण्यं दर्शयितुम् आगतवान् । आस्थाने बन्दिपण्डितेन सह शास्त्रार्थचर्चा प्रवृत्ता । तत्र कहोडः पराजितः ।''

''वादे युद्धे स्पर्धासु च जयपराजयौ दैवाधीनौ । ततस्ततः ?''

''ततो वादनियमानुसारेण कहोडः बन्दिपण्डिताय समर्पितः । ततः तस्य स्थितिगती न ज्ञायेते । पूर्वम् अपि वादे पराजिताः बन्दिपण्डितस्य वशीभूताः केऽपि पुनः जनैः न दृष्टाः । 'पराजितान् पण्डितान् बन्दिपण्डितः नद्यां मज्जयति' इति जनाः वदन्ति । मित्रं सतीर्थ्यं रक्षितुम् असमर्थं मां क्षन्तुम् अर्हति महर्षिः इति पुरोहितो यज्ञदत्तः सन्देशं प्रेषितवान् ।''

महर्षिः बद्धभ्रुकुटिः अभवत् । अर्धनिमीलितनेत्रः क्षणं ध्यानमग्नः स्थितः ।

ततः ‘‘दैवेच्छा अनुल्लङ्घनीया’’ इति उद्गारं कृत्वा - ‘‘आश्रमे दिनद्वयं स्थित्वा अन्नपानादिभिः शरीरायासं परिहृत्य ततः स्वग्रामं गन्तुम् अर्हसि’’ इति अब्रवीत् ।

केषुचिदेव निमिषेषु इयं वार्ता दावानलवत् आश्रमे प्रसृता । दुर्वार्तां श्रुतवती सुजाता वज्राहता लता इव विसंज्ञा धरायां पतितवती । ऋषिपत्न्यः जलसेचनादिना शीतोपचारेण तां लब्धसंज्ञां कृतवत्यः । सर्वासां तासां मुखानि पश्यन्ती - ‘‘को वा इमां वार्ताम् आनीतवान् ? आनयत तम्’’ इति उच्चैः व्यलपत् सुजाता ।

वटुः तत्र आगत्य तस्याः पादयोः निपतितवान् । सा रुदती विलपन्ती तं पृष्टवती - ‘‘भोः, किम् अभूत् मम पत्युः? मुनिः कहोडः किमर्थं न प्रतिनिवृत्तः ? ब्राह्मणः, वेदवित्, उपशान्तः सः कथं बन्दिपण्डितस्य वशीकृतः ? कथं क्रूरेण तेन मम पतिः जले मज्जितः ? जनकमहाराजः ब्रह्मज्ञानी इति समस्तः लोकः प्रशंसति । कीदृशः ज्ञानी सः, यः स्वराज्ये ईदृशम् अन्याय्यम् अनुमन्यते ? मम पत्या किमपराद्धम् ?’’ इति सा सततं प्रश्नान् पृष्टवती ।

‘‘मातः, मां क्षमस्व । कहोडमुनिना किमपि न अपराद्धम् । महाराजश्च विद्यापक्षपाती । किन्तु आस्थानपण्डितः बन्दी कठोरान् वादनियमान् करोति । तादृशनियमान् अभ्युपगतवन्तः एव वादरङ्गे अवतरन्ति । पराजितः नियमानुसारेण विजयिनो वशंवदः भवति । तथा वशीभूतस्य गतिः का भविष्यति इति न केनापि ज्ञायते । ‘बन्दी पराजितं नदीसमीपं नयति । तत्र मज्जयति । ततः तस्य कथा समाप्ता भवति’ इति जनाः कथयन्ति । अहं किमपि अन्यत् न जानामि । यज्ञदत्तस्य आज्ञया सन्देशम् अहम् आनीतवान् । एतावदेव’’ इति वटुः स्वयम् अश्रूणि विमुञ्चन् उक्तवान् ।

‘‘बन्दिपण्डिताय एतावदधिकारं दत्तवान् जनकः पापी । वेदविदः पण्डितान् जले मज्जयितुम् अवकाशं यः ददाति, तस्य ज्ञानेन किं फलम् ? गच्छ मिथिलाम् । कथय जनकमहाराजम् । पतिवियुक्ता यथाहं तप्ये तथा तस्यापि सुता पतिविरहेण तप्ता भविष्यति । अयं मम शापः’’ इति विलपन्ती सुजाता पुनः विसंज्ञा अभवत् । अवाङ्मुखः वटुः ततः उत्थाय शीघ्रम् एव मिथिलां प्रतिनिवृत्तः ।

## 12

सुजाता नवप्रसवा । तस्याः शिशोः मासमात्रं वयः । शरीरस्य अष्टसु भागेषु वक्रः शिशुः कटे सुप्तः । पत्युः दुर्वार्तायाः श्रवणेन सुजातायाः का स्थितिः भविष्यति इति आश्रमस्य सर्वाः स्त्रियः

कातराः आसन् । जामातुः शोकमयीं वार्तां श्रुतवती सुजातायाः माता तत्र आगत्य सुजातां शैत्योपचारेण लब्धसंज्ञां कृत्वा बहुधा सान्त्वयन्ती दुःखदग्धां तां समाधातुं यत्नं कृतवती ।

''अम्ब, किं करोमि ? अल्पे वयसि मे वैधव्यम् । अष्टावक्रः इति अन्वर्थाभिधानः शिशुः । दरिद्रतायाः पराकाष्ठा । एवं स्थितेऽपि किमर्थं मया प्राणाः धरणीयाः ?'' इति सुजाता उच्चैः रोदितुम् आरब्धवती ।

'कथं सुता समाधातव्या, कैः वचनैः सान्त्वनं वक्तव्यम्' इति मातुः न अभासत ।

सा निर्निमेषं सुतां पश्यन्ती तदा तदा उद्गतानि अश्रूणि प्रोञ्छन्ती तूष्णीम् उपविष्टा ।

परेद्यवि महर्षिः उद्दालकः स्वयं सुजाताम् उद्दिश्य सान्त्वनवचनानि उक्तवान् - ''वत्से, सुजाते, मानवः विधेः हस्ते भ्राम्यत् क्रीडनकम् इव । यदा विधिः सुमुखः तदा वयं 'सर्वम् अस्मदधीनं वर्तते, अस्मदिष्टानुसारेण जगद् विपरिवर्तते' इति भावयामः । किन्तु न कस्यापि विधिः सदा सुमुखः । सदा सुखं न कस्यापि । विपत् दुःखं कष्टं चेत्यादि सकलमपि अनिवार्यम् । आश्रमे जाता, आश्रमे वर्धिता, मत्तः विद्याम् उपार्जितवती त्वम् एतत् सत्यं ज्ञातुम् असमर्था किम् ? स्थैर्यस्य परीक्षा एतादृशेषु अवसरेषु एव । किञ्चिद् आलोच्य मनः स्तिमितं कुरुष्व'' इति ।

''पितः, मया को वा अपराधः विहितः यद् विधिः माम् एवं दण्डयति ? अहम् अस्य शोकस्य भरणे असमर्था । कहोडः लोकेऽस्मिन् यदा नास्ति, तदा किमर्थं मया अत्र भवितव्यम् ? सुखदुःखयोः सहभागिनी इति यः मां परिगृहीतवान्, सः एव मां त्यक्त्वा गतः । इदानीं किमहं करवाणि ?''

''वत्से, त्वां त्यक्तुं कहोडः न गतः । स खलु दारिद्र्यं दूरीकर्तुं प्रयत्नं कृतवान् । स एव प्रयत्नः विपदम् आनयत् । इदानीं त्वया धैर्यम् अवलम्ब्य दुःखं सोढव्यम् । नान्यः पन्थाः विद्यते ।''

''पितः, जीवितुं मम न कश्चन आधारः । सहगमनाय अनुमतिं मह्यं देहि । पत्युः शरीरम् अत्र नास्ति । तथापि तमेव अनुस्मरन्ती चिताम् आरोहामि ।''

''इयं मूर्खता । इयं कातरता । कहोडः वादे पराजितः सन् बन्दिपण्डितस्य वशीभूतः इति सत्यम् । तस्य ततः का गतिः जाता इति तु ऊहापोहस्य विषयः । तत्र प्रत्यक्षं प्रमाणं नास्ति । यदि च कहोडस्य मरणं निश्चितं, तदापि सहगमनं न साधु । तस्य सुतस्य पालनं पोषणं च यथाशक्ति त्वया कर्तव्यम् ।

अनुमरणेन किमपि न साध्यते । पलायनमार्गः खलु चितारोहणम् । न तत्र शास्त्रसम्मतिः । प्राणाः सर्वप्रयत्नेन रक्षणीयाः । वेदवचनेन अविहितम् अनुमरणं पापकारणम् ।"

"शिशुं कथं पालयेयं, कथं पोषयेयम् ? स खलु अष्टावक्रः । तस्य लोकेऽस्मिन् स्थानं क्व वर्तते पितः ?"

"तथा न वक्तव्यम् । सुते सुजाते, पूर्वम् एव मया अभिहितम् । तव सुतः अभूतपूर्वः ज्ञानी भविष्यति । अस्मै जगते ज्ञानप्रकाशं वितरिष्यति । मम तपसि वचसि च तव विश्वासः वर्तते चेत्, तं प्रीत्या पालय, पोषय, वर्धय । सः पितरं वंशद्वयं च समुद्धरिष्यति । रक्ष मे वाचि विश्वासम् ।"

पितुः वचसि सुजातायाः दृढः विश्वासः आसीत् । तथापि साश्रुनयना सा तं पृष्टवती - "प्रथमतो वक्रं रूपम् । पितरं चक्षुषा सकृदपि अदृष्टवान् अनाथः अयम् । कथं सः वर्धते पितः ?"

"अयम् अस्माकम् आश्रमे एव वर्धताम् । तव अनुजः श्वेतकेतुः इव अयम् अपि मे दौहित्रः अत्र पालयिष्यते । पूर्वजन्मसंस्कारसम्पत् तव पुत्रस्य महती वर्तते इति अहं जानामि । कतिपयेषु एव वर्षेषु सः समस्तविद्यापारङ्गतः भविष्यति । तव सर्वं दुःखं च परिहरिष्यति" इति उक्तवान् महर्षिः उद्दालकः । दुःखं सर्वं हृदये निगूह्य सुजाता कथमपि मनः समादधात् । शिशुं प्रीत्या आलिङ्ग्य अश्रुविमोचनेन हृदयस्य भारं लघूकृतवती ।

कालचक्रं सदा भ्राम्यति । न कस्यापि कृत  तत् क्षणम् अपि अवतिष्ठते । जनस्य कष्टम् अस्तु, सुखं वा, कालचक्रस्य भ्रमणम् अप्रतिहतम् । विशालस्य अपरिमितस्य विश्वस्य व्यवस्थायां कस्य वा प्राधान्यम् ? कालस्य दृष्टौ राजानः श्रीमन्तः दासाः दरिद्राः सर्वेऽपि समानाः । सर्वेऽपि साधारणाः । अष्टावक्रः बहूनाम् अपहासस्य विषयः भूत्वापि दिने दिने वर्धते स्म । तस्य चङ्क्रमणं संक्रमणं वा अन्येषाम् इव नासीत् ।

वक्राङ्गस्य तस्य एकैकम् अपि पदं जनानां हासस्य, सुजातायाः रोदनस्य  च कारणं भवति स्म । प्रथमतः तं दृष्टवन्तः तु बहुधा हसित्वा विविधान् प्रश्नान् कृत्वा च सुजातायाः दुःखस्य वृद्धेः कारणं भवन्ति स्म । आश्रमस्य बालकाः बालिकाश्च अष्टावक्रस्य एकैकाम् अपि चेष्टाम् अनुकृत्य विनोदं लभन्ते स्म ।

किन्तु अल्पे एव वयसि अष्टावक्रस्य बुद्धिः सूक्ष्मा प्रचण्डा च आसीत् । श्रुतधरः सः । सकृत् श्रुतं सर्वं सः पुनरुच्चारयितुं शक्तः आसीत् । सर्वे मन्त्राः, सर्वाणि ब्राह्मणवाक्यानि, सर्वाः उपनिषदः श्रवणमात्रेण तस्य वशीभवन्ति स्म । सर्वम् इदम् एषः पुरा कुत्र कस्माद् अधीतवान् इति सर्वेषां संशयः भवति स्म । लौकिकेषु अपि विषयेषु अन्येषां छात्राणां, यूनां, वृद्धानां, मुनीनां च यत्र संशयः, तत्रापि अस्य बुद्धिः सलीलं प्रवहति स्म । यज्ञानां विधौ विधाने वा यदा ऋषयः सन्देहेन विरताः भवन्ति स्म, तदा अष्टावक्रः 'इदमित्थम्' इति निर्णयं प्रदातुं समर्थः आसीत् । तस्य अप्रतिमायाः मेधाशक्तेः कुतूहलं शमयितुं स्वयं महर्षिः उद्दालकः अपि असमर्थः आसीत् ।

महर्षेः सुतः श्वेतकेतुः अपि अष्टावक्रसमानवयस्कः । किन्तु विद्यायां तयोः तारतम्यं सुस्पष्टम् आसीत् । अन्ये दशभिः वर्षैः यद् अधिगच्छन्ति तद् अष्टावक्रः दशभिः मासैः, कदाचिद् दशभिः दिनैः एव अधिगच्छति स्म । वेदपठने तु तन्मुखाद् एकम् अपि अक्षरम् अपस्वरोपेतं न निर्गच्छति स्म । 'साक्षाद् वेदपुरुषः एव तस्य वदने निवसति' इति जनाः भाषन्ते स्म ।

सुतस्य रूपं सुजातायाः यावतीं वेदनां करोति स्म, ततोऽधिकं मुदं तस्य बुद्धिः जनयति स्म । अपितृकः अनाथः इति आश्रमे तं न कश्चिद् अवज्ञया पश्यति स्म । महर्षेः तस्मिन् महती प्रीतिः, महान् आदरश्च इति सर्वे जानन्ति स्म । अष्टवर्षीयः अपि अष्टावक्रः वयोवृद्धान् अपि बोधयितुं समर्थः आसीत् । गर्भाष्टमे उपनीतः सः गायत्र्यभिमन्त्रणेन प्रकृष्टतेजाः अभवत् । शास्त्राध्ययनम् आरभ्य चतुर्भिः एव वर्षैः वेदेषु वेदाङ्गेषु पुराणेषु धर्मशास्त्रेषु स्मृतिषु वाकोवाक्ये इतिहासे च सः प्रवीणः अभवत् ।

आसतां सहाध्यायिनः, ज्येष्ठाः ऋषयः, आश्रमान्तरवासिनः लौकिकाश्च शास्त्रेषु यज्ञक्रियाकलापेषु च स्वीयान् संशयान् निवारयितुम् अष्टावक्रम् आश्रयन्ति स्म । स्वयं महर्षिः उद्दालकः धर्मरहस्येषु अस्पष्टेषु दौहित्रं स्वाङ्के उपवेश्य तस्य विचारान् सावधानं शृणोति स्म । सुजाता अनन्तया चिन्तया सन्तप्यते स्म । सा सौभाग्यवती वा विधवा वा इति संशयितम् आसीत् । " सौभाग्यवती इव आत्मानम् अलङ्कुरु, तव पतिः मृतः इति कः वदति ?" इति तस्याः माता सदा वदति स्म । किन्तु सुजातायाः तत्र आसक्तिः एव न आसीत् ।

'बन्दिपण्डितवशीभूतः न कश्चिद् विद्वान् पुनः भूलोके दृष्टः' इति प्रतीतिः निर्बाधा । एवं च मम पतिः पुनरागमिष्यति इति कथं वा विश्वसिमि' इति तस्याः व्याकुलता । 'निष्करुणतया क्रौर्येण च मे पतिं हतवतः तस्य बन्दिपण्डितपाशस्य उपरि स्फूर्जथुसहितं वज्रं निपततु' इति सा शपति स्म ।

## 13

एकदा सायङ्काले भगवति सहस्रमरीचिमालिनि अरुणवर्णं धारयति सति, महर्षिः उद्दालकः आश्रमस्य मध्ये कस्यचित् वृक्षस्य छायायां क्रीडतः ऋषिकुमारान् अवलोकयति स्म । बालाः उत्प्लुत्योत्प्लुय लङ्घमानाः सहर्षं केकाः कुर्वाणाः क्रीडन्ति स्म । तथा क्रीडितुं स्वशरीरवक्रत्वकारणात् अशक्तः अष्टावक्रः महर्षेः अङ्के उपविष्टः केवलं दर्शनेन आनन्दति स्म ।

अत्रान्तरे क्रीडतः महर्षिपुत्रस्य श्वेतकेतोः भूमौ पतनेन बाधा सञ्जाता । पितुः अङ्के उपविश्य समाधानं प्राप्तुम् इच्छुः श्वेतकेतुः तत्र आगतः । विद्यासु सुनिपुणस्यापि अष्टावक्रस्य बाल्यहेतोः हठप्रवृत्तिः आसीत् । सः श्वेतकेतवे स्थानं न दत्तवान् ।

"त्यज मम पितुः अङ्कम् । अत्र मया उपवेष्टव्यम् । तव अत्र स्थानं नास्ति । त्यज" इति विलपन् श्वेतकेतुः उक्तवान् ।

"तथा न वक्तव्यम् । उभौ युवाम् अत्र उपविशताम्" इति विवादं परिहर्तुम् इच्छुकः महर्षिः उक्तवान् । श्वेतकेतुः कोपनः सञ्जातः ।

"गच्छ रे ! तव मातरं पृष्ट्वा तव पिता कः इति विजानीहि । तस्य अङ्के उपविश । मम स्थानं किम् अपहरसि ? गच्छ" इति उच्चैः आक्रोशं कृतवान् श्वेतकेतुः ।

अष्टावक्रः निष्प्रतिभः अभवत् । 'यत्र मया उपविष्टं तत् स्थानं न मदीयं, न तत्र मम अधिकारः । श्वेतकेतुः यदि दाक्षिण्येन कृपया वा ददाति, तर्हि एव अहं तत्र उपवेष्टुं शक्ष्यामि । अन्यथा मम स्थानं नास्ति' इति तेन आशु अवगतम् ।

वचनं विना उत्थाय, अवाङ्मुखः ततः वक्रगत्या निर्गतः । अवमानितः इव विषण्णः सन् मातुः समीपं गतवान् । दीनवदनं नयनाञ्चलयोः स्थितान् अश्रुबिन्दून् प्रोञ्छन्तं सुतम् अष्टावक्रं दृष्ट्वा सुजातायाः शोकः आश्चर्यं च युगपद् उदभवताम् । अपितृकस्य वक्राङ्गस्य तस्य केन किं कृतं स्यात् इति शोकः । कदापि पुरा एवम् अनागच्छन् अद्य कस्मात् रुदन् आगच्छति इति आश्चर्यम् ।

“वत्स, अष्टावक्र, कस्माद् रोदिषि ? किम् अभवत् ? किं केनचिद् अपहसितोऽसि, आहोस्वित् ताडितः ?”

“अम्ब, न केनापि अपहसितः, न च ताडितः किन्तु श्वेतकेतुः....”

“किं कृतं श्वेतकेतुना ? ”

“अहं महर्षेः अङ्के उपविष्टः क्रीडतः बालान् पश्यामि स्म । श्वेतकेतुः आगत्य मां ततः प्रच्याव्य स्वयं तत्र उपविष्टः । ‘त्वं तव पितुः अङ्के उपविश । मम पितुः अङ्के मम स्थानम् । न तव’ इति मां भर्त्सितवान् । अम्ब, मम पिता कः ? क्वास्ति मम पिता ? कुतः स न दृश्यते कदापि ?” इति अष्टावक्रः सनिर्बन्धं मातरं पृष्टवान् ।

किम् उत्तरं दातव्यम् इति सुजातायाः न अभासत । सा तं प्रश्नं विस्मारयितुम् यत्नं कृतवती । “वत्स, त्वं बालः । विस्मर तस्य वचनम् । गत्वा क्रीडां पश्य । अथवा ग्रन्थान् अधीष्व” इति सा उक्तवती ।

अष्टावक्रस्य कोपः उत्पन्नः । “अम्ब, नाहं स्तनन्धयः । अहं सर्वं ज्ञातुं समर्थः । सर्वेषां बालानां पितरः अत्र सन्ति । मम तु पिता कुतो नास्ति ? पिता जीवति उत न ? ब्रूहि । मया अद्य तत् ज्ञातव्यम् । यदि न ब्रवीषि, तर्हि अहम् अनूढायाः तव अधर्मेण जातः व्रात्यशिशुः इति मया चिन्तनीयं भविष्यति । सत्यं ब्रूहि” इति उच्चैः पृष्टवान् सः मातरम् ।

‘किमर्थं सत्यं गूहनीयम् ? अष्टावक्रः वयसा बालोऽपि ज्ञानेन तरुणः । जानातु सत्यं सः । सर्वं कथयामि’ इति आलोच्य सुजाता कहोडेन जातं स्वविवाहं, दस्युकृतात् तास्कर्यात् प्राप्तं दारिद्र्यं, ततः विमोचनं प्राप्तुं कहोडस्य मिथिलाप्रयाणं, तत्र बन्दिपण्डितेन वादे तस्य पराजयः, परिणामतः बन्दिपण्डितवशीभूतस्य तस्य अगोचरत्वं, बन्दिपण्डितः स्ववशीभूतान् पण्डितान् जले मज्जयित्वा संहरति इति जनश्रुतिं च सा विशदं निरूपितवती ।

ततश्च अश्रुप्रवाहं रोद्धुं यत्नं कुर्वती सा उक्तवती - “वत्स ! त्वं तादृशस्य वेदविदः पुत्रोऽसि । अतः एव सर्वाः विद्याः तव करगताः । वेदविदं गुणधनं शान्तं दान्तं तव पितरं वादे निर्जित्य जले मज्जयित्वा मारितवन्तं बन्दिपण्डितं त्वं पुनः वादे जयेः । क्रूरः सः यथा बहून् श्रोत्रियान् निष्पापान् पण्डितान्

हतवान्, तं तथैव जले निमज्ज्य संहरेः । पुनः सः पिशाचः यथा न उन्मज्जेत्, यथा तस्य निष्करुणा परम्परा नानुवर्तेत, तथा कुर्याः । यदि तथा न करोषि, सः नृशंसः कति वा श्रोत्रियान् वधिष्यति ? तदहं न जाने । तव तादृशी शक्तिः, तादृशं सामर्थ्यं च यदा भविष्यति, तद्दिनम् अहं सदा प्रतिपालयन्ती अस्मि । तव जीवितस्य मुख्यः उद्देशः अयमेव अस्तु । मुख्यं ध्येयम् इदमेव अस्तु । त्वां नवमासान् उदरे वहन्ती, वेदनां सोढ्वा प्रसूतवती । जनानाम् अपहासं, निन्दनां, भर्त्सनां च सहमाना त्वां विद्यावन्तं कृतवती । अपत्येभ्यः किमपि प्रतिफलत्वेन माता न निरीक्षते इति जानामि । तथापि तं नियमं भङ्क्त्वा याचे त्वाम् । पितुः मातुश्च ऋणं त्वया निर्यातनीयम् । तस्य एकः एव मार्गः । सः बन्दिपण्डितः वादे निर्जित्य नद्यां मज्जयितव्यः । कथय पुत्र ! अपि मम एताम् आशां निर्वर्तयिष्यसि ?''

हृदये निगूहितं सकलं दुःखं समस्तं क्रोधं च वाचा प्रवाहयन्त्याः जनन्याः वचनैः अष्टावक्रेण पितुः मरणं, तत्र कारणीभूतः बन्दिपण्डितः, तेन कृतम् अन्याय्यम् इति सर्वं ज्ञातम् । तस्य हृदयम् अग्निकुण्डवत् अज्वलत् । लावारसम् उद्गिरतः शैलादिव तस्य मुखात् उष्णः दीर्घः श्वासः निर्गतः । स्वजीवनस्य लक्ष्यं किमिति तेन तत्क्षणे निश्चितं यत् 'ऋणं निर्यातनीयम् । ऋणविमुक्तिः प्राप्तव्या' इति ।

मातरम् एव अनिमेषया दृष्ट्या पश्यन् सः उक्तवान् - ''अम्ब ! एतावन्ति दिनानि दुःखं त्वया कथं सोढम् ? पूर्वमेव मह्यम् इदं निवेदनीयम् आसीत् । एतावता कालेन अहं तं बन्दिपण्डितं वादे निर्जित्य, नद्यां तं मज्जयित्वा तस्मै तिलाञ्जलिं दत्त्वा आगतवान् स्याम् । किमर्थं मां पूर्वमेव एतत्सर्वं न कथितवती अम्ब ?'' इति ।

''भवान् वयसा अपि बालः । 'भवतः पितरम् एव वादे पराजितवतः बन्दिपण्डिताख्यस्य राक्षसस्य मुखे कथं भवन्तं पातयेयम्' इति भिया नाहं किमपि उक्तवती । वत्स ! पतिहीना अहं तं भक्षितवतः तस्य राक्षसस्य मुखकूपे पुत्रम् अपि कथं प्रेषयेयम् ? प्रपञ्चस्य वञ्चनामयस्य रूपं न दृष्टवान् खलु त्वम् ? अधुना तव वयः ऊनद्वादशवर्षम् । इतोऽपि बहूनि वर्षाणि कृताध्ययनः सर्वशास्त्रार्थवेत्ता वादमर्मज्ञः च भूत्वा सविश्वासं वादयुद्धाय प्रयाहि'' इति साश्रुनयना सुजाता उक्तवती ।

अष्टावक्रः निस्सन्देहेन स्वरेण उक्तवान् - "अम्ब ! भवती किं मम शक्तिं न जानाति ? विषयम् अजानन् अहम् अद्यावधि तूष्णीम् आसम् । पूज्यस्य निर्दोषस्य अनपराधिनः मम पितुः अपमृत्युं यः बन्दिपण्डितः विहितवान्, तस्मिन् जीवति कथम् अहं निद्रां प्राप्नुयाम् ? इदानीं तूष्णीम्भावः न साधुः । मातामहस्य महर्षेः उद्दालकस्य अनुज्ञां लब्ध्वा श्वः एव प्रभाते मिथिलां प्रस्थास्ये । तत्र गत्वा बन्दिपण्डितस्य गर्वं निर्वाप्य, जले मग्नं मृतं तं दृष्ट्वा ततः मम पितरं जलाञ्जलिना तर्पयिष्यामि । माता मां साशीर्वादं मिथिलां प्रेषयतु" इति ।

आत्मविश्वासभरितानि पुत्रस्य वचनानि श्रुतवती सुजाता कृतामृतपानेव नितान्तम् आनन्दितवती । पुत्रः अपि बन्दिपण्डितस्य क्रोधाग्नौ यदि पतिष्यति, तर्हि का गतिः इति तस्याः हृदयम् अकम्पत । सा किञ्चित् आलोच्य उक्तवती - "पुत्र ! मातामहं पृष्ट्वा तस्य आदेशं पालय । तस्य अनुमतिं विना किमपि मा कार्षीः" इति ।

तदानीम् एव अष्टावक्रः मात्रा साकं महर्षेः समीपम् आगतवान् । महर्षिः सन्ध्योपासनाय सिद्धः भवति स्म । सुजातया साकम् आगतम् अष्टावक्रं दृष्ट्वा - "वत्स, अष्टावक्र ! अप्रबुद्धस्य श्वेतकेतोः वचनानि मनसि निधाय व्यथां मा कार्षीः । वयसा बालोऽपि त्वं ज्ञानेन वृद्धः एव । श्वेतकेतुः तु वयसा ज्ञानेन च अद्यापि बालः एव" इति सः उक्तवान् ।

"श्वेतकेतुः बाल्यकारणात् यद् उक्तवान् तेन मम लाभः एव जातः । मातामह, मम पितुः सत्यकथा मया अद्य ज्ञाता । पितुः यद् अन्याय्यं जातं तस्य योग्यं प्रतीकारं विधातुं प्रेरणा मया लब्धा । आशीर्वादपूर्वकं भवान् मां मिथिलां प्रेषयतु । श्वः एव अहं गमिष्यामि" इति अष्टावक्रः उक्तवान् ।

"वत्स, अष्टावक्र ! तव ज्ञाने, सामर्थ्ये, प्रतिभायां च मम द्रढिष्ठः विश्वासः वर्तते । अस्मिन् लोके कमपि पण्डितं जेतुं त्वं शक्नोषि । अपि च भवतः जातके अधुना गुरुः उच्चस्थाने विराजते । अतः तव सर्वत्र विद्याक्षेत्रे जयः एव भविष्यति । अत्र संशयलेशोऽपि नास्ति । मिथिलां गत्वा बन्दिपण्डितं वादे निर्जित्य यशस्वी भव । मम आशिषः सदा सन्ति तव शिरसि । गच्छ, विजयीभव" इति महर्षिः निश्शङ्कम् उक्तवान् ।

सुजाता पृष्टवती - "पितः ! अष्टावक्रस्य शरीरं वक्रम् । चलितुं न शक्नोति सम्यक् । असहायः अयं कथं मिथिलां गमिष्यति ?"

“वत्से ! मया तत् चिन्तितमेव । श्वेतकेतुः अनेन साकं गमिष्यति । एतौ बलीवर्दशकटेन प्रयाणं कुरुताम् । शिष्यान् उक्त्वा प्रयाणस्य व्यवस्थां कारयामि । भवती अपि एतयोः मार्गाय पाथेयं सज्जीकुरु” इति महर्षिः उक्तवान् ।

रात्रौ सुजाता पृथुकान् सक्तुं गुडं च सिद्धीकृतवती । महर्षेः शिष्याः कन्दानि मूलानि च संगृहीतवन्तः । सुप्तस्यापि अष्टावक्रस्य निद्रा नयनाभिमुखी न अभवत् । समस्तम् अपि ज्ञानं करतलामलकवत् यथा प्रत्यक्षं स्यात् तथा तस्य मनः विश्वम् आलोडयति स्म ।

## 14

परेद्यवि अष्टावक्रः श्वेतकेतुना सह मिथिलां शकटेन प्रस्थितः । शाकटिकः शकटदासनामा दृढगात्रः । सः समीपस्थस्य ग्रामस्य निवासी । ग्रामस्वामी महर्षिगौरवेण शकटं बलीवर्दौ शाकटिकं च प्रेषितवान् । शकटे पाथेयम् इति फलानि कन्दानि मूलानि च रक्षितानि । सुजातया दत्ताः सगुडाः पृथुकाः सक्तवश्च तत्र आसन् । मार्गमध्ये नदीतटे ग्रामे वा शकटप्रयाणं विरमति स्म । तत्र शारीराणि कर्माणि निर्वर्त्य, आहारसेवनं च कृत्वा ते प्रयान्ति स्म । शाकटिकः प्राकृतीं भाषां भाषते स्म । सा अष्टावक्रश्वेतकेतुभ्यां ज्ञायते स्म । एताभ्यां भाष्यमाणां संस्कृतभाषां सोऽपि जानाति स्म । विविधाः कथाः कथयतां, मार्गे विविधान् जनान् वृक्षान् शैलान् देशांश्च पश्यतां तेषां कालः गच्छति स्म । प्रयाणस्य आयासः न ज्ञायते स्म । ‘वन्याः हिंस्राः पशवः बाधां कुर्युः’ इति भीतिः तु सदा आसीत् ।

ग्रामेषु अष्टावक्रः जनानां हासस्य कारणम् आसीत् । विचित्रं प्राणिनम् इव बालाः युवानः वृद्धाः स्त्रियश्च तं वीक्षन्ते स्म । किन्तु सदा विद्यायाः परिकलने आसक्तमनाः अष्टावक्रः तेषां चेष्टां नैव अवधारयति स्म । श्वेतकेतुः तान् जनान् निवारयितुं सदा प्रयत्नं करोति स्म ।

‘अष्टावक्रः कहोडस्य पुत्रः, महर्षेः उद्दालकस्य दौहित्रः’ इति केचन पण्डिताः कर्णाकर्णिकया श्रुतवन्तः । ‘सः बालोऽपि सन् नानाशास्त्रेषु अप्रतिमः विद्वान्, पूर्वजन्मनः संस्कारेण विद्याः वशीकृतवान्, मेधावी, ज्ञानवान्’ इति केचन जानन्ति स्म । तादृशाः ग्रामस्य द्वारे एव अष्टावक्रं श्वेतकेतुं च स्वागतीकृत्य अतिथित्वेन गृहं नीत्वा सत्कारं कुर्वन्ति स्म । स्नान-भोजन-शयनादीनां व्यवस्थां ते ससन्तोषं कल्पयन्ति स्म । बहोः कालात् केषाञ्चित् मनस्सु स्थिताः संशयाः अष्टावक्रेण क्षणमात्रेण परिह्रियन्ते स्म । अष्टावक्रः केन उद्देशेन मिथिलां प्रस्थितः इति ज्ञात्वा तमपि बहवः प्रशंसितवन्तः ।

कस्मिंश्चन ग्रामे कश्चन पुरोहितः अष्टावक्रेण सह संवादं कुर्वाणः उक्तवान् - ''जनकमहाराजः इदानीं यजते । प्रातः यज्ञकार्याणि भवन्ति । यज्ञशालायाम् एव सायं देवतानां, यज्ञानाम्, आत्मनः, ऋतस्य, सत्यस्य च विषये चर्चाः प्रवर्तन्ते । तत्र सर्वेषां विदुषां प्रवेशस्य अवकाशः भवति । यज्ञभूमिः मिथिलायाः समीपे एव अस्ति इति मया श्रुतम्'' इति ।

एतद् श्रुत्वा अष्टावक्रः 'महाराजस्य जनकस्य दर्शनं, बन्दिपण्डितेन वादं कर्तुम् अवसरश्च सुखेन लभ्यते' इति विचिन्त्य सन्तुष्टः अभवत् ।

कतिपयदिनानि यावत् प्रयाणं कृत्वा ते विदेहदेशस्य सीमां तीर्त्वा तं देशं प्रविष्टवन्तः । तत्र धनधान्यसमृद्धेः ताण्डवं प्रत्यक्षम् आसीत् । आहारस्य वसनस्य वसतेः वा तत्र दौर्लभ्यं कस्यापि नासीत् । जनाः धार्मिकाः । अतिथीन् देववत् पर्युपासते स्म । सर्वे कृतालङ्काराः, धृताभरणाः, गतचिन्ताः दृश्यन्ते स्म । ग्रामेषु इष्टिकारचितानि गृहाणि । पशवः हृष्टाः पुष्टाङ्गाश्च गोचरीभवन्ति स्म । आपणेषु बहुमूल्यानि वस्त्राणि विभूषणानि च विराजन्ते स्म । विपणयः क्रय्यराशिभरिताः आसन् । जनकमहाराजस्य शासने सर्वेऽपि ईतिदूराः भीतिमुक्ताः सुखेन जीवन्ति स्म ।

मिथिलानगर्याः अनतिदूरे स्थिता यज्ञशाला कुत्र अस्ति इति जनेभ्यः विदित्वा तया दिशा अष्टावक्रस्य शकटं प्रस्थितम् । 'इयं यज्ञशाला' इति दूरादेव होमगन्धः सूचयति स्म । होमधूमः जनान् आह्वयन् इव गगने प्रसरति स्म । समीपे आगताभ्याम् अष्टावक्रश्वेतकेतुभ्यां सुमधुरः वेदघोषः कर्णपथातिथीकृतः । यज्ञशालायाः अनतिदूरे वटवृक्षस्य च्छायायां शकटं स्थापयित्वा, बलीवर्दौ मुक्तारश्मी कृत्वा, तृणवति प्रदेशे चरितुं त्यक्त्वा, 'विश्रम्यताम्' इति शाकटिकम् उक्त्वा अष्टावक्रः श्वेतकेतुः च यागशालां प्रति प्रस्थितौ । पाणिपादं प्रक्षाल्य आचमनं च कृत्वा तौ यज्ञशालां गतवन्तौ ।

द्वारपालकः एतौ दृष्ट्वा ब्राह्मणौ इति अभिज्ञाय संस्कृतम् आश्रित्य -''बालकौ कौ युवाम् ? केन प्रयोजनेन अत्र आगतौ ?'' इति पृष्टवान् ।

''आवां महर्षेः उद्दालकस्य आश्रमाद् आगतौ । सायङ्काले अत्र प्रवर्तिष्यमाणायां विद्वत्सभायां शास्त्रार्थं प्रस्तोतुम् आगतौ'' इति उक्तवान् अष्टावक्रः ।

द्वारपालकः हसितवान् । "अहो बत ! शास्त्रार्थं प्रस्तोतुम् आगतौ किल ! 'वाद'शब्दस्य अर्थं किं युवां जानीथः ? दण्डक्रीडा इति भावयथः किम् ? बालकौ, नगरं गत्वा तत्रत्यैः बालकैः सह क्रीडतम् । शास्त्रवादे बालानां किं कार्यम् अस्ति ?" इति च उक्तवान् ।

अष्टावक्रः सविस्रम्भम् उक्तवान् - "द्वारपालक, शास्त्रवादप्रस्तावाय अपेक्ष्यते बुद्धिशक्तिः । तत्र वयसः का प्रसक्तिः ? बुद्धिमतां वयो न गण्यते । देहि आवाभ्याम् प्रवेशावकाशम्" इति ।

"हहा, तव आकारसदृशी किल तव वाक् । तूष्णीम् इतो याहि । त्वादृशाः यज्ञशालां प्रविष्टाः चेष्टाभिः ऋत्विजाम् आचार्याणां च पीडां कल्पयन्ति । प्रथमम् इतः अपसर" इति द्वारपालकः उच्चैः उक्तवान् ।

तद्वचनं श्रुतवान् कश्चन आचार्यः तत्र आगत्य - "किं जातम् ? किमर्थम् उच्चैः क्रन्दसि ? को वृत्तान्तः ?" इति द्वारपालकं पृष्टवान् ।

"एतौ बालौ विद्वद्भिः शास्त्रार्थं चर्चितुम् आगतौ किल । तौ प्रवेशं प्रार्थयेते । मया प्रवेशः निराकृतः" इति द्वारपालकः उक्तवान् ।

"त्वया असाधु कृतम् । शिरः पलितम् इति वा, मुखं वलिभिः आक्रान्तम् इति वा कमपि वृद्धं न गणयति महाराजः । यः बालोऽपि कृताध्ययनः, यः शास्त्रार्थविचक्षणः, तम् एव वृद्धं गणयति । एषः अस्य देशस्य साम्प्रदायः । अतः एतौ तेजस्विनौ बालौ अन्तः प्रवेशय" इति आचार्यः उक्तवान् ।

"यथाज्ञापयति भवान्" इति द्वारपालकः तयोः प्रवेशावकाशं कल्पितवान् ।

द्वौ अपि अन्तः प्रविश्य यज्ञशालां दृष्टवन्तौ । आचार्यः ताभ्याम् अर्घ्यं, पाद्यं, मार्गायासपरिहाराय फलाहारादिकं च दापितवान् ।

सायङ्काले सभा मिलिता । ऋत्विजः, अध्वर्यवः, उद्गातारः, ऋषयः, शास्त्रविद्वांसः इति सर्वे तत्र उपस्थिताः । मध्ये जनकमहाराजः साक्षाद् धर्मः इव विराजमानः अदृश्यत । यज्ञदीक्षितः सः सरलवसनः दर्भासने उपविष्टः अपि सात्त्विकेन तेजसा भ्राजते स्म । स्निग्धगाम्भीरेण कण्ठेन सः - "अद्य कस्मिन् विषये विद्वांसः वादं प्रस्तोतुम् इच्छन्ति ?" इति अपृच्छत् ।

तदा अष्टावक्रः उच्चैः - "महाप्रभो, अद्य अयं जनः वादं प्रस्तोतुम् इच्छति । अवकाशम् अनुज्ञां च दत्त्वा अनुगृह्णातु महाराजः" इति प्रार्थितवान् ।

बन्दिपण्डितः अष्टावक्रं दृष्ट्वा अवज्ञया - "बालकानां जल्पनं सभायां न शोभते । वर्षीयांसः वरीयांसश्च विद्वांसः बहवः अत्र सन्ति । तेषां वचनं बालैः श्रोतव्यम् । तैः स्वयं भाषितुम् अवकाशः न याचनीयः" इति उक्तवान् ।

"ज्ञानम् अपरीक्ष्य न कश्चिद् बालः इति वा, वृद्धः इति वा निर्णयः कर्तव्यः" इति अष्टावक्रः दृढेन स्वरेण उत्तरितवान् ।

एतत् श्रुत्वा बन्दिपण्डितः कोपनः अभवत् । सः अष्टावक्रं कटाक्षेण वीक्ष्य "न केवलं तव शरीरं वक्रम् । बुद्धिः अपि तथा । वृद्धेभ्यः ज्ञानं प्राप्तव्यं बालैः इति एतावदपि न जानासि किम् ?" इति सगर्वम् भर्त्सितवान् ।

"ज्ञानवन्तः, उदारया धिया ज्ञानं वितरीतुं सिद्धाः, अकपटाः, स्वच्छहृदयाः वृद्धाः इति अभ्युपगम्यते चेत् मम अत्र विमतिः नास्ति" इति उक्तवान् अष्टावक्रः ।

सस्मितमुखः महाराजः उक्तवान् - "भवतु, भवतु । अस्माकम् आस्थाने ज्ञानम् एव अग्रताम्बूलं लभते । वयः किमपि भवतु, जातिः कापि अस्तु, पुमान् वा स्त्री वा, ज्ञानम् एव सर्वेषु पूज्यते । भवते वादं प्रस्तोतुं वयम् अवकाशं यच्छामः । प्रथमं वयं 'को भवान्, भवतः विद्यागुरुः कः, कस्मिन् शास्त्रे भवतः प्रावीण्यम्' इति ज्ञातुम् इच्छामः । आवेदयतु भवान्" इति ।

"महाप्रभो, स्थानोचितं भवद्वचनम् । ययातेः अनन्तरं वेदमार्गानुसारी आत्मज्ञानी याजकः भवान् एव । भवतः दर्शनेन पवित्रीकृतात्मा अस्मि । सर्वं स्ववृत्तान्तं निवेदयामि । अष्टावक्रः इति मम नाम । कहोडः इति प्रसिद्धस्य खगोदरशर्मणः पुत्रः, महर्षेः उद्दालकस्य दौहित्रः शिष्यश्च अहम् । अधीतसकलवेदोऽस्मि । गुरुकृपया शास्त्रार्थाः लौकिकाः अर्थाश्च अधिगताः । न मे विद्यागर्वः । किन्तु केनचन उद्देशेन भवतः सन्निधिम् आगतः अस्मि । मदीयः अभिलाषः महाराजेन पूरयिष्यते इति विश्वासः माम् अत्र आनीतवान्" इति अष्टावक्रः विज्ञापितवान् ।

"वटो, कः तव उद्देशः ?" राजा जनकः पृष्टवान् ।

“भवदास्थानस्य बन्दिपण्डितः वेदज्ञान् विदुषः वादे पराजित्य, तान् जले निमज्जयति इति श्रूयते । मम पिता कहोडोऽपि भवदास्थानम् आगत्य स्वविद्यां प्रदर्शयितुम् इष्टवान् । तथा आगतं मम पितरम् अपि अयं बन्दिपण्डितः अदृश्यं कृतवान् इति मया ज्ञातम् । बन्दिपण्डितेन शास्त्रार्थचर्चां कृत्वा तं पराजित्य एतां दुष्टां परम्परां विरमयितुम् इच्छामि । अयम् एव मम उद्देशः । अतः बन्दिपण्डितेन सह चर्चां कर्तुं मह्यम् अवसरः देयः” इति स्पष्टया वाचा अष्टावक्रः उक्तवान् ।

तस्य वाचं श्रुत्वा सभा नीरवा अभवत् । स्वयं सर्पस्य मुखे प्रवेष्टुं प्रयतमानं मण्डूकमिव अष्टावक्रं जनाः करुणया वीक्षितुम् आरभन्त । तेषां मनसि कहोडस्य वादप्रकरणमेव अवर्तत । ‘कहोडवत् तस्य सुतः अपि बन्दिपण्डितस्य वश्यः भूत्वा कौमारे एव मृत्युम् आलिङ्गिष्यति’ इति तेषां करुणा उद्भूता ।

करुणपूर्णेन स्वरेण जनकमहाराजः उक्तवान् - “बालक, त्वया कथितस्य वचनस्य परिणामः त्वया प्रायः न चिन्तितः इति अहं भावयामि । प्रतिवादिनः शक्तिम् अज्ञात्वा वादरङ्गे प्रवेशः न क्षेमकरः । तादृशं साहसं न युक्तम् । बन्दिपण्डितस्य विद्वत्तां ज्ञातवन्तः केऽपि तेन सह वादाहवं न कुर्वन्ति । त्वम् आवेशवशंवदः विपत्तौ मा पातीः । अन्यच्च बन्दिपण्डितेन वादे कठोराः नियमाः पाल्यन्ते । अतः पुनरेकदा सुष्ठु चिन्तयित्वा निर्णयं कुरु” इति ।

अष्टावक्रः तिलमात्रम् अपि अधैर्यं न प्राकटयत् । तस्य निर्धारः कुलशैलवद् अचलः आसीत् । सः उक्तवान् - “महाराज, बन्दिपण्डितः अद्यावधि मादृशं निपुणं न सम्मुखीकृतवान् । साधारणान् पण्डितान् वादे विजित्य तावन्मात्रेण अखर्वं गर्वं वहति सः । सिंहवद् गर्जति च । मह्यं दीयताम् अवसरः । नक्षत्रलक्षं यत् तमः निरसितुं न शक्नोति तत् एकः एव सूर्यः यथा निरस्यति, तथा अहम् एकः एव बन्दिपण्डितं निर्जित्य तस्य गर्वाग्निं निर्वापयामि । अन्येषाम् असाध्यं कार्यम् अहं कृत्वा दर्शयिष्यामि । भग्नाक्षं रथमिव भूमौ पतितं बन्दिनं द्रक्ष्यति महाराजः । मम पितुः मरणेन दुःखितायै मम जनन्यै वचनं दत्त्वा आगतः अस्मि । तस्याः अश्रूणि प्रोञ्छितुम् अवसरम् एकं ददातु महाराजः इति सविनयं प्रार्थये” इति ।

“पूर्वापरं विचिन्त्य, मातुः अनुज्ञां गुरोः आशीर्वादं च लब्ध्वा त्वम् आगतः चेत् वादार्थम् अवसरं कल्पयितुं न मे कापि विचिकित्सा” इति महाराजः उक्तवान् ।

बन्दिपण्डितस्तु अवज्ञया अष्टावक्रं वीक्षमाणः - “प्रभो, आदौ सर्वेऽपि गर्वेण इत्थं भाषन्ते । ततो वादाहवे पराभवं प्राप्स्यन्ति । नियमानुसारं दण्डं विहितवन्तं मां क्रूरः इति जनाः निन्दन्ति । तत्रापि

अयं द्वादशवर्षदेशीयः बालकः । अनेन साकं मया वादः कर्तव्यः इति तु हास्यास्पदम् । अस्य औचित्यं महाराजः विचारयतु । सभायाः कालः व्यर्थः मा भूत् । विवादः समयोरेव शोभते किल ? अस्मिन् बालके मम कारुण्यम् एव अस्ति" इति उक्तवान् ।

"भवता उच्यमानम् अपि समीचीनम् । किन्तु वादभिक्षायै आगतानां रिक्तहस्तेन निवर्तनम् अस्माकम् आस्थानस्य शोभां ह्रासयति । अयं वटुः वादं प्रस्तोतुम् अर्हः न वा इति अहं परीक्षां करोमि । तत्र यदि अयं सफलः भविष्यति, तर्हि भवता सह वादस्य सन्दर्भः" इति महाराजः उक्तवान् ।

"तथास्तु" इति सभासदः ऐककण्ठ्येन अङ्गीकारं सूचितवन्तः ।

राजा अष्टावक्रम् उद्दिश्य प्रश्नान् पृष्टवान् -

"षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः ।
यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः ॥

अस्य अर्थं ब्रूहि, यदि त्वं पण्डितोऽसि" इति ।

अष्टावक्रः सस्मितः कथितवान् - "राजन्, वर्षचक्रस्य वर्णनम् इदम् । तस्य षड् ऋतवः एव नाभ्यः उच्यन्ते । द्वादश मासाः एव तस्य अक्षत्वेन गण्यन्ते । चतुर्विंशतिः पक्षाः एव तस्य पर्गणि कथ्यन्ते । षष्ट्युत्तर त्रिशतसंख्याकानि दिनानि च तस्य अराणि । वर्षस्य गणनम् इत्थं यः जानाति सः एव कविः इति अत्र तस्य ज्ञानिनः प्रशंसा कृता" इति ।

सर्वेऽपि सभासदः सन्तुष्टाः करतालिकाभिः अष्टावक्रस्य उत्तरस्य अनुमोदनं कृतवन्तः । राजापि सन्तुष्टः । तस्य बुद्धिकौशलं पुनः परीक्षितुम् इच्छुकः सन् सः अपृच्छत् - "किं स्वित् सुप्तं न निमिषति (ः नेत्रनिमीलनं न करोति) ?" इति ।

अष्टावक्रः झटिति उक्तवान् - "मत्स्यः सुप्तः न निमिषति" इति ।

जनाः तस्य कौशलेन हृष्टाः अधिकाभिः करतालिभिः तम् अभिनन्दितवन्तः ।

जनकः पृष्टवान् - "किं स्वित् जातं न चोपति (स्पन्दते) ?" इति ।

विना शङ्काम् अष्टावक्रः उत्तरम् अवदत् - "अण्डं जातं न चोपति" इति ।

सभासदः स्वासनेषु उत्थाय - "साधु साधु" इति उच्चैः घोषयित्वा अष्टावक्रं प्रशंसितवन्तः । राजा तृप्तः हृष्टश्च अष्टावक्रम् उक्तवान् - "अयि भो मुनिपुत्र, भवान् बृहस्पतिः इव बुद्धिशाली । बन्दिपण्डितेन साकं वादं कर्तुं भवान् अर्हः इति मम निर्णयः । श्वः वादयुद्धं प्रचलतु । अद्य भवान् भवतः मित्रं च अस्माकम् अतिथी भवताम् । सत्कारं स्वीकुरुताम् । अद्यतनी सभा समाप्ता" इति ।

राज्ञि उत्थाय स्वकार्यनिर्वहणाय गते, सर्वे सभासदः साभिमानम् अष्टावक्रं पश्यन्तः, 'तस्य विजयो भूयात्' इति मनसा आशासानाः स्वस्वस्थानानि गताः । अष्टावक्रः श्वेतकेतुना सह राज्ञः अतिथिः भूत्वा सत्कारं स्वीकृतवान् । परेद्यवि प्रवर्तिष्यमाणाय वादयुद्धाय सिद्धः अभवत् च ।

## 14

परेद्यवि अष्टावक्रः श्वेतकेतुना सह मिथिलां शकटेन प्रस्थितः । शाकटिकः शकटदासनामा दृढगात्रः । सः समीपस्थस्य ग्रामस्य निवासी । ग्रामस्वामी महर्षिगौरवेण शकटं बलीवर्दौ शाकटिकं च प्रेषितवान् । शकटे पाथेयम् इति फलानि कन्दानि मूलानि च रक्षितानि । सुजातया दत्ताः सगुडाः पृथुकाः सक्तवश्च तत्र आसन् । मार्गमध्ये नदीतटे ग्रामे वा शकटप्रयाणं विरमति स्म । तत्र शारीराणि कर्माणि निर्वर्त्य, आहारसेवनं च कृत्वा ते प्रयान्ति स्म । शाकटिकः प्राकृतीं भाषां भाषते स्म । सा अष्टावक्रश्वेतकेतुभ्यां ज्ञायते स्म । एताभ्यां भाष्यमाणां संस्कृतभाषां सोऽपि जानाति स्म । विविधाः कथाः कथयतां, मार्गे विविधान् जनान् वृक्षान् शैलान् देशांश्च पश्यतां तेषां कालः गच्छति स्म । प्रयाणस्य आयासः न ज्ञायते स्म । 'वन्याः हिंस्राः पशवः बाधां कुर्युः' इति भीतिः तु सदा आसीत् ।

ग्रामेषु अष्टावक्रः जनानां हासस्य कारणम् आसीत् । विचित्रं प्राणिनम् इव बालाः युवानः वृद्धाः स्त्रियश्च तं वीक्षन्ते स्म । किन्तु सदा विद्यायाः परिकलने आसक्तमनाः अष्टावक्रः तेषां चेष्टां नैव अवधारयति स्म । श्वेतकेतुः तान् जनान् निवारयितुं सदा प्रयत्नं करोति स्म ।

'अष्टावक्रः कहोडस्य पुत्रः, महर्षेः उद्दालकस्य दौहित्रः' इति केचन पण्डिताः कर्णाकर्णिकया श्रुतवन्तः । 'सः बालोऽपि सन् नानाशास्त्रेषु अप्रतिमः विद्वान्, पूर्वजन्मनः संस्कारेण विद्याः वशीकृतवान्, मेधावी, ज्ञानवान्' इति केचन जानन्ति स्म । तादृशाः ग्रामस्य द्वारे एव अष्टावक्रं श्वेतकेतुं च स्वागतीकृत्य अतिथित्वेन गृहं नीत्वा सत्कारं कुर्वन्ति स्म । स्नान-भोजन-शयनादीनां व्यवस्थां ते ससन्तोषं कल्पयन्ति स्म । बहोः कालात् केषाञ्चित् मनस्सु स्थिताः संशयाः अष्टावक्रेण क्षणमात्रेण परिह्रियन्ते स्म । अष्टावक्रः केन उद्देशेन मिथिलां प्रस्थितः इति ज्ञात्वा तमपि बहवः प्रशंसितवन्तः ।

कस्मिंश्चन ग्रामे कश्चन पुरोहितः अष्टावक्रेण सह संवादं कुर्वाणः उक्तवान् - ''जनकमहाराजः इदानीं यजते । प्रातः यज्ञकार्याणि भवन्ति । यज्ञशालायाम् एव सायं देवतानां, यज्ञानाम्, आत्मनः, ऋतस्य, सत्यस्य च विषये चर्चाः प्रवर्तन्ते । तत्र सर्वेषां विदुषां प्रवेशस्य अवकाशः भवति । यज्ञभूमिः मिथिलायाः समीपे एव अस्ति इति मया श्रुतम्'' इति ।

एतद् श्रुत्वा अष्टावक्रः 'महाराजस्य जनकस्य दर्शनं, बन्दिपण्डितेन वादं कर्तुम् अवसरश्च सुखेन लभ्यते' इति विचिन्त्य सन्तुष्टः अभवत् ।

कतिपयदिनानि यावत् प्रयाणं कृत्वा ते विदेहदेशस्य सीमां तीर्त्वा तं देशं प्रविष्टवन्तः । तत्र धनधान्यसमृद्धेः ताण्डवं प्रत्यक्षम् आसीत् । आहारस्य वसनस्य वसतेः वा तत्र दौर्लभ्यं कस्यापि नासीत् । जनाः धार्मिकाः । अतिथीन् देववत् पर्युपासते स्म । सर्वे कृतालङ्काराः, धृताभरणाः, गतचिन्ताः दृश्यन्ते स्म । ग्रामेषु इष्टिकारचितानि गृहाणि । पशवः हृष्टाः पुष्टाङ्गाश्च गोचरीभवन्ति स्म । आपणेषु बहुमूल्यानि वस्त्राणि विभूषणानि च विराजन्ते स्म । विपणयः क्रय्यराशिभरिताः आसन् । जनकमहाराजस्य शासने सर्वेऽपि ईतिदूराः भीतिमुक्ताः सुखेन जीवन्ति स्म ।

मिथिलानगर्याः अनतिदूरे स्थिता यज्ञशाला कुत्र अस्ति इति जनेभ्यः विदित्वा तया दिशा अष्टावक्रस्य शकटं प्रस्थितम् । 'इयं यज्ञशाला' इति दूरादेव होमगन्धः सूचयति स्म । होमधूमः जनान् आह्वयन् इव गगने प्रसरति स्म । समीपे आगताभ्याम् अष्टावक्रश्वेतकेतुभ्यां सुमधुरः वेदघोषः कर्णपथातिथीकृतः । यज्ञशालायाः अनतिदूरे वटवृक्षस्य च्छायायां शकटं स्थापयित्वा, बलीवर्दौ मुक्तारश्मी कृत्वा, तृणवति प्रदेशे चरितुं त्यक्त्वा, 'विश्रम्यताम्' इति शाकटिकम् उक्त्वा अष्टावक्रः श्वेतकेतुः च यागशालां प्रति प्रस्थितौ । पाणिपादं प्रक्षाल्य आचमनं च कृत्वा तौ यज्ञशालां गतवन्तौ ।

द्वारपालकः एतौ दृष्ट्वा ब्राह्मणौ इति अभिज्ञाय संस्कृतम् आश्रित्य -''बालकौ कौ युवाम् ? केन प्रयोजनेन अत्र आगतौ ?'' इति पृष्टवान् ।

''आवां महर्षेः उद्दालकस्य आश्रमाद् आगतौ । सायङ्काले अत्र प्रवर्तिष्यमाणायां विद्वत्सभायां शास्त्रार्थं प्रस्तोतुम् आगतौ'' इति उक्तवान् अष्टावक्रः ।

द्वारपालकः हसितवान् । “अहो बत ! शास्त्रार्थं प्रस्तोतुम् आगतौ किल ! ‘वाद’शब्दस्य अर्थं किं युवां जानीथः ? दण्डक्रीडा इति भावयथः किम् ? बालकौ, नगरं गत्वा तत्रत्यैः बालकैः सह क्रीडतम् । शास्त्रवादे बालानां किं कार्यम् अस्ति ?” इति च उक्तवान् ।

अष्टावक्रः सविस्रम्भम् उक्तवान् - “द्वारपालक, शास्त्रवादप्रस्तावाय अपेक्ष्यते बुद्धिशक्तिः । तत्र वयसः का प्रसक्तिः ? बुद्धिमतां वयो न गण्यते । देहि आवाभ्याम् प्रवेशावकाशम्” इति ।

“हहा, तव आकारसदृशी किल तव वाक् । तूष्णीम् इतो याहि । त्वादृशाः यज्ञशालां प्रविष्टाः चेष्टाभिः ऋत्विजाम् आचार्याणां च पीडां कल्पयन्ति । प्रथमम् इतः अपसर” इति द्वारपालकः उच्चैः उक्तवान् ।

तद्वचनं श्रुतवान् कश्चन आचार्यः तत्र आगत्य - “किं जातम् ? किमर्थम् उच्चैः क्रन्दसि ? को वृत्तान्तः ?” इति द्वारपालकं पृष्टवान् ।

“एतौ बालौ विद्वद्भिः शास्त्रार्थं चर्चितुम् आगतौ किल । तौ प्रवेशं प्रार्थयेते । मया प्रवेशः निराकृतः” इति द्वारपालकः उक्तवान् ।

“त्वया असाधु कृतम् । शिरः पलितम् इति वा, मुखं वलिभिः आक्रान्तम् इति वा कमपि वृद्धं न गणयति महाराजः । यः बालोऽपि कृताध्ययनः, यः शास्त्रार्थविचक्षणः, तम् एव वृद्धं गणयति । एषः अस्य देशस्य साम्प्रदायः । अतः एतौ तेजस्विनौ बालौ अन्तः प्रवेशय” इति आचार्यः उक्तवान् ।

“यथाज्ञापयति भवान्” इति द्वारपालकः तयोः प्रवेशावकाशं कल्पितवान् ।

द्वौ अपि अन्तः प्रविश्य यज्ञशालां दृष्टवन्तौ । आचार्यः ताभ्याम् अर्घ्यं, पाद्यं, मार्गायासपरिहाराय फलाहारादिकं च दापितवान् ।

सायङ्काले सभा मिलिता । ऋत्विजः, अध्वर्यवः, उद्गातारः, ऋषयः, शास्त्रविद्वांसः इति सर्वे तत्र उपस्थिताः । मध्ये जनकमहाराजः साक्षाद् धर्मः इव विराजमानः अदृश्यत । यज्ञदीक्षितः सः सरलवसनः दर्भासने उपविष्टः अपि सात्त्विकेन तेजसा भ्राजते स्म । स्निग्धगाम्भीरेण कण्ठेन सः - “अद्य कस्मिन् विषये विद्वांसः वादं प्रस्तोतुम् इच्छन्ति ?” इति अपृच्छत् ।

तदा अष्टावक्रः उच्चैः – "महाप्रभो, अद्य अयं जनः वादं प्रस्तोतुम् इच्छति । अवकाशम् अनुज्ञां च दत्त्वा अनुगृह्णातु महाराजः" इति प्रार्थितवान् ।

बन्दिपण्डितः अष्टावक्रं दृष्ट्वा अवज्ञया – "बालकानां जल्पनं सभायां न शोभते । वर्षीयांसः वरीयांसश्च विद्वांसः बहवः अत्र सन्ति । तेषां वचनं बालैः श्रोतव्यम् । तैः स्वयं भाषितुम् अवकाशः न याचनीयः" इति उक्तवान् ।

"ज्ञानम् अपरीक्ष्य न कश्चिद् बालः इति वा, वृद्धः इति वा निर्णयः कर्तव्यः" इति अष्टावक्रः दृढेन स्वरेण उत्तरितवान् ।

एतत् श्रुत्वा बन्दिपण्डितः कोपनः अभवत् । सः अष्टावक्रं कटाक्षेण वीक्ष्य "न केवलं तव शरीरं वक्रम् । बुद्धिः अपि तथा । वृद्धेभ्यः ज्ञानं प्राप्तव्यं बालैः इति एतावदपि न जानासि किम् ?" इति सगर्वम् भर्त्सितवान् ।

"ज्ञानवन्तः, उदारया धिया ज्ञानं वितरीतुं सिद्धाः, अकपटाः, स्वच्छहृदयाः वृद्धाः इति अभ्युपगम्यते चेत् मम अत्र विमतिः नास्ति" इति उक्तवान् अष्टावक्रः ।

सस्मितमुखः महाराजः उक्तवान् – "भवतु, भवतु । अस्माकम् आस्थाने ज्ञानम् एव अग्रताम्बूलं लभते । वयः किमपि भवतु, जातिः कापि अस्तु, पुमान् वा स्त्री वा, ज्ञानम् एव सर्वेषु पूज्यते । भवते वादं प्रस्तोतुं वयम् अवकाशं यच्छामः । प्रथमं वयं 'को भवान्, भवतः विद्यागुरुः कः, कस्मिन् शास्त्रे भवतः प्रावीण्यम्' इति ज्ञातुम् इच्छामः । आवेदयतु भवान्" इति ।

"महाप्रभो, स्थानोचितं भवद्वचनम् । ययातेः अनन्तरं वेदमार्गानुसारी आत्मज्ञानी याजकः भवान् एव । भवतः दर्शनेन पवित्रीकृतात्मा अस्मि । सर्वं स्ववृत्तान्तं निवेदयामि । अष्टावक्रः इति मम नाम । कहोडः इति प्रसिद्धस्य खगोदरशर्मणः पुत्रः, महर्षेः उद्दालकस्य दौहित्रः शिष्यश्च अहम् । अधीतसकलवेदोऽस्मि । गुरुकृपया शास्त्रार्थाः लौकिकाः अर्थाश्च अधिगताः । न मे विद्यागर्वः । किन्तु केनचन उद्देशेन भवतः सन्निधिम् आगतः अस्मि । मदीयः अभिलाषः महाराजेन पूरयिष्यते इति विश्वासः माम् अत्र आनीतवान्" इति अष्टावक्रः विज्ञापितवान् ।

"वटो, कः तव उद्देशः ?" राजा जनकः पृष्टवान् ।

“भवदास्थानस्य बन्दिपण्डितः वेदज्ञान् विदुषः वादे पराजित्य, तान् जले निमज्जयति इति श्रूयते । मम पिता कहोडोऽपि भवदास्थानम् आगत्य स्वविद्यां प्रदर्शयितुम् इष्टवान् । तथा आगतं मम पितरम् अपि अयं बन्दिपण्डितः अदृश्यं कृतवान् इति मया ज्ञातम् । बन्दिपण्डितेन शास्त्रार्थचर्चां कृत्वा तं पराजित्य एतां दुष्टां परम्परां विरमयितुम् इच्छामि । अयम् एव मम उद्देशः । अतः बन्दिपण्डितेन सह चर्चां कर्तुं मह्यम् अवसरः देयः” इति स्पष्टया वाचा अष्टावक्रः उक्तवान् ।

तस्य वाचं श्रुत्वा सभा नीरवा अभवत् । स्वयं सर्पस्य मुखे प्रवेष्टुं प्रयतमानं मण्डूकमिव अष्टावक्रं जनाः करुणया वीक्षितुम् आरभन्त । तेषां मनसि कहोडस्य वादप्रकरणमेव अवर्तत । ‘कहोडवत् तस्य सुतः अपि बन्दिपण्डितस्य वश्यः भूत्वा कौमारे एव मृत्युम् आलिङ्गिष्यति’ इति तेषां करुणा उद्भूता ।

करुणपूर्णेन स्वरेण जनकमहाराजः उक्तवान् - “बालक, त्वया कथितस्य वचनस्य परिणामः त्वया प्रायः न चिन्तितः इति अहं भावयामि । प्रतिवादिनः शक्तिम् अज्ञात्वा वादरङ्गे प्रवेशः न क्षेमकरः । तादृशं साहसं न युक्तम् । बन्दिपण्डितस्य विद्वत्तां ज्ञातवन्तः केऽपि तेन सह वादाहवं न कुर्वन्ति । त्वम् आवेशवशंवदः विपत्तौ मा पातीः । अन्यच्च बन्दिपण्डितेन वादे कठोराः नियमाः पाल्यन्ते । अतः पुनरेकदा सुष्ठु चिन्तयित्वा निर्णयं कुरु” इति ।

अष्टावक्रः तिलमात्रम् अपि अधैर्यं न प्राकटयत् । तस्य निर्धारः कुलशैलवद्  अचलः आसीत् । सः उक्तवान् - “महाराज, बन्दिपण्डितः अद्यावधि मादृशं निपुणं न सम्मुखीकृतवान् । साधारणान् पण्डितान् वादे विजित्य तावन्मात्रेण अखर्वं गर्वं वहति सः । सिंहवद् गर्जति च । मह्यं दीयताम् अवसरः । नक्षत्रलक्षं यत् तमः निरसितुं न शक्नोति तत् एकः एव सूर्यः यथा निरस्यति, तथा अहम् एकः एव बन्दिपण्डितं निर्जित्य तस्य गर्वाग्निं निर्वापयामि । अन्येषाम् असाध्यं कार्यम् अहं कृत्वा दर्शयिष्यामि । भग्नाक्षं रथमिव भूमौ पतितं बन्दिनं द्रक्ष्यति महाराजः । मम पितुः मरणेन दुःखितायै मम जनन्यै वचनं दत्त्वा आगतः अस्मि । तस्याः अश्रूणि प्रोञ्छितुम् अवसरम् एकं ददातु महाराजः इति सविनयं प्रार्थये” इति ।

“पूर्वापरं विचिन्त्य, मातुः अनुज्ञां गुरोः आशीर्वादं च लब्ध्वा त्वम् आगतः चेत् वादार्थम् अवसरं कल्पयितुं न मे कापि विचिकित्सा” इति महाराजः उक्तवान् ।

बन्दिपण्डितस्तु अवज्ञया अष्टावक्रं वीक्षमाणः - “प्रभो, आदौ सर्वेऽपि गर्वेण इत्थं भाषन्ते । ततो वादाहवे पराभवं प्राप्स्यन्ति । नियमानुसारं दण्डं विहितवन्तं मां क्रूरः इति जनाः निन्दन्ति । तत्रापि

अयं द्वादशवर्षदेशीयः बालकः । अनेन साकं मया वादः कर्तव्यः इति तु हास्यास्पदम् । अस्य औचित्यं महाराजः विचारयतु । सभायाः कालः व्यर्थः मा भूत् । विवादः समयोरेव शोभते किल ? अस्मिन् बालके मम कारुण्यम् एव अस्ति'' इति उक्तवान् ।

''भवता उच्यमानम् अपि समीचीनम् । किन्तु वादभिक्षायै आगतानां रिक्तहस्तेन निवर्तनम् अस्माकम् आस्थानस्य शोभां ह्रासयति । अयं वटुः वादं प्रस्तोतुम् अर्हः न वा इति अहं परीक्षां करोमि । तत्र यदि अयं सफलः भविष्यति, तर्हि भवता सह वादस्य सन्दर्भः'' इति महाराजः उक्तवान् ।

''तथास्तु'' इति सभासदः ऐककण्ठ्येन अङ्गीकारं सूचितवन्तः ।

राजा अष्टावक्रम् उद्दिश्य प्रश्नान् पृष्टवान् -

''षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः ।

यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः ॥

अस्य अर्थं ब्रूहि, यदि त्वं पण्डितोऽसि'' इति ।

अष्टावक्रः सस्मितः कथितवान् - ''राजन्, वर्षचक्रस्य वर्णनम् इदम् । तस्य षड् ऋतवः एव नाभ्यः उच्यन्ते । द्वादश मासाः एव तस्य अक्षत्वेन गण्यन्ते । चतुर्विंशतिः पक्षाः एव तस्य पर्गणि कथ्यन्ते । षष्ट्युत्तर त्रिशतसंख्याकानि दिनानि च तस्य अराणि । वर्षस्य गणनम् इत्थं यः जानाति सः एव कविः इति अत्र तस्य ज्ञानिनः प्रशंसा कृता'' इति ।

सर्वेऽपि सभासदः सन्तुष्टाः करतालिकाभिः अष्टावक्रस्य उत्तरस्य अनुमोदनं कृतवन्तः । राजापि सन्तुष्टः । तस्य बुद्धिकौशलं पुनः परीक्षितुम् इच्छुकः सन् सः अपृच्छत् - ''किं स्वित् सुप्तं न निमिषति (ंनेत्रनिमीलनं न करोति) ?'' इति ।

अष्टावक्रः झटिति उक्तवान् - ''मत्स्यः सुप्तः न निमिषति'' इति ।

जनाः तस्य कौशलेन हृष्टाः अधिकाभिः करतालिभिः तम् अभिनन्दितवन्तः ।

जनकः पृष्टवान् - ''किं स्वित् जातं न चोपति (स्पन्दते) ?'' इति ।

विना शङ्काम् अष्टावक्रः उत्तरम् अवदत् - ''अण्डं जातं न चोपति'' इति ।

सभासदः स्वासनेषु उत्थाय - "साधु साधु" इति उच्चैः घोषयित्वा अष्टावक्रं प्रशंसितवन्तः । राजा तृप्तः हृष्टश्च अष्टावक्रम् उक्तवान् - "अयि भो मुनिपुत्र, भवान् बृहस्पतिः इव बुद्धिशाली । बन्दिपण्डितेन साकं वादं कर्तुं भवान् अर्हः इति मम निर्णयः । श्वः वादयुद्धं प्रचलतु । अद्य भवान् भवतः मित्रं च अस्माकम् अतिथी भवताम् । सत्कारं स्वीकुरुताम् । अद्यतनी सभा समाप्ता" इति ।

राज्ञि उत्थाय स्वकार्यनिर्वहणाय गते, सर्वे सभासदः साभिमानम् अष्टावक्रं पश्यन्तः, 'तस्य विजयो भूयात्' इति मनसा आशासानाः स्वस्वस्थानानि गताः । अष्टावक्रः श्वेतकेतुना सह राज्ञः अतिथिः भूत्वा सत्कारं स्वीकृतवान् । परेद्यवि प्रवर्तिष्यमाणाय वादयुद्धाय सिद्धः अभवत् च ।

## 15

यज्ञशालायां प्रवृत्तः प्रसङ्गः यज्ञदत्तेन आकर्णितः । पुरा तस्य सुहृत्तमः खगोदरशर्मा अनया एव रीत्या बन्दिपण्डितस्य आहुतिः अभवत् इति तेन कथं विस्मर्येत । खगोदरस्य पुत्रोऽपि स्वयं दीपप्रभया आकृष्टः शलभः इव आगत्य बन्दिपण्डितस्य कोपाग्नौ पतति इति विदित्वा यज्ञदत्तः नितान्तम् अतप्यत । तस्य पत्नी च भृशं दुःखिता । केनापि प्रकारेण अयं बालकः समरात् निवर्तनीयः इति पतिम् अयाचत । अतिथिशालां गत्वा तत्र स्थिताय अष्टावक्राय आत्मानं परिचाय्य तेन यथाविधि नमस्कृतः यज्ञदत्तः उक्तवान् -

"आयुष्मन् ! तव पिता मम प्राणेभ्योऽपि प्रियतरः आसीत् । बन्दिपण्डितस्य क्रौर्यं सामर्थ्यं च मया तस्मै निवेदितम् । तथापि वादावनिं प्रविश्य कहोडः बन्दिवशीभूय अदृश्यतां गतः । इदानीं त्वमपि तथा वादभूमिं प्रवेष्टुम् इच्छसि इति ज्ञात्वा अतीव दूयते मम मनः । महान्तः पण्डिताः अपि बन्दिना पराजिताः । बालः त्वम् अस्मिन् कथं धृष्णोषि ? निवर्तस्व अस्मात् दुस्साहसात्" इति ।

अष्टावक्रः उक्तवान् - "भवान् मम पूज्यः । भवद्वचनानि मम हितम् उपलक्ष्य उक्तानि इति जानामि । तथापि मत्पितरं यः बन्दिपण्डितः जले न्यमज्जयत्, यः मम मातरं विधवाम् अकरोत्, यश्च एवं बहून् पण्डितान् यमलोकं प्रापितवान्, तम् अदण्डयित्वा कथं वा अहं निद्रां लभेय ? भगवति वेदपुरुषे मम दृढः विश्वासः । सः मां रक्षिष्यति । भगवतः उद्दालकस्य आशिषः मां रक्षिष्यन्ति । भवतः चिन्ता मास्तु । भवान् मां विजयिनं द्रक्ष्यति" इति ।

अष्टावक्रस्य निवर्तनं न शक्यम् इति ज्ञात्वा तम् आशिषा अभिनन्द्य ततः निर्गतवान् यज्ञदत्तः ।

* * *

सायं यज्ञमण्डपे सर्वे विद्वांसः सभां विभूषितवन्तः । वादकलापं प्रत्यक्षीकर्तुं सर्वेऽपि उत्सुकाः आसन् । ''व्याघ्रस्य मुखं तरुणः मृगः प्रवेक्ष्यति । व्याघ्रस्य तृप्तिः कियतापि आहारेण नास्ति'' इति वचनानि श्रूयन्ते स्म । केचन जनाः ''अद्य बन्दी पराजितः भूयात् । तस्य गर्वः निर्वापितः भूयात्'' इत्यपि वदन्ति स्म ।

महाराजः जनकः सभां प्रविष्टवान् । सर्वत्र नीरवता प्रसृता । सभास्तारान् प्रसन्नेन चक्षुषा वीक्षमाणः महाराजः पृष्टवान् - ''अपि शास्त्रवादं प्रस्तोतुं वादिप्रतिवादिनौ सिद्धौ ?'' इति ।

अष्टावक्रः महाराजं प्रणम्य - ''सिद्धोऽस्मि'' इति उक्तवान् ।

''अहं सदा सिद्धः एव'' इति अष्टावक्रं सावज्ञं वीक्षमाणः बन्दिपण्डितः उक्तवान् ।

''कस्मिन् विषये वादः प्रस्तोष्यते ?'' इति महाराजः जनकः पृष्टवान् ।

''महाराजः स्वाभिमतं यं कमपि विषयं सूचयतु । तत्र स्वापेक्षितं पक्षम् अयं बालकः स्वीकरोतु । अहं प्रतिपक्षी भूत्वा तस्य वादं खण्डयिष्यामि'' इति सविस्रम्भम् अघोषयत् बन्दिपण्डितः ।

''इदं जगत् एककर्तृकं बहुकर्तृकं वा इति विषये अभिप्रायभेदः दृश्यते । अस्मिन् विषये प्रस्तूयतां वादः'' इति महाराजेन प्रोक्तम् ।

''भवतु नाम । बालक ! तत्र कतरं पक्षं स्वीकरोषि ?'' इति बन्दिपण्डितः अष्टावक्रं पृष्टवान् ।

''जगतः कर्ता एकः एव इति मदीयः पक्षः'' इति सविश्वासं प्रोक्तवान् अष्टावक्रः ।

''तर्हि जगद् अनेककर्तृकम् इति अहं सप्रमाणं साधयिष्यामि'' इति सोल्लुण्ठनम् उक्तवान् बन्दिपण्डितः ।

''अत्रत्याः पण्डिताः मध्यस्थाः सन्तु । आरभ्यतां वादः'' इति महाराजः अनुमतिं दत्तवान् ।

अष्टावक्रः गम्भीरेण कण्ठेन स्वकीयं वादं प्रस्तुतवान् - ''समस्तस्य देशस्य स्वामी एकः राजा भवति । यदि बहवः राजानः स्युः, तर्हि तेषां परस्परं विरोधः सम्भवेत् । राज्यरथः निरर्गलतया न प्रचलेत् । तथा समस्तस्य विश्वस्य कर्ता गोप्ता च एकः एव । अन्यथा जगति कापि व्यवस्था एव न स्यात् । यथेच्छं प्रवृत्तेषु बहुषु कर्तृषु ऋतं विचलेत् । तथा न भवति इति एतद् एव प्रमाणं जगतः कर्ता एक एव इत्यत्र'' इति ।

एतत् श्रुत्वा बन्दिपण्डितः साट्टहासम् उक्तवान् - ''अनुभवरहितस्य बालकस्य वचनम् इदम् । लोके किं पश्यामः ? कश्चन रथः करणीयः चेत् तत्र बहवः कर्तारः अपेक्ष्यन्ते । कारवः अनेके तत्र आहूयन्ते । लोहकर्मकाराः अपि बहवः अपेक्ष्यन्ते । साधारणस्य रथस्य विषये एवं भवति चेत्, अपारस्य विशालस्य वैचित्र्यमयस्य च विश्वस्य एकः कर्ता इति अविश्वसनीयम् एतत्'' इति ।

अष्टावक्रः सस्मितम् उक्तवान् - ''अयि भोः पण्डित ! मुख्यं विषयं विस्मरति भवान् । सत्सु अपि बहुषु कारुषु कर्मकरेषु अन्येषु जनेषु च, समग्रस्य रथस्य कल्पनां यः धरति सः मुख्यः कर्ता एकः एव । तस्य आज्ञाम् आदेशं मार्गदर्शनं च अनुसृत्य एव सर्वे अन्ये कारवः कर्मकराः च कार्याणि कुर्वन्ति । अन्यथा एकेन रचितः कश्चिद् भागः अपरेण रचिते भागान्तरे कथं योज्येत ? परमस्य ईश्वरस्य आज्ञाम् अनुवर्तमानाः, तेषु तेषु कार्येषु प्रवर्तमानाः बहवो देवाः वर्तन्ते इति न निषेधामि । किन्तु तेषां जगत्कर्तृत्वं नास्ति । राज्ये बहवः मन्त्रिणः, भूयांसः अधिकारिणः, भूयिष्ठाः सैनिकाः च वर्तन्ते । किन्तु ते सर्वे राज्ञः आज्ञाम् अनुवर्तन्ते । राजा एकः एव । तथा जगतः कर्ता एकः एव'' इति ।

सभ्याः सन्तोषेण तालिकाः दत्त्वा स्वसम्मतिं प्रकटितवन्तः ।

कोपेन बन्दिपण्डितस्य मुखम् आरक्तम् अभवत् । ''अप्रमाणम्  इदम् । जगदीश्वरस्य विषये प्रमाणं वेदः । तत्र बह्वीनां देवतानां वर्णना विद्यते । अग्निम्, इन्द्रं, प्रजापतिं, रुद्रं, विष्णुम्, अन्याः देवताः च मन्त्राः वर्णयन्ति । तत्र एकः अधिकः, अपरः न्यूनः इत्यत्र प्रमाणं नास्ति । अतः सर्वे देवाः जगतः कर्तारः इति स्पष्टम् । पर्यायेण सृष्टिं ते कुर्युः । अतः कापि अव्यवस्था नास्ति'' इति सः स्वतर्कम् उपस्थापितवान् ।

''पुनः अपि भवान् वेदस्य तात्पर्यं विस्मृत्य भणति । सर्वे अपि अग्न्यादयः देवाः एकस्य जगत्कर्तुः आज्ञाम् अनु वर्तन्ते इति श्रुतिः स्पष्टं कथयति । 'भीषास्माद् वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चमः इति' इत्यादीनि वाक्यानि एकस्य जगत्कर्तुः आदेशं वहन्तः देवाः समस्तं भुवनं कुर्वन्ति, चालयन्ति, नाशयन्ति च इत्येव प्रतिपादयन्ति । अतो हेतोः जगतः कर्ता एकः एव'' इति अष्टावक्रः स्ववादं प्रस्तुतवान् ।

बन्दिपण्डितः उक्तवान् - ‘‘सर्वेषां देवानाम् एकः नियामकः इत्यत्र प्रमाणं नास्ति । एकैकम् अपि देवं परमं गायन्ति वेदाः । तेषु कश्चिद् इतरेभ्यः सर्वेभ्यः श्रेष्ठः इति कथं निर्णेतुं शक्यते ?’’ इति ।

अष्टावक्रः प्रसन्नया वाचा उक्तवान् - ‘‘वेदाः मानवस्वभावं जानन्ति । मानवस्य बुद्धिः बहुधा प्रवर्तते । तस्याः बुद्धेः वैविध्ये बहूनि कारणानि भवन्ति । अतः यदि एकम् एव वस्तु बहवः द्रष्टारः बहुधा पश्यन्ति, तत्र वस्तुभेदः न भवति । केवलं तत्र दृष्टिवैचित्र्यं ज्ञातव्यम् इति निश्चयः । इन्द्रादिभिः बहुभिः पदैः सकलमूलतया ज्ञातः एकः एव देवः वर्ण्यते । अत एव -

‘इन्द्रं मित्रं वरुणमग्निमाहुः
अथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्ति
अग्निं यमं मातरिश्वानमाहुः ॥

इति ऋङ्मन्त्रः नामभेदे सत्यपि सत्यम् एकम् एव इति घोषयति’’ इति ।

सभा समग्रापि करतालिकाप्रदानेन सम्मतिम् असूचयत् । बन्दिपण्डितः कोपेन नेत्रे रक्तवर्णे इतस्ततः प्रेरयन् - ‘‘रे बालक, एकं गृहम् अपि एकः नरः निर्मातुं न शक्तः । एकस्य एकस्मिन् विषये शक्तिः भवति । न सर्वेषु विषयेषु । एवं सति, नक्षत्रताराग्रहसहस्रमण्डितं, संख्याहीनजीवकोटिभरितं, नानाश्चर्यमयं बृहत् प्रपञ्चम् इमम् एकः कर्ता कृतवान् इति कथं कथयसि ?’’ इति गर्जितवान् ।

अष्टावक्रः सस्मितं प्रोक्तवान् - ‘‘अये पण्डित, भवता दत्तः दृष्टान्तः विषमः । मनुष्यः अल्पज्ञः, अल्पशक्तिः, अल्पायुः च । सः किमपि एकाकी कर्तुं न शक्नोति । किन्तु जगत्कर्ता अपरिमितशक्तिमान् , सर्वज्ञः, शाश्वतश्च । तस्य सङ्कल्पमात्रेण जगत् सृज्यते, भज्यते च । सः स्वतन्त्रः, न परतन्त्रः । तादृशः जगत्कर्ता एकः एव । तं येनकेनापि नाम्ना भवान् वर्णयतु, न तत्र विरोधः । तस्य एकत्वं तु सिद्धम्’’ इति ।

‘‘साधु साधु । युज्यते युज्यते’’ इत्यादयः घोषाः सभायाम् उत्थिताः । अप्रतिभया बन्दी अवाङ्मुखः स्थितः । तस्य मुखे प्रभूतः स्वेदः दृष्टः । ‘बहुधा स्ववादं द्रढयितुं प्रयतमानोऽपि बन्दिपण्डितः अष्टावक्रं जेतुं न शक्नोति’ इति महाराजः ज्ञातवान् । सभ्याः सर्वे अष्टावक्रम् अभिमानेन पश्यन्ति स्म ।

“अस्मिन् वादे अष्टावक्रः एव अग्रणीः । बन्दिपण्डितः प्रतिभान्यूनतया निर्विण्णः इति भावयामः । तथापि पुनरेकम् अवसरं दास्यामः । एकादिभिः संख्याभिः लोके प्रथितानां वस्तूनां निरूपणं पद्यैः वादिनौ कुरुताम् । तत्रापि यदि अष्टावक्रः बन्दिपण्डितम् अतिशेते, तदा तस्य विजयं घोषयिष्यामः” इति महाराजः उक्तवान् ।

“सिद्धोऽस्मि । न मे किञ्चिदपि भयम्” इति सस्मितम् अष्टावक्रः उक्तवान् ।

बन्दिपण्डितः क्रोधेन नष्टप्रज्ञः इव उक्तवान् - “अष्टावक्र ! शयानं व्याघ्रं त्वं प्रबोधितवान् । सर्पं पदा आहतवान् । नादष्टः त्वं विमोक्ष्यसे । पर्वतं यो नरो विहन्ति, तस्य पाणिरेव सनखो विशीर्यते । पर्वतस्य किमपि न भवति । एवं त्वमपि मया स्पर्धमानः विनङ्क्ष्यसि” इति ।

अष्टावक्रः उक्तवान् - “महाराजेन यथा उक्तं तथा स्पर्धां प्रारभस्व । अन्याभिः वाग्भिः किं प्रयोजनम् ?” इति ।

“तथास्तु” इत्युक्त्वा बन्दी एकसंख्यया पद्यं प्रारभ्य उक्तवान् -

“एक एवाग्निर्बहुधा समिध्यते
एकः सूर्यः सर्वमिदं प्रभासते ।
एको वीरो देवराजो निहन्ता
यमः पितॄणामीश्वरश्चैक एव ॥

अष्टावक्रः द्वित्वयुक्तान् निरूप्य पद्यं रचितवान् -

“द्वाविन्द्राग्नी चरतो वै सखायौ
द्वौ देवर्षी नारदः पर्वतश्च ।
द्वावश्विनौ द्वे च रथस्य चक्रे
भार्यापती द्वौ विहितौ विधात्रा ॥ इति ।

एवं स्पर्धा दीर्घकालं प्राचलत् । द्वादशसंख्यायां प्राप्तायाम् अष्टावक्रः अप्रतिहतमतिः उक्तवान् -

“संवत्सरं द्वादशमासमाहुः
जगत्याः पादो द्वादशैवाक्षराणि ।
द्वादशाहः प्राकृतो यज्ञ उक्तो

द्वादशादित्यान् कथयन्तीह विप्राः ॥

तदा बन्दी शीघ्रम् उत्तरं न अवदत् । स्खलद्वाक् ततः उक्तवान् -

“त्रयोदशी तिथिरुक्ता महोग्रा

त्रयोदशद्वीपवती मही च ।”

ततः अग्रे किमपि तस्य नाभात् । अप्रतिभः सन् सः व्यरमत् । अष्टावक्रः एव तस्य पद्यस्य उत्तरार्धं रचयित्वा श्रावितवान् -

“त्रयोदशाहानि ससार केशी

त्रयोदशादीन्यतिच्छन्दांसि चाहुः ॥ इति ।

तदा सभास्ताराणां महान् सन्तोषपूर्णः निनादः उदभवत् । विप्राः सर्वे पुरस्ताद् आगत्य प्राञ्जलयः सन्तः अष्टावक्रस्य स्तुतिं कृतवन्तः । बन्दिपण्डितः नष्टदशनः सर्प इव अधोमुखः स्थितः । महाराजः विजयिनम् अष्टावक्रम् अभ्यनन्दत् ।

## 16

स्वविजयपर्यन्तम् अष्टावक्रस्य हृदये क्रोधाग्निः ज्वलति स्म । कदा बन्दिपण्डितं जयेयं, कदा वा तं नद्यां निमज्जयेयम् इति चिन्ता तं बाधते स्म । किन्तु अस्मिन् क्षणे तु तस्य स्वान्तं हिंसायाः अजुगुप्सत । उत्तरक्षणे तेन मातुः माङ्गल्यचिह्नैः विरहितं दीनं मुखं स्मृतम् । मम पितरं निष्पापं वेदविदं ब्राह्मणं नद्यां निमज्जितवान् अयं बन्दी इति च स्मृतम् । नद्यां निमज्जितेन पित्रा कियत् कष्टम् अनुभूतं स्यादिति ऊहित्वा अष्टावक्रः क्रोधेन अकम्पत । ‘एतादृशः दुष्टः क्रूरः बन्दिपण्डितः कृपां नार्हति । अनुभूयतां तेन स्वकृतस्य पापस्य फलम्’ इति अष्टावक्रेण निर्णयः कृतः । सर्वतः स्थिताः विद्वांसः अपि तादृशीम् एव भावनां प्रकटयन्ति स्म । नैकः अपि तत्रत्यः पारिषदः बन्दिपण्डिते अनुकम्पां दर्शयति स्म ।

“बन्दिपण्डित, पराजयः अभ्युपगतः किम् ?” इति अष्टावक्रः पृष्टवान् ।

“पराजितोऽस्मि” इति सगद्गदम् उक्तवान् बन्दिपण्डितः ।

“अष्टावक्रो विजयताम्” इति सभ्याः ऐककण्ठ्येन घोषितवन्तः । सर्वेषां हर्षः प्रकर्षम् अभजत । केचन अष्टावक्रं नमस्कुर्वन्ति स्म । केचन आशीर्भिः अभिनन्दन्ति स्म ।

“अष्टावक्रमुने, वादे भवतः जयः घोष्यते मया । वादनियमानुसारेण पराजितः विजयिनः वशंवदः । भवान् यथेच्छं बन्दिपण्डितं दण्डयितुम् अर्हति । अपि च यावदिच्छसि, तावत् गोधनं सुवर्णं च तुभ्यं दास्यामि । इतः परं दारिद्र्यं भवतः समीपं नागमिष्यति” इति जनकमहाराजः उक्तवान् ।

“महाराज, सुवर्णस्य गोधनस्य वा विचारः अन्यः । अयं बन्दी पुरा बहून् विदुषः वादे जित्वा स्ववश्यान् कृतवान् । तान् अयं नदीजले निमज्जितवान् इति च श्रूयते । मम पूज्यः पिता खगोदरशर्मा, यः खलु लोके कहोड इति प्रसिद्धः, सोऽपि अस्य वशंवदो भूत्वा अकाले यमस्य अतिथिः अभवत् । तारुण्ये एव वैधव्यम् अनुभवन्त्याः मम मातुः अश्रूणि मां दहन्ति । अस्य प्रतीकारं कृत्वा तस्याः अश्रूणि मार्जनीयानि इत्येव अहम् अत्र आगतः । बन्दिना पराजितेभ्यः यः दण्डः दत्तः, सः एव अस्मै मया देयः । अनुमन्यतां महाराजः” इति अष्टावक्रः प्रार्थितवान् ।

“अस्य विषये भवद्वचनम् एव राजशासनम् । यथेच्छं करोतु भवान् । वयं तत्र मध्ये न स्थास्यामः” इति उक्तवान् महाराजः ।

“अष्टावक्रमुने, मदीयम् एकं वचनं कृपया श्रूयताम्” इति बन्दी सविनयम् अयाचत ।

“कथ्यतां, कथ्यताम्” इति अष्टावक्रः अनुमतिं दत्तवान् ।

“अहं वरुणद्वीपस्य अधिपतेः वरुणस्य पुत्रः । स च द्वीपः समुद्रस्य मध्ये विद्यते । तत्र मम पिता द्वादशवार्षिकं सत्रम् आरब्धवान् । तदर्थं वेदपारङ्गताः ऋत्विजः अपेक्षिताः । तावद्दूरं गन्तुं, समुद्रयानं कर्तुं च विद्वांसः न सिद्धाः । अस्मात् कारणात् वादस्य व्याजेन विदुषः मद्वश्यान् कृत्वा नदीमार्गेण वरुणद्वीपं प्रेषितवान् अहम् । भवतः पिता कहोडमुनिः अपि तत्र सत्रे ऋत्विग् अस्ति । इदानीं यज्ञस्य समाप्तिकालः । सर्वे विद्वांसः सक्षेमं प्राप्तदक्षिणाः प्रत्यागच्छन्ति शीघ्रम् । मां क्रूरं ब्राह्मणहन्तारं च मा मन्यतां भवान् । वादे जितं मां दण्डय । किन्तु अन्यथाप्रतिपत्तिं दूरीकुरु भोः । नाहम् अनृतवादी” इति सकरुणम् उक्तवान् बन्दी ।

अष्टावक्रः विस्मितः सन् क्षणम् आवाक् स्थितः । जनकमहाराजः, अन्ये सभासदः च आश्चर्यमूकाः बन्दिनम् एव वीक्षमाणाः स्थिताः ।

सहर्षं सशङ्कं च अष्टावक्रः पृष्टवान् - "अयि भोः पण्डितवर्य ! अपीदं सत्यम् ? सत्यं मम पिता जीवति ? पुनरहं तं द्रक्ष्यामि किम् ?" इति ।

"यज्ञः अवसितः । अवभृतस्नानम् अपि अवसितम् । प्रयाणं कृत्वा भवतः पिता अन्ये विद्वांसः च आगमिष्यन्ति कतिपयैः दिवसैः । तत्र संशयलेशः अपि मम नास्ति" इति सविश्वासं बन्दिपण्डितः उक्तवान् ।

"अष्टावक्रमुने ! बन्दिपण्डितस्य दण्डनविषये कः भवतः निर्णयः ?" इति महाराजः पृष्टवान् ।

"महाराज ! यज्ञनिर्वहणार्थं यदि वेदविदः विद्वांसः प्रेषिताः, यदि ते जले नैव निमज्जिताः, यदि च मम पूज्यः पिता पुनः आगमिष्यति, तर्हि बन्दिपण्डितेन नैव अपराद्धम् । मया तस्य क्षमा याचियिष्यते । तत्र प्रतीकारस्य दण्डस्य वा निमित्तम् एव नास्ति । बन्दिपण्डितं साष्टाङ्गप्रणामं पूजयिष्यामि" इति सविनयं प्रोक्तवान् अष्टावक्रः ।

"विद्यायाः उचितं भणितं भवता । इतः परं किं कर्तव्यम् ?" इति महाराजः पृष्टवान् ।

"महाराज ! इदानीं मिथिलायां प्रवर्तमाने यज्ञे मुनिः अष्टावक्रः आर्त्विज्यं स्वीकरोतु । यावत् अयं यज्ञः समाप्तः भविष्यति तावत् सर्वे विद्वांसः एतस्य पित्रा साकम् आगमिष्यन्ति । ततः पित्रा सह मिलितः अष्टावक्रमुनिः यथेच्छं करोतु । यदि मम वचः अनृतं स्यात्, तर्हि अहं तस्य वश्यः एव । घोरातिघोरं दण्डं मम शिरसि सः पातयतु" इति बन्दी उक्तवान् । सर्वे तत् अङ्गीकृतवन्तः ।

कहोडस्य सुहृद् यज्ञदत्तः अष्टावक्रं स्वगृहं नीत्वा बहुधा सत्कृतवान् ।

* * *

गतेषु कतिपयेषु दिनेषु जनकस्य यज्ञः समाप्तः । अवभृतस्नानस्य दिने स्नातानुलिप्ताः द्विजाः मन्त्रपठनं कुर्वन्ति स्म । तदा चत्वारः रथाः यज्ञशालासमीपम् आगताः । रथेभ्यः अवतीर्णाः कहोडादयः वेदविदः यज्ञशालां प्रविष्टवन्तः ।

ऋत्विग्भिः सह जनकमहाराजः प्रत्युत्थानेन स्वागतीकृत्य सर्वान् उचितेषु आसनेषु उपावेशयत् । ततः - "अपि कुशलं पूज्यानां सर्वेषाम् ?" इति पृष्टवान् ।

"महाराज ! सर्वं कुशलम् । भवतः अपि अनामयं सम्भावयामः । बन्दिपण्डितः अस्मान् सर्वान् द्वादशवार्षिकाय सत्राय वरुणद्वीपं प्रेषितवान् । तत्र सत्रं साङ्गं वयं निर्वर्तितवन्तः । वरुणद्वीपात्

निवर्तमानैः अस्माभिः 'भवदीयस्य यज्ञस्य अवभृतस्नानम् अद्य भवति' इति श्रुतम् । अतः सत्वरं प्रयाणं कृत्वा अत्र उपस्थिताः'' इति कहोडः उक्तवान् ।

''अस्माकं भाग्यानां फलम् इदम्'' इति महाराजः उक्तवान् ।

पुरस्ताद् आगतः बन्दिपण्डितः कहोडम् अभिवन्द्य - ''मुनिवर्य ! अत्र भवदागमनं विशेषतः मम भाग्यपरिपाकं सूचयति'' इति विनयावनतशिराः अवदत् ।

''कथमिव ?'' इति साश्चर्यं पृष्टवान् कहोडः ।

''मुनिश्रेष्ठ ! वादे पराजितं भवन्तं जले अहं निमज्जितवान् इति भावनया भवतः सुतः अष्टावक्रः मां वादे जित्वा नद्यां निमज्जयितुं त्वरमाणः आसीत् । भवान् प्रत्यागत्य मम प्राणान् रक्षितवान्'' इति बन्दी उक्तवान् ।

दिङ्मूढः इव कहोडः क्षणं मौनेन स्थितः । ततः हर्षकम्पितशरीरः विविधाभिः भावनाभिः युगपत् आवेश्यमानः कथमपि आत्मानं समाश्वास्य बन्दिनं पृष्टवान् - ''किमाह भवान् ? मम सुतः अष्टावक्रः भवन्तं वादे पराजितवान् वा ? क्वास्ति सः ? तं द्रष्टुम् उत्कण्ठते मम हृदयम् । दर्शयतु तं भवान्'' इति ।

अष्टावक्रः पुरस्ताद् आगत्य शास्त्रोक्तेन प्रकारेण पितरम् अभ्यवादयत । ''आयुष्मान् भव'' इति वक्तुम् इच्छतः अपि कहोडस्य कण्ठः स्तम्भित बाष्पवृत्तिकलुषः जातः । पुत्रं द्रष्टुम् इच्छतः अपि तस्य चक्षुषी बाष्पावृते अष्टावक्रम् अस्पष्टम् एव अपश्यताम् । युगपत् नानाभावनाः कहोडस्य मनसि उद्भूताः । 'बहोः कालात् अनन्तरं पुत्रं पश्यामि' इति हर्षः, 'सर्वविद्वज्जेतारं बन्दिपण्डितं कथम् अयं बालकः एव जितवान्' इति आश्चर्यम्, 'एतादृशं पुत्रं शापेन स्वयम् अहं विकलाङ्गं कृतवान्' इति व्यथा, 'पितुः दूरीभूतम् इमं दारिद्र्यदग्धा सुजाता कथम् अपालयत्' इति चिन्ता, 'विद्यायां माम् अपि अतिशयानः लोके ख्यातः अभवद्' इति कृतकृत्यता - इति विविधाः भावनाः वर्षाकाले नदीप्रवाहाः इव तस्य हृदयं पूरयन्ति स्म ।

''कहोडमुने ! एतादृशं ज्ञानिनं पुत्रं लब्धवान् भवान् नूनं धन्यः'' इति जनकमहाराजः सादरम् उक्तवान् ।

“महाराज ! एतदर्थम् एव जनाः पुत्रान् कामयन्ते । एतदर्थम् एव नार्यः दुस्सहाम् अपि प्रसववेदनां सहन्ते । पुत्रः विद्याम् उपार्ज्य पितृगणं तारयति, कुलं पावयति, कुटुम्बं रक्षति इति । मद्विषये सर्वम् इदं सत्यं जातम् इति अहं धन्यः एव । ‘आत्मा वै पुत्रनामासि’ इति श्रुतिम् अनुसन्दधानः ‘मयैव बन्दिपण्डितः विजितः’ इति आनन्दतुन्दिलः अस्मि । भगवतः उद्दालकस्य तपसां प्रभावः एव अयम् । मम पुण्यराशिः परिपक्वः इति कारणाद् एव अयं महानुभावः मद्वंशे मुक्तामणिरिव जातः” इति वदन् कहोडः आनन्दबाष्पान् वस्त्राञ्चलेन प्रौञ्छत् ।

पुरा यः बन्दिपण्डितः गर्वस्य पर्वतः इव, दर्पस्य समुद्रः इव दृश्यते स्म, सः एव अधुना विनयस्य राशिरिव सौमनस्यस्य पुञ्जः इव गोचरः अभवत् । कहोडः पुत्रम् अष्टावक्रं पृष्टवान् - “पुत्र ! बन्दिपण्डिताय त्वम् अक्रुध्यः । इदानीं का तव भावना तस्मिन् ?”

सः प्रश्रयावनतः उक्तवान् - “पूज्य पितः ! न मम क्वापि द्वेषः । बन्दिपण्डितः भवतः मृत्योः कारणम् इति तस्मै अक्रुध्यम् । तथा नास्तीति ज्ञातवतः मम क्रोधस्य किमपि कारणं सम्प्रति नास्ति । तम् अपि गौरवेण अहम् आद्रिये” इति ।

प्रीत्या अष्टावक्रं वीक्षमाणः बन्दिपण्डितः उक्तवान् - “पुत्रसमान, अष्टावक्र ! वयसा कनीयान् अपि त्वं विद्यया गुणैः च सर्वेभ्यः ज्यायान् । गर्भस्थे त्वयि त्वत्पित्रा दत्तेन शापेन तव अङ्गानि वक्राणि जातानि । मम पितुः वरुणस्य प्रसादात् किञ्चित् दिव्यौषधं मया लब्धम् अस्ति । तेन चिकित्सितः त्वं वक्रत्वविदूरः सुन्दराङ्गः भविष्यसि । मयि त्वया दर्शितं गौरवं व्यर्थं मा भूत् । अहं च अनेन क्रमेण अपकीर्तिं मार्जयितुम् इच्छामि” इति ।

बन्दिपण्डितस्य वचनेन सर्वे सन्तुष्टाः अभवन् । कहोडस्य तु हृदयम् आनन्दे मग्नम् ।

गद्गदितेन कण्ठेन सः अभाषत - “क्रोधः मानवस्य महान् शत्रुः । पूज्यस्य गुरोः उद्दालकस्य वचनं विस्मृत्य क्रोधवशीभूतः अहं स्वपुत्रस्य वक्राङ्गतायाः कारणम् अभवम् । इदानीं पश्चात्तापेन दग्धोऽस्मि । बन्दिपण्डितस्य प्रयत्ने मम पूर्णः विश्वासः अस्ति । वरुणराजस्य यज्ञे मया कृतेन सत्कर्मणा अर्जितं समस्तं पुण्यं दातुम् अहं सिद्धः । मम पुत्रस्य वक्राङ्गता अपगच्छतु । तस्य शरीरं सुन्दरं भवतु” इति ।

जनकराजस्य यज्ञः यथाविधि निर्वर्तितः । ऋत्विजः दक्षिणाभिः तृप्ताः । प्रजाः भूरिभोजनादिभिः सन्तृप्ताः । परेद्यवि बन्दिपण्डितेन वरुणद्वीपाद् आनीतं दिव्यम् औषधम् अष्टावक्रस्य देहे लेपितम् । ततः तं बन्दिपण्डितः मधुविलानाम्न्याः नद्याः समीपम् नीतवान् । तस्याः तटे विधिवत् होमः आचरितः ।

ततः बन्दिपण्डितः उक्तवान् - "अष्टावक्रमुने ! इदानीं सकलाः देवताः स्मृत्वा, वरुणं राजानं च ध्यात्वा, गुरुं पितरं च नमस्कृत्य प्राणायामं कृत्वा अस्याः नद्याः पवित्रे जले स्नाहि । ततः त्वं सुन्दराङ्गः भविष्यसि" इति ।

तथा स्तिमितेन मनसा सर्वं कृत्वा स्नातोत्तीर्णः अष्टावक्रः साश्चर्यं सप्रीति सहर्षं सर्वैः दृष्टः । तस्य सर्वे अवयवाः वक्रतामुक्ताः आसन् । तस्य मुखे अपूर्वं तेजः । शरीरे अद्भुतं सौन्दर्यम् । मन्मथम् अपि, अश्विनीदेवते अपि रूपेण कान्त्या च सः अतिशेते इति सर्वेषाम् भावना सपदि उत्पन्ना ।

## 17

आनन्दतुन्दिलः कहोडः पुत्रं निर्भरम् आलिङ्गितवान् । तस्य नयनयोः आनन्दबाष्पाः सततं स्रवन्ति स्म । कृतज्ञताभारेण प्रणम्रः सः नद्यै सहस्रं प्रणामान् समर्प्य - "मम पुत्रस्य अङ्गानि समानि कृतानि त्वया । हे नदि ! इतःपरं तव नाम 'समङ्गा' इत्येव लोके प्रसिद्धं भवतु । तव कीर्तिः लोकत्रये प्रसरतु" इति आशंसत् ।

अष्टावक्रः बन्दिपण्डितम् अभ्यवादयत । सः जनकमहाराजस्य कहोडादीनां च अनुज्ञाम् आशीर्वादं च प्राप्य वरुणद्वीपाभिमुखः प्रस्थितवान् ।

जनकमहाराजस्य कृपया अष्टावक्रः सम्प्रति धन-धान्य-पशु-कनकादिसम्पन्नः अभवत् । राज्ञा कल्पितैः वाहनैः भटैः च अन्वितः अष्टावक्रः पित्रा कहोडेन, श्वेतुकेतुना च सह प्रस्थातुं सिद्धः अभवत् । कहोडस्य सखा यज्ञदत्तः ससन्तोषं तान् आपृष्टवान् ।

कतिपयदिनानि प्रयाय ते सर्वे महर्षेः उद्दालकस्य आश्रमं प्राप्ताः ।

मृतः इत्येव सर्वैः चिन्तितः कहोडः पुनः जीवितः समायाति इति वार्ता सर्वत्र प्रसृता । आश्चर्यानन्दभरिताः आश्रमवासिनः सर्वे तं द्रष्टुं धावितवन्तः । कहोडं वन्दित्वा अभ्यनन्दन् । सुजातायाः आनन्दं वर्णयितुं शब्दाः नालम् । धावन्ती सबाष्पनयना आगत्य सा तस्य पादयोः पतितवती । तस्याः बाष्पाः कहोडस्य पादौ असिञ्चन् । ताम् उत्थाप्य, तस्याः शिरसिजान् मृदु संवार्य कहोडः

उक्तवान् - "सुजाते ! सुपुत्रप्रसविनी त्वम् । मा रोदीः । त्वत्पुत्रस्य अद्भुतशक्त्या सर्वाणि कष्टानि तीर्णानि । दिष्ट्या वर्धसे" इति ।

"मातः ! अभिवादये । आशिर्भिः माम् अनुगृहाण" इति वदन् अष्टावक्रः सुजातायाः पादौ स्पृष्टवान् । तं सुन्दरं युवानं दृष्ट्वा सुजाता विस्मयोत्फुल्ललोचना जाता । स्वपुत्रस्यैव कण्ठध्वनिः । न तत्र संशयः । किन्तु नयनासेचनकं रूपम् । सूर्यप्रतिस्पर्धि तेजः । क्व तस्याः वक्राङ्गः सुतः । क्व चायं मन्मथोपमः सुन्दराङ्गः । सा किमपि वक्तुम् अशक्ता तम् एव पश्यन्ती प्रतिमावत् स्थिता ।

"सुजाते ! तव पुत्रस्य ईदृशं दिव्यं रूपं कथं जातम् इति त्वया न ज्ञातम् । वादे त्वत्सुतेन पराजितः बन्दिपण्डितः वरुणद्वीपाद् आनीतम् औषधविशेषं प्रयुज्य अष्टावक्रं सुन्दराङ्गं कृतवान् । विद्यया पुरा शोभमानः अयं सम्प्रति रूपेण च शोभते । यागार्थं वरुणद्वीपं बन्दिना प्रेषितः अहं पुनरायातः । दारिद्र्यं च दूरीभूतम् । इतःपरं सुखेन जीवितुं शक्ष्यामः वयम्" इति कहोडः उक्तवान् ।

सुतं दृढम् आलिङ्ग्य तस्य मूर्ध्नि उपाघ्राय सुजाता उक्तवती - "जात ! नव मासान् उदरे धृत्वा प्रसववेदनां सोढ्वा त्वां पालितवती अहम् । सर्वं कष्टं त्वाम् इदानीं पश्यन्त्या विस्मर्यते । धन्यास्मि । त्वं पितरं पुनः आनीतवान् । दारिद्र्यपिशाचं निहतवान् । पितृऋणं त्वया निर्यातितम् । चिरं सुखं जीव" इति ।

ततः सर्वे महर्षेः उद्दालकस्य सन्निधिं गताः । सकलां वार्तां श्रुत्वा ईषत् स्मितं कृत्वा महर्षिः - "अष्टावक्रः पितरम् अपि विद्यया अतिशेते इति मया ज्ञातचरम् एव । अस्य मेधाशक्त्या वेदविद्या अर्थपूर्णा भूयात् । शतशः सहस्रशः च विद्यार्थिनः अस्य अनुग्रहेण तेजस्विनः भूयासुः" इति अनुगृहीतवान् ।

## 18

कालचक्रम् अभ्राम्यत् । कतिपयानि वर्षाणि यातानि । महर्षेः उद्दालकस्य आश्रमः धनसम्पदा धान्यसम्पदा विद्यासम्पदा च भरितः व्यजृम्भत ।

यज्ञाः बहवः आचरिताः । देशे सर्वत्र काले प्रजाः सुखन जीवन्ति स्म ।

अष्टावक्रः तारुण्येन शोभमानः, विद्यया राजमानः, विनयेन भ्राजमानः सर्वेषाम् आदरस्य भाजनम् अभवत् । यदा सः वेदान् अपठत्, यदा वा मन्त्राणां व्याख्यानम् अकरोत् तदा 'वाचां देवी तस्य मुखे

नृत्यति, तस्याः स्वर्णनूपुराणां नादः अस्माभिः श्रूयते' इति श्रोतारः भावयन्ति स्म । तस्य ज्ञानं विशालं गम्भीरं चेति विदित्वा मुनयः अपि तदाश्रमम् आगत्य धर्म-ब्रह्म-दैवादिषु विषयेषु स्वसंशयान् निवेद्य अष्टावक्रस्य मुखात् परिहारान् लब्ध्वा सन्तुष्टाः गच्छन्ति स्म । अनेके राजानः महाराजाः चक्रवर्तिनः च अष्टावक्रस्य दर्शनं प्राप्तुम् आश्रमम् आगत्य लब्धधन्यभावाः निवर्तन्ते स्म ।

यत्र क्वापि प्रमुखाः यागाः यदि प्रवर्तन्ते तत्र अष्टावक्रः अध्वर्युत्वेन आहूयते स्म । यज्ञविधिषु तस्य ज्ञानं निर्दुष्टं निष्कृष्टं चेति सर्वे विश्वसिवन्तः आसन् ।

कदाचित् उशीनराणां राजा यज्ञं कश्चिद् आचरत् । श्वेतकेतुः अष्टावक्रश्च तत्र गतवन्तौ । प्रातः यज्ञक्रियाः प्रावर्तन्त । अपराह्णे ऋषयः विद्वांसश्च नानाविषयेषु चर्चां कुर्वन्ति स्म । वादाः जनानां कुतूहलं वर्धयन्ति स्म । वर्धिष्णूनां विदुषां सः सुवर्णावकाशः आसीत् । तत्र अष्टावक्रस्य वाक्प्रवाहैः अवशीभूताः नैव आसन् ।

एकदा 'स्त्रीणां वेदाध्ययनं विहितं न वा ?' इति विषये चर्चा प्रवृत्ता । तत्र कश्चन ऋषिः उक्तवान् -

"अष्टवर्षं ब्राह्मणम् उपनयीत । तं वेदम् अध्यापयीत' इति श्रुतिः । स्त्रीणाम् अद्यत्वे उपनयनादीनाम् आवश्यकता नास्ति । यज्ञाद्यनुष्ठानस्य प्रश्नः एव नास्ति । तत्सर्वं स्त्रीणाम् अनावश्यकम् । ताः यदि पत्युः अनुवर्तनं कुर्युः तावता अलम् । स्त्रीणां लौकिकं ज्ञानं भवतु नाम, आध्यात्मिके ज्ञाने तासाम् अधिकारः नास्ति । जन्मान्तरे पुरुषत्वं प्राप्य अध्ययनं कुर्वन्तु । आध्यात्मिकं ज्ञानं प्राप्नुवन्तु च । स्त्रीजन्मनि तन्न साध्यं, न साधु च" इति ।

अष्टावक्रः एतत् निराकर्तुं सिद्धः भूत्वा किञ्चिद् वक्तुम् ऐच्छत् । तदा स्पष्टः मधुरः कोमलः स्त्रीध्वनिः श्रुतः - "क्षम्यताम् । स्त्रीसम्बन्धी विषयः इति अहम् अत्र मम वादं प्रस्तोतुम् इच्छामि । ऋषिवर्यैः विद्वद्भिः च मह्यम् अवसरः देयः" इति ।

सर्वे कुतूहलेन अपश्यन् । तत्र काचन ऊनषोडशवर्षा स्फुरद्वदना आयतनयना युवतिः गोचरीभूता ।

उशीनराणां राजा आदरेण तां पश्यन् - "अस्यां सभायां विद्या प्रथमं स्थानम् अर्हति । विद्यावत्सु न च लिङ्गं न च वयः गण्यते । शास्त्रानुसारेण तर्कानुगुण्येन वक्तुं सर्वेषां समानः अवकाशः अस्ति । अतः स्ववादं प्रस्तोतुं तुभ्यम् अवसरं ददामि । प्रस्तूयतां वादः" इति उक्तवान् ।

कांस्यघण्टानादमधुरेण ध्वनिना सा युवतिः वादं प्रारब्धवती - "ज्ञानं प्राप्तुं विश्वरहस्यं साक्षात्कर्तुं च पुरुषाणाम् इव स्त्रीणाम् अपि इच्छा वर्तते । आत्मनि स्त्री पुमान् इति भेदः नास्ति । वेदः ज्ञानम् । वेदम्

अध्येतुम् आकाङ्क्षा यत्र वर्तते, तत्र तस्य बोधनं युक्तम् । ग्रहणे धारणे अर्थावगमने च काचन स्त्री समर्था चेत् तस्यै वेदः किं नाध्याप्यते ? पत्युः सेवा पत्न्या कर्तव्या । तस्य यज्ञकार्येषु सहकारः देयः तया । सा तस्य पुण्यस्य अर्धं लभते इति अस्तु नाम । किन्तु ज्ञानं विना मुक्तिः न सेत्स्यति । ज्ञानं च स्वयं प्रयत्नेन प्राप्तव्यम् । पतिः महाज्ञानीति पत्नी ज्ञानवती न भवति । अतः स्त्रीभिः अपि अध्ययनं कर्तव्यम् । श्रवण-मनन-निदिध्यासनानि स्वयं कर्तव्यानि । जिज्ञासा, ज्ञानशक्तिः च स्त्रीपुंसोः समाना । एवं स्थिते स्त्रीणां सृष्टिः अध्ययनार्थं न जाता इति न साम्प्रतम् । नेदं विवेकिनां वचनम्'' इति तया वादः प्रस्तुतः ।

कश्चन मुनिः श्मश्रूणि संवारयन् उक्तवान् - ''किन्तु स्त्रीषु स्वाभाविकम् अशुचित्वम् अस्ति । प्रतिमासं स्त्री रजस्वला भवति । सा वेदाध्ययनं कर्तं कथम् अर्हति ?'' इति ।

सा तरुणी प्रश्नं श्रुत्वा न विचलिता अभवत् । दृढया वाण्या सा उक्तवती - ''मांसमज्जारक्तादिभिः धातुभिः युक्ते मानुषे शरीरे शुचित्वस्य का वार्ता ? स्त्री वा पुरुषो वा, शरीरं तु सर्वस्य मांसास्थिरक्तादिनिर्मितम् एव । सर्वस्य शरीरं मलमूत्रभाण्डम् एव । कस्य शरीरं रोगैः क्रिमिभिः वा न पीडितम् ? एतान् सर्वान् दोषान् अगणयित्वा पुरुषाः अध्ययनं कुर्वन्ति खलु । प्रकृतिनियमेन लोके स्त्रीणां पुरुषाणां च जन्मदात्री स्त्री एव। तदर्थं रजःसम्पर्कवत्सु दिवसेषु अध्ययनं मास्तु इत्युच्यताम् । किन्तु स्त्रीमात्रस्य अध्ययनं मास्तु इति कथम् इदम् ?'' इति ।

सभायां मौनं प्रसृतम् । ऋषयः परस्परं मुखानि विलोकितवन्तः । कश्चिद् विद्वान् उक्तवान् - ''पुत्राणां प्रसवः, शिशूनां पालनं, वैश्वदेवाद्यर्थं पाकः, पत्युः सेवा, यज्ञकार्यसहकारः इति बहूनि कार्याणि स्त्रीणाम् । अध्ययनाय तासां समयः एव नास्ति । स्त्रियोऽपि यदि अध्ययनमग्नाः भवन्ति तर्हि लोकयात्रा कथं प्रचलेत् ?'' इति ।

''पुरुषाणाम् अपि धनार्जनं, कुटुम्बभारनिर्वहणं, राजकार्यादिषु व्यवहारः, गृहस्य रक्षा इति बहवः भाराः । अध्ययनाय तैः कथम् अवकाशो लभ्यते ?'' इति तरुणी पृष्टवती ।

''बाल्ये अध्ययनम् । तदा एते भाराः न भवन्ति ।''

“स्त्रीणाम् अपि बाल्ये अध्ययनं भवतु । तदा तासाम् अपि भवदुक्ताः कर्तव्यभाराः न भवन्ति । काश्चन स्त्रियः लोकव्यापारे अनासक्ताः यावज्जीवं ब्रह्मवादिन्यः आसन् इति किं भवद्भिः न श्रुतम् ? वेदेष्वेव काश्चन मन्त्रदर्शिन्यः सन्तीति किं विस्मृतम् ?” इति तरुण्या प्रतिपादितम् । सभ्याः ‘साधु साधु’ इति अङ्गीकारं सूचितवन्तः ।

“तादृश्यः अद्यत्वे क्व विद्यन्ते ?” इति कश्चन मुनिः पृष्टवान् ।

“अद्यापि विद्यन्ते विद्योतन्ते च । मम माता सम्पूर्णं वेदम् अधीतवती । सा पत्युः सेवायां वा शिशुपालने वा तिलमात्रमपि अनादरं न कृतवती । तत्र प्रमाणं मम पूज्यः पिता अत्रैव वर्तते” इति तरुणी साभिमानं भणितवती ।

“वयं तव वादम् अनुमन्यामहे । युवते ! तव पूज्यः पिता कः इति ज्ञातुम् इच्छामः” इति अष्टावक्रः सादरं सकुतूहलं च पृष्टवान् ।

युवतिः तत्रोपविष्टं तेजस्विनं स्वपितरं दृष्ट्या असूचयत् । सः उक्तवान् -“मां वदान्यं कथयन्ति । इयं मम सुता सुप्रभा । अनया उक्तं सर्वं सत्यम् । मम पत्नी वेदाध्ययने वेदार्थविचारे च माम् अपि अतिशेते । पतिसेवायां तया कदापि लोपः न कृतः । सुतां सैव अध्यापितवती । शास्त्राध्ययनम् अपि कृतवती सुप्रभा । पुत्री अपि इयं मम पुत्रायते” इति ।

अष्टावक्रः सभ्यान् उद्दिश्य उक्तवान् - “युक्तियुक्तं वचः बालादपि स्त्रियः अपि ग्राह्यम् एव । सुप्रभया प्रोक्तं युक्तियुक्तम् । अनेकाः स्त्रियः मन्त्रदर्शिन्यः पूज्याः सन्ति । काश्चन स्त्रियः विरागिण्यः ब्रह्मवादिन्यः च सन्ति । ब्रह्मोपदेशस्य वेदाध्ययस्य च स्त्रियः अपि अर्हाः इत्यत्र संशयः नास्ति” इति ।

तस्य दिनस्य चर्चा तत्र समाप्ता । सायंसवनाय ऋत्विजः सिद्धाः अभवन् ।

## 19

उशीनरदेशात् आश्रमम् आगतस्य अष्टावक्रस्य हृदये सुप्रभायाः व्यक्तित्वं नृत्यति स्म । तस्याः श्रवणमधुरवाणी तस्य कर्णयोः गुञ्जति स्म । तस्याः प्रसन्नम् आत्मविश्वासद्योतकं मुखं सदा तेन स्मर्यते स्म । आयते तस्याः नयने सकलं विश्वं द्रष्टुम् उत्सुके इव तस्य भातः स्म । तारुण्ये पादार्पणं कृतवत्याः तस्याः रूपं पुनः पुनः तस्य नयनपथे आगच्छति स्म । गहने शास्त्रविषये मनः योजयितुं यदा सः प्रयत्नं कृतवान्, तदापि सुप्रभायाः चिन्ता मध्ये प्रविशति स्म । ‘एवं मा भूत्, हृदयम् अध्ययने निरतं भवतु,

तया मम किम्' इति बहुधा अष्टावक्रः विचारितवान् । किन्तु नियन्त्रणं विच्छिद्य मनः ताम् एव स्मरति स्म ।

पुनः सा युवतिः द्रष्टव्या, तया सह सम्भाषणीयं, तस्याः समीपे स्थातव्यम्  इति इच्छा तस्य मुहुः अजायत । अध्ययने शास्त्रचर्चायाम् अन्नपानादिषु च तस्य आसक्तिः क्षीणा जाता ।

पुत्रस्य अन्यमनस्कता सुजातया ज्ञाता । माता खलु शिशूनां सर्वं साधु असाधु च शीघ्रं ज्ञातुं प्रभवति ? कस्माद् अयम् अन्नपानादिषु आसक्ति न दर्शयति इति प्रथमं तस्याः चिन्ता जाता । किम् अस्य देहारोग्यं नास्ति इति सा आदौ चिन्तितवती । रोगबाधा कापि नास्ति इति ज्ञातवती सा कारणान्तरं विजिज्ञासमाना पुत्रस्य यौवनोचिताः आकाङ्क्षाः जाताः स्युः इति ऊहां कृतवती ।

कदाचिद् अष्टावक्रः स्वस्य पुरः स्थापितानि फलानि मूलानि च अस्पृशन् शून्यदृष्ट्या आकाशम् एव अवलोकते स्म । तं दृष्ट्वा सुजाता पृष्टवती - "जात ! किं चिन्तयसि ? किमर्थं तव अचिरात् आहारेऽपि आसक्तिः नास्ति ?" इति ।

"मातः ! न किञ्चित्" इति  अन्यमनस्कः अष्टावक्रः उक्तवान् ।

"पुत्र ! त्वयि किमपि परिवर्तनं जातम् । गते मासे यज्ञात् प्रतिनिवृत्तः त्वं न क्वापि आसक्ति दर्शयसि । किमपि सदा आलोचयसि । वद, किं कारणम् ? मातुः समीपे अपि तव विस्रम्भः नास्ति किम् ?" इति सुजाता पुनः पृष्टवती ।

किञ्चित् आलोच्य मातुः मुखं पश्यन् अष्टावक्रः उक्तवान् - "अम्ब ! त्वया सम्यक् ऊहितम् । यज्ञे काञ्चन तरुणीम् अपश्यम् । तस्याः रूपं, विद्या, धीरस्वभावः, वाग्मिता इति गुणाः माम् आकर्षन् । अध्ययने मनः योजयितुं मया प्रयत्ने कृतेऽपि तत् ताम् एव चिन्तयति । तां पुनः द्रष्टुं हृदयं वाञ्छति । स्वप्नेऽपि ताम् एव पश्यामि । न जाने कथं मनः स्तिमितं कर्तव्यम् इति" इति ।

एतत् श्रुतवत्याः सुजातायाः हृदयं सन्तोषेण भरितम् अभवत् । यौवने स्थितः पुरुषः तरुण्या आकर्ष्यते इति स्वाभाविकम् इति सा ज्ञातवती । अष्टावक्रः सम्प्रति सुन्दराङ्गः, तरुणश्च । तरुण्यः तेन आकर्षिताः भवन्ति इति च तया ज्ञातम् । अतः सा सुप्रीता पृष्टवती - "वत्स, का सा कन्या ?" इति ।

"सा खलु वदान्यमहर्षेः पुत्री । तस्याः नाम सुप्रभा इति ।"

एतत् श्रुतवत्याः सुजातायाः महान् हर्षः जातः । पुत्रस्य परिणयः भवतु, स्नुषा गृहम् आगच्छतु, विहरमाणौ युवदम्पती दृष्ट्वा तुष्येयम् इति तस्याः मातृहृदये आशा पल्लविता । पुत्रः अनुरूपायां कन्यायाम् अनुरक्तः इति च सा अहृष्यत् । सा सकुतूहलं पुत्रस्य मुखं पश्यन्ती पृष्टवती – ''वदान्यमहर्षेः नाम मया श्रुतम् । तादृशस्य तपस्विनः सुतायां तव प्रीतिः जाता इति महतः प्रमोदस्य विषयः । पुत्र, अपि सा सुरूपा ?''

''अम्ब, सुप्रभा इति तस्याः नाम अन्वर्थम् । तस्याः मुखे विद्याकृतं तेजः देदीप्यमानं दृश्यते । तस्याः वाक्चातुर्यं विचारप्रतिभां च वर्णयितुं शब्दाः नालम् । तस्याः दर्शनेन वस्तुतः मुग्धोऽस्मि ।''

''भवतु । तव कापि चिन्ता मा भूत् । त्वादृशं विद्यावन्तं सुन्दरं पतिम् आप्तुं सापि कन्या पुण्यसहस्रं कृतवती स्यात् । तव पितुः मुखेन प्रस्तावम् इमं कारयिष्यामि । अचिरात् तव मनोरथः सफलः भविष्यति ।''

मातुः वचनं श्रुतवतः अष्टावक्रस्य हृदयं प्रसन्नम् अभवत् । श्वेतकेतुना सब्रह्मचारिभिः च अयं विषयः ज्ञायते चेत् ते हास्यं कुर्युः इति च आलोचितं तेन ।

''अम्ब, केवलं पितरं ब्रूहि । अन्यस्य कस्यापि कर्णे विषयोऽयं मा स्म पतत्'' इति अष्टावक्रः मातरम् अयाचत ।

सुजातायाः मुखे मन्दहासः उत्पन्नः । विद्यावान् अपि, ज्ञानवान् अपि, प्रतिभावान् अपि केषुचित् विषयेषु साधारणः इव व्यवहरति मनुष्यः इति सा चिन्तितवती । 'भवतु नाम' इति च पुत्रम् आश्वासयत् ।

* * *

वदान्यमहर्षेः आश्रमे कहोडमुनिः सादरं स्वागतं प्राप्तवान् । अष्टावक्रस्य परिचयः पूर्वम् एव जातः यज्ञशालायाम् । तस्य यज्ञकार्यनैपुण्यं शास्त्रवैदुष्यं च वदान्यमहर्षिः एव प्रशंसितवान् । लब्धावसरः कहोडमुनिः स्वस्य आगमनस्य उद्देशं विवृतवान् – ''महर्षे, उशीनरमहाराजेन निर्वर्तिते यज्ञे मम सुतः अष्टावक्रः भवतः सुतां सुप्रभां दृष्टवान् । तस्याः रूपेण विद्यया प्रतिभया च सः आकृष्टान्तरङ्गः । आवयोः कुटुम्बद्वयं यदि विवाहसम्बन्धेन योजितं स्यात्, महतः हर्षस्य विषयः भवेत् । पुत्रस्यार्थे कन्यां

याचितुम् आगतः अस्मि । उदारेण मनसा अनुगृह्णातु भवान् । भवतः सुतां ददातु मम पुत्राय । अस्मद्वंशतरोः वृद्धौ साहाय्यम् आचरतु'' इति ।

वदान्यमहर्षेः अपि मुखं विकसितम् । ''अयं मम महतः सन्तोषस्य विषयः । परं मम पत्न्याः सुतायाः च अभिप्रायम् अविदित्वा नाहं किमपि वक्तुं समर्थः । तयोः हार्दं भावं ज्ञातुम् इच्छामि'' इति सः उक्तवान् ।

''शीघ्रं सर्वं विचार्य कथयतु अत्रभवान्'' इति कहोडः विज्ञापितवान् ।

''अद्य भवान् विश्राम्यतु । श्वः सर्वं कथयिष्यामि'' इति वदान्यमहर्षिः आश्वासयत् ।

आश्रमे हरिणीव सञ्चरन्ती, पिकीव मधुरं वदन्ती, अतिथिसत्कारे मुख्यं पात्रं वहन्ती सुप्रभा कहोडस्य मनः विनयादिभिः गुणैः आकर्षत् । 'एतादृशी विद्यासम्पन्ना गुणभूषिता कन्या स्नुषा भविष्यति चेत् नूनम् अस्माकं वंशः समुन्नतिम् एष्यति' इति सः चिन्तितवान् ।

परेद्यवि वदान्यमहर्षिः कहोडम् उक्तवान् - ''मुने, भवतः सुतः अस्मदाश्रमम् आगत्य द्वित्राणि दिनानि वसतु अत्र । वयं तं परीक्षिष्यामहे । ततो निर्णयं वदिष्यामः'' इति ।

कहोडः 'भवतु तथा' इति अङ्गीकृत्य वदान्यं तत्पत्नीं च प्रणम्य स्वाश्रमम् आगतः । विषयं यथावत् पत्न्यै पुत्राय च निवेदितवान् ।

अष्टावक्रः परेद्यवि एव प्रस्थितः । वदान्यमहर्षेः आश्रमे अतिथिरूपेण कतिपयानि दिनानि वासं कृतवान् च । महर्षिः तत्पत्नी तयोः पुत्री सुप्रभा च सूक्ष्मेक्षिकया बहुधा तस्य परीक्षां कृतवन्तः । न क्वापि तस्य लोपः दृष्टः ।

ततः वदान्यमहर्षिः अष्टावक्रम् आहूय समीपे उपवेश्य उक्तवान् - ''चिरञ्जीविन्, अष्टावक्र, भवतः सर्वे गुणाः अस्मभ्यं रोचन्ते । श्रेष्ठेन चारित्र्येण च भवान् अस्मान् प्रीणयति । तथापि ......''

''तथापि किम् ?'' अष्टावक्रः पृष्टवान् ।

''अस्माकं कुटुम्बस्य कश्चन सम्प्रदायः वर्तते । तदनुसारेण भवान् उत्तरदिशि प्रयाय हिमवन्तं पर्वतं गच्छेत् । तत्र कुबेरस्य राज्यम् अस्ति । तस्य दर्शनं कृत्वा पुनः उत्तरस्यां दिशि भवता प्रयातव्यम् । तत्र उत्तराख्या राज्ञी विशालं देशं प्रशास्ति । सा भवता द्रष्टव्या । कुबेराय उत्तरायै च पत्रं दास्यामि ।

तयोः उत्तरं ताभ्यां लेखयित्वा भवता आनेतव्यम् । तथा करिष्यसि चेत्, सुप्रभा तव पाणिं ग्रहीष्यति'' इति

''भवतु तथा । पत्रद्वयं ददातु भवान् । अहं गत्वा उत्तरम् आनेष्यामि । ततः सुप्रभां परिणेष्यामि'' इति निश्चलेन स्वरेण अष्टावक्रः अवदत् ।

वदान्यमहर्षिः भूर्जपत्रे स्वीयं सन्देशं गुप्तलिप्या लिखित्वा अष्टावक्राय दत्तवान् । कुबेरस्य राज्यं गन्तुं मार्गं च सूचितवान् । तदनुज्ञां प्राप्य अष्टावक्रः पुनः उद्दालकाश्रमं गतः । पित्रोः मातामहस्य च आशीर्वादं प्राप्य शुभदिने उत्तरदिगभिमुखः प्रस्थितः ।

कतिपयदिनप्रयाणानन्तरं हिमालयपर्वतस्य प्रस्थं प्राप्नोत् अष्टावक्रः । वसन्तकालः हितकरः आसीत् । वृक्षाः फलपुष्पभरिताः आसन् । सृष्टेः महिमानं दृष्ट्वा विस्मयानन्दभरितः अष्टावक्रः इन्द्रादीन् देवान् ध्यायन् प्रयाति स्म । गगनं चुम्बन्तमिव स्थितम् अत्युन्नतं रजताद्रिं भूयो भूयः प्रणमति स्म ।

यदा सः कुबेरस्य राजधानीं प्राप्नोत्, तदा निदाघः । तथापि तत्र शैत्यम् एव आसीत् । हिमं द्रवीभूय नदीरूपेण प्रवहति स्म । अष्टावक्रः कुबेरस्य सौधं प्राप्य द्वारपालकान् विज्ञापितवान् स्वकार्यम् । ते च अन्तः गत्वा महाराजाय सर्वं निवेद्य प्राप्ताज्ञाः - ''महाराजः भवदागमनेन अतीव सन्तुष्टः । भवान् अतिथिगृहे सम्प्रति विश्राम्यतु । स्नानपानभोजनादि स्वीकरोतु । ततः महाराजः भवन्तं द्रक्ष्यति'' इति उक्तवन्तः ।

तथा अष्टावक्रेण सर्वम् अनुष्ठितम् । सायं स्वयं महाराजः कुबेरः तं स्वागतेन अभ्यनन्दत् । स्वास्थानं च नीत्वा तत्रत्यानां पण्डितानां परिचयम् अकारयत् । ततः उक्तवान् - ''मुनिवर्य, भवतः गुरुकुलस्य कुलपतेः उद्दालकस्य सर्वं कुशलं सम्भावयामि । भवतः प्रयाणं निर्बाधम् आसीत् इति च विश्वसिमि । भूयांसं परिश्रमं सहमानः भवान् अत्र आगत्य स्वपादस्पर्शेन मम राज्यं पावनं कृतवान् इति नितान्तं कृतज्ञोऽस्मि । भवदागमनस्य कारणं ज्ञातुम् इच्छामि । भवतः वाक्यं श्रोतुम् उत्कण्ठते मे चेतः । अनुगृह्णातु आदेशेन भवान्'' इति ।

अष्टावक्रः स्वागमनस्य कारणं संक्षेपेण कथितवान् । वदान्यमहर्षिणा दत्तं पत्रं कुबेराय दत्तवान् । तत्पठित्वा सन्तुष्टः कुबेरः - ''वदान्यमहर्षिः अस्माकं सर्वेषां पूज्यः । तदाज्ञानुसारेण अत्र आगतः भवान् अस्माकं आचार्यदेशीयः । यावद् भवान् इच्छति, तावद् अस्माकं राज्ये स्वगृहे इव विस्रम्भेण वसतु । सर्वं सौविध्यं भवदनुकूलं मया कल्पयिष्यते'' इति प्रोक्तवान् । आशु अधिकारिणम् आहूय सर्वं यथोचितं विधातुम् आदिष्टवान् । राजाज्ञानुसारेण अष्टावक्रस्य राजोपचारसहिता सेवा कृता सर्वैः ।

परेद्यवि आस्थानमण्डपे अष्टावक्रः उन्नतेन आसनेन सभाजितः । अप्सरसः इव वेषभूषादिभिः शोभमानाः सुन्दर्यः नर्तक्यः नाट्येन तस्य मनोरञ्जनं कृतवत्यः । अष्टावक्रः सर्वं पश्यन्नपि अम्भसि स्थितं पद्मपत्रम् इव निर्लेपः अवर्तत ।

नृत्यानन्तरं कुबेरः एकान्ते अष्टावक्रेण सह उपविष्टः । सेवकाः मद्यपात्रं चषकद्वयं च आनीय तत्र स्थापितवन्तः । कुबेरः उक्तवान् - "मुनिकुमार ! भवान् यागेषु सोमं पीतवान् । ततोऽपि अधिकं मधुरं सुखदं च हृद्यं मद्यम् अत्र अस्ति । साधारणमानवानाम् इदं दुर्लभम् । इदं पीत्वा भवान् रसनाजन्म सार्थकीकरोतु । भवता सह पानं कुर्वतः मम सुखमपि द्विगुणं भविष्यति" इति ।

अष्टावक्रः सविनयम् उक्तवान् - "राजन्, भवतः सर्वं शोभते । किन्तु अहं वेदाभ्यासनिरतः । न मद्यपानं मम उचितम् । क्षाम्यतु भवान् । नाहं तत्र आसक्तः ।"

कुबेरः सस्मितम् अभाषत - "भवता मनस्सङ्कोचः न कर्तव्यः । अत्र देशे शीतमये मद्यपानं प्रशस्यते । न च ते पिता गुरुः वा अत्र प्रवृत्तं ज्ञास्यति" इति ।

अष्टावक्रः उक्तवान् - "अन्यः कश्चन द्रक्ष्यति ज्ञास्यति वा इति धर्मः न आचरणीयः । यमो वैवस्वतः हृदि सदा संनिहितः । तेन विवादः यथा न स्यात् तथा अहम् आचरामि । मम निर्बन्धं मा करोतु भवान्" इति ।

कुबेरः 'तथास्तु' इति सस्मितम् उक्तवान् । ततः पृष्टवान् - " मुनिवर्य, नर्तकीनां नृत्यं दृष्टं खलु । किं भवते नृत्यम् अरोचत ?" इति ।

अष्टावक्रः उक्तवान् - "राजन्, नाहं नाट्ये परिणतः । मम अध्ययनं तु केवलं वेदादिषु । कथमहं तत्र किमपि वक्तुं समर्थः ?" इति ।

कुबेरः अब्रवीत् - "गच्छतु तत् । अपि नर्तकीनां रूपं भवते अरोचत ?"

अष्टावक्रः उक्तवान् - "महाराज ! नाहं तत्र आसक्तः । मम मनः तदा विचारान्तरे मग्नम् आसीत् । नर्तकीनां रूपं वा देहसौष्ठवं वा नाहं वीक्षितवान् ।"

‘‘मुनिवर्य ! एताः गन्धर्वस्त्रियः । अन्विष्य अन्विष्य रूपवतीः नृत्यनैपुण्यवतीः वयं कलाप्रोत्साहनाय अत्र नियुक्तवन्तः । तत्र अनादरः न दर्शनीयः । भवादृशैः तासां सौन्दर्यं द्रष्टव्यम् अनुभवितव्यं च’’ इति कुबेरः सविमर्शम् अकथयत् ।

‘‘अनादरः कर्तव्यः इति मया किमपि न कृतम् । ऋष्याश्रमे संवृद्धस्य मम नेत्रं सर्वाः नारीः मातृरूपेण पश्यति । न तत्र देहसौन्दर्यं वीक्षते’’ इति सविनयम् अष्टावक्रः उक्तवान् ।

‘‘अत्र तादृशी भावना नोचिता । एताः सर्वाः वाराङ्गनाः । न विवाहिताः । अतिथीनां सत्काराय एताः पोषिताः । निस्सङ्कोचम् एताः द्रष्टुं योग्याः । कामोऽपि पुरुषार्थः इति शास्त्रमेव वदति खलु ?’’ इति कुबेरः उक्तवान् ।

‘‘महाराज, क्षाम्यतु भवान् । सन्ध्योपासनावेला उपस्थिता । अनुजानातु माम्’’ इति वदन् अष्टावक्रः कुबेरस्य अनुमतिं प्राप्य स्वकर्तव्यार्थं निर्गतः ।

रात्रिभोजनं कृत्वा अष्टावक्रः अतिथिगृहे मृदुशय्यायां स्वप्तुं सिद्धो भवति स्म । तदा मञ्जुलः नूपुरनादः श्रुतः । द्वारे स्थिता युवतिः काचन दृष्टा । तस्याः हस्ते राजतं भाजनम् आसीत् । तस्मिन् दुग्धपात्रं ताम्बूलं च दृश्यते स्म । आस्थाने दृष्टासु नर्तकीषु सा अन्यतमा स्यादिति अष्टावक्रेण ऊहा कृता । समन्दहासं तं दृष्ट्वा रजतभाजनं फलकस्य उपरि निधाय सविलासं स्थिता सा सुन्दरी ।

‘‘का त्वम् ? केन प्रयोजनेन अत्र आगमनम् ?’’ इति अष्टावक्रः पृष्टवान् ।

‘‘मुनितरुण ! नृत्यं कुर्वती अहं भवन्तं दृष्टवती । ब्रह्मतेजसा भ्राजमानं भवतः मुखं पश्यन्त्याः मम हृदये मोहः उत्पन्नः । त्वया सह सुखम् अनुभवितव्यम् इति तीव्रेच्छा जाता । अनुगृहाण’’ इति कटाक्षेण तं वीक्षमाणा उक्तवती ।

अष्टावक्रस्य हृदयम् अकम्पत । सः क्षणं निमीलितनेत्रः अघमर्षणसूक्तं मनसा जपित्वा स्तिमितहृदयः ताम् अवदत् - ‘‘ऋषिकुलोत्पन्नः अहम् । पत्न्याः ऋते अन्यां कामपि नारीं मनसापि न चिन्तयामि । गम्यतां त्वया ।’’

सा उक्तवती - ‘‘मुनिवरेण्य ! याचमाना नारी न निराकरणीया इति धर्मः । धर्मकामौ उभावपि कथं त्यजसि ?’’

“धर्मोपदेशः त्वया न कर्तव्यः मम । गम्यताम्” इति दृढेन स्वरेण अष्टावक्रः उक्तवान् । सा कुपिता सती ततः निर्गता ।

गतानि कतिपयानि दिनानि । तेषु अष्टावक्रः कुबेरराज्यस्य गगनचुम्बीनि गिरिशिखराणि, स्वच्छजलाः नदीः, दर्पणवत् शोभमानान् कासारांश्च दृष्टवान् । तत्र देशे विशिष्टानि कन्दमूलफलानि च सादरं राजसेवकैः उपाहृतानि भुक्त्वा आनन्दम् अनुभूतवान् । ततः कदाचिद् राजानं दृष्ट्वा आशिषो दत्त्वा अब्रवीत् - “राजन् ! भवता क्रियमाणः अतिथिसत्कारः देवोचितः । अत्र सर्वं पुरुषायुषं निमेषकालवत् यापयितुं शक्यम् । तथापि मया महर्षेः वदान्यस्य आदेशः पालनीयः । इतोऽपि उदीच्ये देशे उत्तरानाम्नीं राज्ञीं सन्दृश्य मया निवर्तनीयम्” इति ।

“मुनिवर्य ! भवतः वैराग्यं ज्ञानं तपश्चर्या च अस्मान् नितान्तम् आनन्दयन्ति । पुनः कानिचिद् दिनानि अत्रैव उषित्वा अस्मान् भवान् अनुगृह्णातु इति अस्माकं मनीषा । यदि गुरोः आज्ञा पालनीया, तर्हि नाहं तत्र विघ्नो भवितुम् इच्छामि । उत्तरां दिशं गन्तुं सुविधां कल्पयिष्यामि” इत्युक्त्वा कुबेरः अधिकारिणः आहूय तान् यथोक्तकरणाय आदिशत् ।

अष्टावक्रेण साकं चत्वारः भटाः प्रस्थिताः । अश्वतरान् आरुह्य तैः प्रयाणम् आरब्धम् । कम्बलाः, आहारपदार्थाः, पेयं जलं च तैः नीतम् । पक्षम् एकं प्रयाय ते सर्वे उत्तरायाः राज्यं प्रविष्टवन्तः । राजधानीम् आसाद्य तत्रत्यान् अधिकारिणः सन्दृश्य अष्टावक्रः स्वागमनोद्देशं कथितवान् । ते तद्विषयं राज्ञीं निवेद्य तस्याः अनुमतिं प्राप्य अष्टावक्रं भव्ये सौधे प्रवेशितवन्तः । प्रविष्टमात्रः एव अष्टावक्रः तत्रत्येन विशेषेण आश्चर्य चकितः अभवत् । सौधे सर्वत्र स्त्रियः । नारीमयोऽयं नूतनः लोकः इति तस्य प्रत्यभात् । दास्यः अष्टावक्रं भव्ये प्रशाले उपावेशयन् ।

“अत्र स्थितः पूज्यः किञ्चित् प्रतिपालयतु । राज्ञी आगत्य भवते दर्शनं दास्यति” इत्युक्त्वा दास्यः अपक्रान्ताः ।

अनतिकाले गते राज्ञी उत्तरा तत्र आगता । तस्याः वयः उपचत्वारिंश- वर्षात्मकम् इति अष्टावक्रस्य प्रत्यभात् । किञ्चित्स्थूलापि सुन्दरी । राजभावस्य गाम्भीर्यं गर्वः दर्पश्च तस्याः मुखे दृश्यन्ते स्म । अष्टावक्रः वेदमन्त्रैः ताम् अभिनन्दितवान् । सा किञ्चिदिव अवनतशिराः तं नमस्कृत्य - ‘उपविशतु भवान्’ इत्युक्त्वा स्वयमपि सुवर्णमये आसने आसीना अभवत् ।

‘‘मुनिः कश्चन आगतः इति श्रुत्वा कोऽपि श्वेतजटाधारी वृद्धः आगतः इति मया चिन्तितम् । किन्तु अत्रभवान् तरुणः रूपसम्पन्नश्च । महान् मे प्रमोदः’’ इति तया उक्ते अष्टावक्रः - ‘‘तरुणो वा वृद्धो वा, मुनिरेवाहम्’’ इति सस्मितम् अवदत् ।

‘‘मन्मथः यदि मुनिवेषं धरति, सः एवं दृश्यते इति मे प्रतिभाति । भवतः नाम अष्टावक्रः इति श्रुतं मया । रूपस्य नामधेयस्य च विरोधं महान्तं पश्यामि । वस्तुतः वक्राः अपि सुन्दराणि रमणीयानि च नामधेयानि धरन्ति । भवादृशस्य केन इदम् अनुचितं नाम कृतम् ?’’ इति सकुतूहला राज्ञी पृष्टवती ।

अष्टावक्रः स्वकथां संक्षेपेण कथितवान् । ‘‘अस्मद्देशः भवत्पादस्पर्शेन पवित्रीकृतः । भवदागमनस्य प्रयोजनं ज्ञातुम् इच्छामि’’ इति तन्मुखम् एव अवलोकमाना राज्ञी उक्तवती । अष्टावक्रः तदा यज्ञमण्डपे सुप्रभायाः दर्शनं, तत्र जातं स्वानुरागं, ततः वदान्यमुनिदर्शनं च कथयित्वा - ‘‘महर्षिः वदान्यः माम् आदिष्टवान् यत् ‘राज्ञीम् उत्तरां सन्दृश्य आगच्छ । ततः सुप्रभायाः पाणिं ग्रहीष्यसि इति । अतः अहं सम्प्रति अत्र अस्मि’’ इति उक्तवान् ।

‘‘एव नु ?’’ इति राज्ञी उत्तरा उच्चैः हसितवती । ततः उक्तवती - ‘‘मुनिवर्य ! प्रथमं स्नानपानादि स्वीकृत्य विश्राम्यतु । अधुना मम राजकार्याणि भवन्ति । रात्रौ मिलाव’’ इति ।

अष्टावक्रः तदादेशानुसारेण अभूतपूर्वाः सेवाः अनुभूतवान् । तेन निषिध्यमानाः अपि दास्यः तं मज्जनगृहं नीत्वा सुखकरेण उष्णजलेन स्नपयित्वा सुगन्धिभिः अङ्गरागैः तस्य अलङ्कारं कृतवत्यः । श्रेष्ठानि दुकूलानि अधारयन् । विविधानि पक्वान्नानि च पर्यवेषयन् । तावत् तेन अदृष्टानि स्वादूनि फलानि च आर्पयन् ।

रात्रौ दास्यः ‘राज्ञी भवन्तम् आह्वयति’ इति तं तस्याः प्रकोष्ठम् अनयन् । तस्मिन् कोष्ठे प्रविष्टमात्रे द्वारं पिहितम् । दास्यश्च अदृश्याः अभवन् । पुरस्तात् दिव्ये भव्ये विशाले मञ्चे उत्तरा शयिता दृष्टा । तदा राज्ञ्याः शयनकोष्ठं प्रविष्टः अस्मि इति अष्टावक्रेण ज्ञातम् । अष्टावक्रम् आगतं विज्ञाय सा किञ्चिदुन्नमितमुखी ‘स्वागतम्’ इति व्याहरत् ।

अष्टावक्रः राज्ञीम् अपश्यत् । तस्याः रूपं सूक्ष्मतमे वस्त्रे स्पष्टं दृश्यते स्म । अङ्गसौष्ठवेन सा सकलाः अपि युवतीः जेतुं शक्नोति इति अष्टावक्रस्य अभात् । सविलासं कटाक्षेण तं विलोकमाना राज्ञी - ‘‘मुनिमन्मथः मञ्चम् इमम् अनुगृह्णातु’’ इति प्रार्थितवती ।

“राज्ञी मां क्षाम्यतु । तत्र उपवेष्टुं न मम अधिकारः । अहम् अत्रैव उपविशामि” इति वदन् अष्टावक्रः भित्तिसमीपस्थे कस्मिंश्चित् पीठे उपविष्टवान् ।

राज्ञी पानपात्रेण चषकं पूरयित्वा स्वल्पं पीत्वा घूर्णमाननयना उक्तवती - “मुनिमन्मथ, सत्यं ते निवेदयामि । मम देहः मदनाग्निना तप्यते । दाहम् इमं शमयितुं त्वम् एव समर्थः । उत्कण्ठिता अस्मि । त्वां दृष्टवत्याः मम कामविकाराः जाताः । तवालिङ्गनेन यौवनसुखम् अनुभवितुम् इच्छामि” इति । एवं वदन्ती राज्ञी अष्टावक्रस्य समीपम् आगम्य बाहुभ्यां तं निर्भरम् आलिङ्गत् ।

दिग्भ्रान्तः अष्टावक्रः अजगरा◌ालिङ्गितः हरिणः इव क्षणं किमपि कर्तुं नाशक्नोत् । ततः मनोबलेन कायं स्थिरीकृत्य बलाद् आत्मानं तस्याः बाहु-बन्धनात् अमोचयत् । “राज्ञि ! अहं भवत्याः सुतः इव । नेदं चरितं युज्यते” इति अवदत् अष्टावक्रः ।

“मदनसुन्दर ! औचित्यानौचित्ययोः चर्चायाः न अयं समयः । वदान्यं सुप्रभां मुनीन् आश्रमं च विस्मर । मया सह अत्रैव वस । विना चिन्तां सर्वान् भोगान् अनुभव । इदानीं मम कामनां सार्थकीकुरु” इति आर्तस्वरेण उत्तरा प्रार्थितवती ।

“राज्ञि ! किमिदं कथ्यते ? प्रायशः मद्यपानस्य अयं परिणामः । सुप्रभा मया विस्मर्तव्या वा ? धिक् राज्यम्, धिक् भोगान् । समस्त-भूमण्डलाधिपत्येनापि नाहं सुप्रभां विस्मरामि । माम् अत्र प्रेषयता महर्षिणा वदान्येन अनुचितं कृतं मन्ये । प्रायः महर्षिः तव निजं रूपं न जानाति । धिक् त्वाम् । अत्राहं क्षणम् अपि न स्थास्यामि । इदानीमेव इतः प्रस्थास्ये” इति निष्ठुरेण स्वरेण उक्त्वा अष्टावक्रः त्वरितैः पदैः ततः प्रस्थितः ।

“साधु अष्टावक्रमुने साधु । धन्यो भवान् । मम परीक्षायां त्वं विजयं प्राप्तवान् । त्वादृशं जितेन्द्रियं वसुन्धरा कदाचिदेव प्रसूते । सुप्रभा नूनं भाग्यशालिनी । एकान्ते नारी कामयमाना स्वयम् आत्मानं यदा अर्पयति, तदा तां निराकुर्वाणाः पुरुषाः विरलतमाः । तत्रापि दूरदेशे यौवनस्थः ब्रह्मचारी कामिनीं स्वयं प्राप्तां तिरस्करोति चेत् सः निश्चप्रचं जितेन्द्रियः । सुप्रभायां भवतः प्रेम सत्यम् । भवतः प्रेम कामातीतम् । भवन्तं परीक्षितुं नाटकम् इदं मया कृतम् । यथा भवता उक्तं तथा मम पुत्रः भवत्समानवयाः । सः अधुना गुरुकुले वसति विद्याभ्यासाय । महर्षेः वदान्यात्, महाराजात् कुबेराच्च भवदागमनं मया विदितचरम् । तदुद्देशश्च ज्ञातपूर्वः । अतः एव परीक्षां कृतवती । तत्र उत्तीर्णः भवान् ।

महर्षये लेखं दास्यामि । गत्वा सुप्रभां सहधर्मचारिणीं कृत्वा दीर्घायुः यशस्वी सुखं जीवतु भवान्'' इति राज्ञी उत्तरा साभिमानम् अब्रवीत् ।

ततः सा पत्रं लेखयित्वा अष्टावक्राय दत्तवती । पत्रेण सह अपारां सम्पदं च अष्टावक्रः प्राप्नोत् । सुखं यथा सः उद्दालकाश्रमं प्राप्नुयात् तथा व्यवस्थाम् अपि अकरोत् राज्ञी ।

सर्वान् विचारान् मात्रे पित्रे च निवेद्य अष्टावक्रः वदान्याश्रमम् अगच्छत् । ससन्तोषं सादरं च तं स्वागतीकृत्य वदान्यः उक्तवान् - ''महाराजात् कुबेरात् उत्तरायाश्च सन्देशः प्राप्तः मया । भवान् संयतेन्द्रियः । भोगाः भाग्यानि वा भवन्तं न मार्गभ्रष्टम् अकुर्वन् । अग्निपरीक्षाया अपि कष्टतरायां परीक्षायां भवान् यशस्वी जातः । भवादृशः जामाता मया लब्धः इति अस्मत्कुलस्य सौभाग्यम् इदम् । मम सुतां सुप्रभां पाणिग्रहणेन भवान् अनुगृह्णातु । तां सहधर्मचारिणीं कृत्वा कुलद्वयम् उद्धरतु'' इति ।

''गार्गीव मैत्रेयीव महाविदुषी सुप्रभा मम पाणिगृहीती भवति इति पूर्वसुकृतपरिपाकः मम'' इति अष्टावक्रः वदन् वदान्यम् अवन्दत ।

ब्राह्मेण विधिना सुप्रभायाः पाणिं गृहीत्वा अष्टावक्रो मुनिः यौवनोचितानि सुखानि अनुभूतवान् । सदा ब्रह्मविद्यापरो भूत्वा महायोगी ज्ञानी कीर्तिमांश्च अभवत् ।

अष्टावक्रकथा रम्या महाभारतवर्णिता ।
कथिता नागराजेन लोकानामस्त्वियं मुदे ॥